इति कामिनि । मृगेन्द्र—विक्रम इति राजनि । सुरतप्रवीण इति कामुके । गङ्गा-जलोज्ज्वल इति धार्मिके। कलङ्कविकल इति सामान्ये । सुकलानिलय वचनचन्दन मदन-सदन विज्ञातलक्षण विहितविनय विदितसाहित्य लक्षणलक्षित तर्कपारगामिन् विज्ञात-सुच्छन्दः अभय - अहिंसा - विचारेभ्यो दीक्षित, कुलधूर्धवल शशाङ्कवदन दानैककल्पद्रो विक्रमनिधान विनय-सुवाक्याभ्यां प्रधान,—निर्निदान असमानात् । रूप-गुण-कीर्ति-मूर्ति-शील-भाव-दयाः । रूपजितस्मर साक्षाद्गुणाकर विदुषां-तपसां-महसां-तेजसाम्-ओजसां-छन्दसां-श्रेयसां मण्डन इति पदं योज्यते। औचित्येन पदविन्यासः । यतः—

अनौचित्यादृते नान्यद् रसभङ्गस्य कारणम् ।
प्रसिद्धौचित्यमहिमा रसस्योपनिषन्मता ॥३३॥

सत्त्वरत्नाम्बुधे दुरितदलन दुरितभिदुर विलयविदुर मोहान्ध्य-पातक-व्यामोह-संसारेभ्यो भिदुर । रतविचारज्ञ धर्मकलामय सर्ववाणिज्याब्धे अनुकूलदैव क्षुण्णद्वेषिबल बलबलभद्र प्रज्ञाबृहस्पते दानजितबले हतकलिकाल जितकालव्याल ललनालोभन सुकृतनिरत इत्यादि ।

सप्ताक्षराणि—रजनीकरवक्त्र प्रतापजितसूर्य रूपद्वेषितकाम महनीयविवेक विचारसुन्दराङ्ग याचकचातकाब्द इत्यादि ।

विवेकहेमहेमाद्रिः—देवे । अज्ञानध्वान्तविध्वंसी मोहध्वान्तदिवानाथः, दीक्षितः क्षोणिरक्षायाम् । स्त्रियाम्—रूपनिर्जितनाकस्त्री ।

भयभ्रान्तकुरङ्गाक्षी नीलोत्पलविलोचना ।
गजेन्द्रगामिनी कामवाहिनी रतशालिनी ॥३४॥

इति श्लोकः ।

**पण्डिते—** साहित्य-तर्क-निर्घण्ट-छन्दो-व्याकरणाम्बुधे ।
रोहिणीरमणप्रख्य ख्यातकीर्ते बुधोत्तम ॥३५॥

**राजनि—** वीरभोगीणदोर्दण्डप्रचण्डद्वेषिदर्पभित् ।
परंतपो महावीरः परनारीसहोदरः ॥३६॥

**वृषे—** घण्टाटङ्कारमुखरः कन्धरस्थामभासुरः ।
श्रिया कैलासवल्लोके वृषो डिण्डीरपाण्डुरः ॥३७॥

**वेश्या—** रतद्रव्यार्थिनी पण्याङ्गना मायानिकेतनम् ।
देवदत्तोपमा साक्षाद् विशिकानां निवासभूः ॥३८॥

विवेकहेमहेमाद्रिः गुणमुक्ताफलाम्भोधिः रूपनिर्जितकन्दर्पः धर्मवल्लीवसन्ताभः दिव्यमूर्तिर्जितानङ्ग इति प्रथमपदम् ।

गुणमाणिक्यरोहणः गुणचन्दनपर्वतः विवेकहंसमानसः, वाचा विजितचन्दनः इत्यादि पदद्वयेन पूरणम् ।

निःसीमगुणमाणिक्यो माणिक्याचलवैभवः ।
विद्यावारांनिधिश्चन्द्रो निस्तन्द्रो धर्मकर्मसु ॥३९॥

## पदसंचारिणी ।

तदेव काव्यं पदसंचारेण क्रियते । पदसंचारिणी नाम यथा—

देवदेवं प्रणम्यादौ सर्वज्ञं सर्वदर्शिनम् ।
कातन्त्रस्य प्रवक्ष्यामि व्याख्यानं शार्ववर्मिकम् ॥४०॥

देवाधिदेवमानम्य सर्वज्ञं सर्वदर्शकम् ।
लघुसूत्रस्य वक्ष्यामि व्याख्यानं शर्ववर्मजम् ॥४१॥

देवदेवं प्रणम्य प्राक् समस्तज्ञानकोविदम् ।
कातन्त्रव्याख्यां वक्ष्येऽहं निर्मितां शर्ववर्मणा ॥४२॥

अथवा — प्रणम्य परमात्मानं श्रेयःशब्दानुशासनम् ।
आचार्यहेमचन्द्रेण विद्वत्प्रीत्यै प्रतन्यते[1] ॥४३॥

प्रणम्य परमात्मनं पुण्यशब्दानुशासनम् ।
सूरिणा हेमचन्द्रेण बुधहर्षाय तन्यते ॥४४॥

यथा वा— जयइ विणिज्जियराओ सव्वन्नू तियसनाहकयपूओ ।
सब्भूयवत्थुवाई सिवगईनाहो महावीरो ॥४५॥

[छाया—] जयति विनिर्जितरागः सर्वज्ञस्त्रिदशनाथकृतपूजः ।
सद्भूतवस्तुवादी शिवगतिनाथो महावीरः ॥

यथा वा— वरकणय-संख-विद्दुम-मरगय-घणसंनिहं विगयमोहं ।
सत्तरिसयं जिणाणं सव्वामरपूइयं वंदे ॥ ४६ ॥

---

१. अत्र मूलश्लोको यथा—

प्रणम्य परमात्मनं श्रेयःशब्दाकाव्यानुशासनम् ।
आचार्यहेमचन्द्रेण स्मृत्वा किञ्चित् प्रकाश्यते ॥

[छाया—] वरकनक-शङ्ख-विद्रुम-मरकत-घनसंनिभं विगतमोहम् ।
सप्ततिशतं जिनानां सर्वामरपूजितं वन्दे ॥

एवं संचारिणीक्रमेण श्लोकाः ।

सहस्रशत .... .... .... ....
.... ... ठाण ....गइ विणयमणयो[1]....

## शुक्लादीनां श्लोकाः ।

[ **प्रथमे पादे** पञ्चा ]क्षरे **शुक्लानाम्**—

कर्पूरपूर डिण्डीरपिण्ड सा[वि]टी(त्री)कर शम्बूकव्रज गङ्गाप्रवाह रविदीधिति मृणालनाल मधूकपुष्प फेनसंचय कैरवोत्कर कैरवव्रात चन्दनद्रव कठिनीद्रव श्रीखण्डपिण्ड दन्तीन्द्रदन्त कामिनीगण्ड मुक्ताकलाप नीहारहार कैलासहास सुधासंवाद प्रालेयजाल करकोत्कर मृणालस्तम्ब वर्षोपलौघ कुन्दसंदोह स्फटिकोपल शालितन्दुल कल्हारपुष्प सिन्दुवारौघ मल्लिकापुष्प कदलीसार शरदम्भोद नवनीतौघ घनसारौघ शुभ्राभ्रद्युति पारदद्रव मचु(मुच)कुन्दौघ । तत्रैव तृतीयाक्षरे—नीकास संकास सप्र(प)क्ष तुल्यश्री तुल्याभ सदृक्ष ॥१॥

**द्वितीयपादे** द्वितीयाक्षरे—कान्ति तेजः प्रभा रोचिः महः देह कीर्ति गुण वपु तनु तनू काय अङ्ग वर्ष्म पिण्ड गात्र मूर्ति । द्वितीयपादे—यस्य तस्य अस्य इत्यादि । चतुर्थाक्षरे—प्रकाशते प्रतीयते प्रभासते प्रतीक्षते प्रणीयते ॥ २ ॥

**तृतीयपादे** तृतीयाक्षरे—चन्द्रोऽयम् घटोऽयम् प्रासादः नीहारः मेघोऽयम् कम्बलः सुवर्णः । तृतीयपादे पञ्चाक्षरैः—राजते रम्यः, शोभते भद्रः, भास्वते भास्वान्, प्रेक्षते भूयः, दृश्यते नूनम्, वीक्ष्यते लोकैः ॥ ३ ॥

**चतुर्थे पादे** तृतीयाक्षरैः—नितान्तम् निश्चितम् नियतम् सर्वथा सततम् सर्वदा सुतराम् । पुनः पञ्चमाक्षरैः—दृश्यदीधितिः दर्शनोचितः दर्शनप्रियः प्रियदर्शनः वीक्षणोचितः लोचनप्रियः प्रियलोचनः ॥४॥ निष्पन्नोऽयं प्रथमः श्लोकः शुक्लानाम् ॥१॥

अथ **कृष्णानाम्—प्रथमे पादे** पञ्चाक्षरैः—यमुनाजल कालिन्दीजल नीलनीरज नवजीमूत मषीसंचय कामिनीकेश भ्रमरपक्ष चि(च)ञ्चरीकौघ वेणीसंचय घनसंदोह अल(त)सीपुष्प श्यामाङ्गीगात्र कोकिलकण्ठ कोकिलाश्रेणी राजपट्टौघ नीलकण्ठौघ गवलव्रात । एवमन्येऽप्यूहनीयाः पुन नीकासादिभिः संबन्धनीयाः । [ इति द्वितीयश्लोकोत्पत्तिः ॥ २ ॥ ]

---

१. अवाच्यानीमानि पदानि

**रक्तानाम्–प्रथमे पादे** पञ्चाक्षरैः—बन्धूकपुष्प गैरिकद्रव किंशुकपुष्प जपाप्रसून मञ्जिष्ठाराग अलक्तरस सन्ध्यादीधिति प्रवालजाल पल्लवाङ्कुर दाडिमीपुष्प दाडिमीबीज कुङ्कुमरस कुङ्कुमद्रव तप्तकाञ्चन चञ्चत्काञ्चन चारुकाञ्चन । एवमन्येऽप्यूहनीयाः पुनर्नीकासादिभिर्योजनीयाः । इति तृतीयश्लोकोत्पत्तिः ॥३॥

**पीतानाम्—प्रथमे पादे** पञ्चाक्षरे—सुवर्णवर्ण कूष्माण्डपुष्प कर्पासपुष्प गन्धकद्रव हरितालौघ कनकद्रव हरिद्राद्रव सुपर्णपत्र हेमपङ्कज गौराङ्गीगात्र पुराणपर्ण शणप्रसून विद्युत्संचय सौदामिन्योघ कनकाम्भोज पीतपङ्कज पीतोत्पलौघ । पुनः संकासादिभिः संबन्धः ॥ ४ ॥

**विशेषणगणः— प्रथमे पादे** चतुर्थाक्षरे— देवदत्त यज्ञदत्त विष्णुमित्र । पुनश्चतुर्थाक्षरे— महाबुद्धिः प्राणाधारः महाकीर्त्तिः विशुद्धात्मा कृपायुक्तः दयायुक्तः जितारातिः जयत्येषः विभेत्येषः कृती नूनम् महाप्राज्ञः महातेजाः प्रसन्नात्मा । प्रसिद्धोऽयं विशेषणगणः । एवमन्येऽप्यूहनीयाः ॥

**द्वितीयपादे** तृतीयाक्षरे—धर्मेण कृपया पुण्येन शुभेन दयया सुखेन सुकृतैः विद्यया गुणेन चक्षुषा वपुषा केशेन कलया दानेन । पुनः पञ्चाक्षरे—समलंकृतः परिमार्जितः परिमण्डितः सर्वदान्वितः सुखलालितः ।

**तृतीयपादे** तृतीयाक्षरे—आनन्दः प्रमोदः संतोषः सुरभिः सुज्ञानम् सक्तम् सुपादम् । पुनः पञ्चाक्षरे —दीयते येन, धीयते येन, गीयते येन, जन्यते येन, पाल्यते येन, रा(र)ज्यते येन, प्राप्यते येन, जीयते येन, नीयते येन, पच्यते येन ।

**चतुर्थपादे** तृतीयाक्षरे—लोकानाम् प्राणिनाम् बुद्धानाम् शूराणाम् भिक्षूणाम् सर्वेषाम् । पञ्चाक्षरैः—परमार्थतः, ननु निश्चितम्, खलु सर्वदा, समनन्तरम् जगतस्तले, पृथिवीतले, क्षणमात्रतः, दर्शनादिना, क्षेत्रवीक्षणात्, दृष्टिमात्रतः ॥

**प्रथमे पादे** चतुर्थाक्षरे—महावीरम् । पुनश्चतुर्थाक्षरे—सदा वन्दे, प्रवन्देऽहम्, नतो नौमि, सदा स्तौमि, चिरं वन्दे, नमिस्यामि, संस्तवीमि, जिनाधीशम्, गणाधीशम्, जनाधीशम्, महात्मानम्, मुदां पात्रम्, श्रियः पात्रम्, श्रियां धाम, श्रियां स्थानम्, श्रियां गेहम् ।

**द्वितीयपादे** तृतीयाक्षरे—सिंहेन मणिना गदया सहसा शिरसा । पुनः पञ्चमाक्षरे—भूषितोदरम् भावभासुरः परिराजितम् द्योतिताम्बरम् ।

**तृतीयपादे** तृतीयाक्षरे—कलुषाम् कल्मषम् दुरितम् दुष्कृतं AHMEDABAD तिमिरम् पापं च । पुनः पञ्चमाक्षरे—खण्डितं येन, नाशितं येन, मारितं येन, पाटितं येन, ध्वंसितं येन ।

**चतुर्थपादे** चतुर्थाक्षरे—नीरजेन पयोदेन वारिदेन कज्जलेन अलातेन राजपट्टैः इन्दीवरैः । पुनः चतुर्थाक्षरे—समप्रभम् समद्युतिः सदोपमम् सदाप्रभम् सदानिभम् सदाध्रुवम् ।

## [ इति श्लोकः ]

**इन्द्रवज्रायाम्—प्रथमे पादे** द्वितीयाक्षरे—दाने माने भिक्षुः विद्वान् । तृतीयाक्षरे—प्रसिद्धः विशुद्धः महात्मा महाधीः महाश्रीः । षष्ठाक्षरे—सुकृती जनानाम्, सुकृतां गरीयान्, यतीनां महात्मा ।

**द्वितीयपादे** पञ्चमाक्षरे—धर्मप्रतानो विद्याविशेषैः शुभ्रैर्यशोभिः । षष्ठाक्षरे—परिराजमानः, परिशोभमानः, परिभूषितोऽयम्, सुतरामुपेतः, बृहतां महीयान् ।

**तृतीयपादे** षडक्षरे—विनाशितं येन, विदारितं येन, विखण्डितं येन । पञ्चाक्षरे—समस्तमंहः समस्तयोनिः समस्तपापम् ।

**चतुर्थपादे** पञ्चमाक्षरे—लीलारविन्दैः पयोधरौघैः साम्भःपयोदैः । पुनः षडक्षरे—सदृशप्रकाशः, सदृशः सदैव, प्रतितुल्यकान्तिः, समदीप्तिजातः ।

## [ इति ] इन्द्रवज्रा ॥

**वसन्ततिलकाछन्दसि—प्रथमे पादे**ऽष्टाक्षरे—प्रालेयजालमहसा नीहारनिर्मलरुचा फुल्लारविन्दनिवहैः शीतांशुदीधितिगणैः स्विद्यत्तुषारसलिलैः वर्षोपलाम्बुदजलैः कासप्रसूननिकरैः मल्लीप्रधानकुमुदैः कैलासहासकुमुदैः कैलासहासकमलैः श्रीखण्डपिण्डविसरैः अम्भोजचन्दनचयैः कासप्रकाशविमलैः । पुनः षष्ठाक्षरे—सदृशं सदैव, सततं समानम्, सुतरां मनोज्ञम्, समकान्तिजातम्, रमणीयमेव, कमनीयकान्तिः, अविकल्पमूर्तिः, स्फुरितैकशोभम्, स्फुटरूपशोभम् ।

**द्वितीयपादे** चतुर्थाक्षरे—संप्रेक्षणम् संदर्शनम् संवीक्षणम् आलोकनम् आमोदनम् । पुनः पञ्चाक्षरे—नियतमस्य प्रकटमस्य सततमस्य प्रततमस्य निखिलमस्य । पुनः पञ्चाक्षरे—मनोभिरामम्, जनाभिनन्दम्, जनप्रमोदम्, जनस्य रम्यम्, सदा प्रशस्यम्, कृतप्रमोदम् ।

**तृतीयपादे**ऽष्टाक्षरे— निर्माणनिर्मलतरः, आकारसुन्दरतरः, लोकोपकारचतुरः, दृष्टो जनेन पुरु(र)तः, संप्रेक्ष्यते प्रतिमुहुः । पुनः षष्ठाक्षरे— प्रतिभाति चन्द्रः, गगने विभाति, भुवने विभाति, परिगजितेयम्, पट एष भाति, जलदः प्रतीतः ।

**चतुर्थपादे**ऽष्टमाक्षरे— अम्भोजनाशनकरः, स्वच्छप्रभाप्रकटितः, शोभासमूहसुभगः, लोकैरयं परिवृतः । पुनः षष्ठाक्षरे—जगतीतलेऽस्मिन्, घटितो विधात्रा, रचितश्च कर्त्रा, भुवने निकामम् ॥

**कृष्णानाम्** [ अष्टमाक्षरे ] — नीलोत्पलस्य वपुषा, स्फूर्ज्जत्कलापकुसुमैः, अम्भोधरद्युतिभरैः, भृङ्गावलीपिकगणैः, इन्दीवरस्फुटरुचा, कादम्बिनीरुचिचयैः । पुनः सदृशादिभिः संबन्धनीयः ॥

**लोहितानाम्** — बन्धूकपुष्पनिकरैः बालार्करश्मिनिवहैः दात्यूहलोचनचयैः सन्ध्याप्रकाशविसरैः संतप्तकाञ्चनचयैः लाक्षारसैरभिनवैः मञ्जिष्ठरागपटलैः । पुनः सदृशादिभिः संबन्धः ॥

**पीतानाम्** — चामीकरस्फुटरुचा, जाम्बूनदस्य महसा, विद्युत्प्रताननिकरैः, कार्त्तस्वरस्य महसा, कार्त्तस्वरस्य किरणैः, उद्भासिचम्पकचयैः । पुनः सदृशादिभिर्योजनीयम् ॥

### [ इति वसन्ततिलका ॥ ]

इदानीं **मालिनीछन्दसि** — पुनः **प्रथमे पादे** [ अष्टमाक्षरे ] — नवसरसिजजालैः विकचकुसुमयुक्तैः शशधरकरजालैः नवनलिनवितानैः विकसितघनपद्मैः परिणतधवलोच्चैः मलयजरसजालैः । पुनः सप्ताक्षरे— सन्निभो लोक एषः, सन्निभोऽयं सदैव, सर्वदा तुल्यकान्ति, सर्वथैवोपमेयः, तुल्यरूपप्रकामम्, हन्ति नीकासकान्तिम्, संततं सोममूर्तिः, निर्भरोद्भासिरूपः ।

**द्वितीयपादे**ऽष्टमाक्षरे — प्रसरति करभारः, स्फुरति किरणराजी, जयति करसमूहः, नवतरकरभारः, सुविमलतररश्मिः, भुवि बहुतरदीप्तिः, द्वितीयाक्षरे—तस्य इत्यादि । पुनः पञ्चमाक्षरे—रम्यः प्रकामम्, काम्यो निकामम्, संश्लाघनीयः, संप्रेक्षणीयः ।

**तृतीयपादे**ऽष्टमाक्षरे— विकरनिकरजालैः, जनयति रतिमुच्चैः, रतिपतितनुतेजः । पुनः सप्ताक्षरे—यामिनीनाथ एषः, चन्द्रमा वक्त्रदासः, गात्रसंगी पटोऽयम्, पद्मिनीयं पुरस्तात्, वारिदोऽयं महीयान् ॥

**चतुर्थपादे**ऽष्टमाक्षरे— क्षिततिमिरविकासः सकलजनमनोज्ञः कृतहृदयविनोदः सुभगवचनरम्यः बहुसलिलनिवासः । पुनः सप्ताक्षरे— निर्मितोऽयं विधात्रा, सर्वलोकोपकारी, प्राणिनां कर्मदक्षः, मानवानां विनोदी, भूतले भ्राम्ययानः, माननीयो जगत्याम् ॥

**कृष्णानाम्**— नवजलधरजालैः भ्रमरसुभगपुञ्जैः विषधररुचिजालैः समदगजघटाभिः कचचयघनभासः कुणपनिवहकान्त्या कुवलयघनजालैः पिककुवलयसंघैः । पुनः सन्निभादिभिः संबन्धः ।

**लोहितानाम्**— अभिनवरुचिभासः ज्वलितदहनकान्त्या सुभगकनकभासा नवतपनकरौघैः अभिनवकरवीरैः घनकिसलययुक्तैः । पुनः सन्निभादिभिः संबन्धः ।

**[ इति ] मालिनी ॥**

**मन्दाक्रान्ताछन्दसि–प्रथमे पादे** चतुर्थाक्षरे—कर्माधारः तस्याकारः कन्दर्पाभः पापाकारः, सोधैः, सङ्घः, लोकालोकः चन्द्रप्रक्षः लोकप्रक्षः । षष्ठाक्षरे—मदनसदृशः पशुपतिसमः करिकरनतः निहितदुरितः निहितकलुषः प्रकटितगुणः अनिहतमतिः कमलवचनः सुरपतिसमः कनकरुचिमान् निपुणतरधीः सुविमलवपुः दिनपतिमहाः नलिननयनः विनयनिलयः । सप्ताक्षरे—सर्वदा सेवनीयः, वन्दनीयो बुधानाम् , विद्यया देवकल्पः, वारिराशिप्रकाशः, सिन्धुराजोपमेयः, देवराजातिकृत्यः, निर्जिताशेषवादी, निर्जिताशेषशत्रुः, पण्डितानां महीयान्, वादिनां श्रेष्ठबुद्धिः, धीमतामग्रणीस्थः ।

**द्वितीयपादे** चतुर्थाक्षरे—ख्यातं शान्त्या, व्यक्तं पापैः, पद्माक्षोऽयम्, मुक्तिस्थानम्, विष्णुप्रायः, प्रीत्या युक्तः । षष्ठाक्षरे—शशिसममुखः विधुसममहाः सुकृतसहितः सुभगवचनः हरिरिव महान्, सकलगुणवान् । सप्ताक्षरे—माननीयो जगत्याम्, कीर्त्तनीयः कलाभिः, कन्तिशीलो विशालः, वेदविद्यार्थविज्ञः, नीतिशास्त्रार्थविज्ञः, सर्वविद्यानुरागी भाति कन्दर्पकान्तिः, पञ्चबाणोपमोऽयम्, चम्पकाकारगौरः, दुःसहो वैरिणां यः, द्वेषिणां दुःसहोऽयम्, राजते सौम्यमूर्तिः ।

**तृतीयपादे** चतुर्थाक्षरे— गाम्भीर्याब्धिः, बिम्बौष्ठोऽयम् चेतोहारी, मायाहीनः चित्ताकर्षी, चित्तोत्कण्ठी, साधुश्लाघ्यः, नीत्या मान्यः । षष्ठाक्षरे—विनयसहितः विबुधसहितः गुणीजनगृहम् नियमनिलयः स्फुटतरमतिः सुकृतनिलयः प्रहतकलुषः जितरिपुजनः । सप्ताक्षरे— चारुचामीकरार्चिः चन्द्रकर्पूरकीर्त्तिः शुभ्रकीर्तिप्रतानम्, काव्यजातौ हि विज्ञः, कमिनीचित्तहारी यामिनीनाथकल्पः, भास्वता तुल्यतेजाः, देवदेवावतारः धर्मबुद्धिर्विशुद्धिः सर्वदा शुद्धबुद्धिः ।

**चतुर्थपादे** चतुर्थाक्षरे— राजा मान्यः, श्रेयोवासः, प्रख्यातोऽयम्; सूरिः श्रेयान्, विद्वत्सेव्यः, प्रज्ञावासः, भास्वान् भासा, लोकालोकः, ख्यातः कान्त्या, प्रज्ञायुक्तः । षष्ठाक्षरे— विनयसहितः निपुणतरधीः सरसिजयशाः शशिनिभरुचा रुचिरवदनः प्रकृतिचतुरः प्रकृतिसदयः ललितगमनः सरसिजमुखः । सप्ताक्षरे— राजसे शुद्धभावैः, प्रेक्ष्यते पण्डितोऽयम्, सर्वदा शुद्धकर्मा, वीक्ष्यमाणो महद्भिः, सेवनीयः कवीन्द्रैः, चन्द्रबिम्बाननश्रीः, रम्यराजीवनेत्रः, बद्धधम्मिल्लभारः, सर्वलोकोपकारी ।

[ इति ] **मन्दाक्रान्ता** ॥

**शिखरिणीछन्दसि–प्रथमे पादे** षष्ठाक्षरे— महाप्रज्ञाधारः, महाशीलश्लाघ्यः, कलानामाधारः, कलाशेषाभिज्ञः, विशालो बुद्ध्याढ्यः, क्षमाशीलोपेतः, प्रशस्यप्रज्ञोऽयम् । पुनः षष्ठाक्षरे— विततसुगुणः मदनविजयी रतिपतिसमः विनयसहितः जनितसुकृतः विधुकरमुखः रविनिभमहाः जनितगरिमा । पञ्चाक्षरे— निर्मलयशाः प्रीतिसहितः पङ्कजमुखः शोभनवचाः सुन्दरगुणः सत्कविनिधिः पण्डितमहाः पावनवपुः शक्रसदृशः ।

**द्वितीयपादे** षष्ठाक्षरे—परार्थः सर्वेषाम्, स्फुरल्लोलाक्षोऽयम्, चलल्लीलाब्जाक्षः, रिपूणां तेजस्वी, कृती पुंसां मध्ये, सदा मेध्याकारः, प्रभावैः सद्वीरः । पुनः षष्ठाक्षरे— विगतकलुषः, गलितदुरितः, हतमदबलः, शमयुतवपुः, हरिसमरुचिः, जनपदखलः । पञ्चमाक्षरे— वीररचि(चरि)तः निर्मदरतः गौरवपदः सद्गुणमतिः सभ्यचतुरः शास्त्रनिपुणः भद्रचरितः चारुचरितः चारुवदनः ।

**तृतीयपादे** षष्ठाक्षरे— निवासः सूरीणाम्, रिपूणां विध्वंसी, प्रशस्यः सर्वेषाम्, प्रसूतिः पुण्यानाम्, शशाङ्कप्रख्योऽयम् । पुनः षष्ठाक्षरे— नृपवरनतः मृगपतिसमः जलनिधिसमः कमलवदनः सुखनिधिरयम् । पञ्चमाक्षरे— धीरचरितः वीचिसुभगः कोकिलवचाः हस्तिगमनः चारणगतिः कुञ्जरगतिः सूक्तिसरसः दानसहितः ।

**चतुर्थपादे** षष्ठाक्षरे—चकोरप्रायोऽयम्, प्रसिद्धः प्रज्ञाभिः, गुरुप्रायोवाचः, महास्त्राणां वेत्ता । षष्ठाक्षरे— जयति भृशम्, नरपतिरयम्, धनपतिरसौ, द्विजकृतनतिः, प्रकटितयशाः, विनयसहितः । पञ्चमाक्षरे —भाति नियतम्, राजति सदा, द्विज (? श्री)पतिसमः, दुःसहमहाः, साधुतिलकः, सज्जनगृहम्, मान्यचरितः ।

[ इति ] **शिखरिणी** ॥

**स्रग्धराछन्दसि–प्रथमे पादे** सप्ताक्षरे— दुर्वाराशेषतेजाः, विख्यातः पुण्यभाजाम्, रक्तः सर्वस्य नित्यम्, युक्तः पापैः प्रकामम्, धर्माणामादिभूमिः । पुनः

सप्ताक्षरे— दिनपतिसदृशः विगलितदुरितः प्रतिहतकलुषः जिनसदृशमतिः शशधरवदनः हृतदुरितचयः । पुनः सप्ताक्षरे— रम्यराजीवनेत्रः, चन्द्रतुल्याननश्रीः, प्रज्ञया देवकल्पः, सर्वदा साधुबुद्धिः, वन्दनीयो नरेन्द्रः ।

**द्वितीयपादे** सप्ताक्षरे— प्रख्यातः कीर्तिजालैः, सर्वेषां प्रीतिकारी, लोकानां चित्तहारी, लक्ष्म्या नित्यं विनोदी, भानुतापप्रतापः । पुनः सप्ताक्षरे— प्रसरति महिमा, शिवचरणगतः. मनसिजसदृशः सुभगतरमतिः, पटुतरवचनः, गुणिजनसुभगः, बहुतरविभवः, परिणततरधीः, रुचिरनरपतिः, [सु]जितरिपुगणः, परिजितमदनः, कृतसुकृतचयः । पुनः सप्ताक्षरे— चारुवेषप्रचारः नीतिधर्मप्रवादी, नीतिगामी निकामम्, निर्मलाशेषकीर्त्तिः, चारुमूर्तिप्रकाशः ।

**तृतीयपादे** सप्ताक्षरे—देवानां पूजनीयः, भिक्षूणामग्रगामी, नूनं निर्दोषदेहः, रम्यो धर्मप्रतापैः प्रज्ञापूर्णस्वरूपैः, देवानां भाति नूनम्, ख्यातः कान्त्या मनोज्ञः । [पुनः] सप्ताक्षरे— नरपतिरधुना, जगति विजयते, जनयति सुरभीः, मुदमिह तनुते । पुनः सप्ताक्षरे— बुद्धधर्मानुरागी खण्डिताशेषपापः दुःखहेतुप्रणाशी देवदेवावतारम् ।

**चतुर्थपादे** सप्ताक्षरे—शास्त्राणां पारदृश्वा, विज्ञाताशेषशास्त्रः, नित्यं विद्याविनोदी, पुंसां पुण्योपदेष्टा । पुनः सप्ताक्षरे— स्फ(स्फु)रदमलरुचिः शुभमयचरितः प्रकटितमहिमा गुणिगुणनिलयः । पुनः सप्ताक्षरे— स्थैर्यतः शैलराजः, धैर्यतो वारिराशिः, चन्द्रसूर्यप्रकाशः, ख्याततेजाः पृथिव्याम् ।

## [ इति ] स्रग्धरेयम् ॥

**शार्दूलविक्रीडितछन्दसि–प्रथमे पादे** द्वादशाक्षरे—विख्यातो गुणशालिनां स्फुटयशाः, विद्याभिः परिमण्डिता कृतिरियम्, शास्त्राणामयमेक एव निकषः । सप्ताक्षरे— धर्मप्रधानो भृशम्, संरक्तचित्तो जनः ।

**द्वितीयपादे** द्वादशाक्षरे—चन्द्राकारमुखप्रकाशसुभगः, दुर्वारारिघटाविघाटनपटुः, संसेव्यः सततं महाकविजनैः, लोकानामुपकारकः प्रतिदिनम् । पुनः सप्ताक्षरे— पापैरयं वर्जितः, प्रज्ञावतामग्रणीः, दानेन कर्णोपमः, नित्यं गुणैः संयुतः, पुण्यैरयं सुन्दरः ।

**तृतीयपादे** द्वादशाक्षरे—भिन्नं कुन्दसमूहनिर्मलयशाः, कीर्त्योल्लङ्घितसिन्धुनीरनिवहः, प्रज्ञानां गुणसंचितो गुणवताम् । पुनः सप्ताक्षरे—सर्वागमानां गृहम्, विद्याविनोदी स्वयम्, श्रीमान् महासद्गुणः, नीतिप्रधानो जनः, मुख्यात्मनामग्रणीः ।

**चतुर्थपादे** द्वादशाक्षरे — तर्के तर्कविशुद्धबुद्धिविभवः, लोकानां हितकारको मतिचयैः, प्रेयान् सर्वजनस्य निर्मलतया, शान्त्या निर्जितमानशत्रुनिवहः । पुनः सप्ताक्षरे—सेतुर्भवाम्भोनिधेः, वादित्रतानार्चितः, विद्यामयो राजते ।

**[ इति ] शार्दूलविक्रीडितम् ॥**

एवं निखिलानि छन्दांसि सम्यगव(भि)ज्ञाय संचारिणीक्रमो विज्ञेयः ॥

**श्वेताः**—
आसार-वीर-रजतामृत-कास-हास—
ज्योत्स्ना-यशः-पलित-भूति-करम्भ-वीच्यः ।
कर्पूर चन्दन पिच( ? का )ण्ड-तुषार—गङ्गा—
निर्मोक-निर्झर-पयोदधि-शर्कराश्च ॥४७॥

डिण्डीर-हंस-नवनीत-कपाल-कम्बु—
च्छत्रोज्ज्वलाम्बुज-मृणाल-चकोर—लताः ।
मुक्तास्थि-पुष्प-सिकता-कण-शीकारान्धः—
स्वेदाम्बु-शारदघनाश्म-रवीन्दुकान्ताः ॥४८॥

प्रासाद-सौध-गजदन्त-हराद्रि-रम्भा-
कक्कोल-रोध्रतरु-केतकि-पारिजाताः ।
शेषेश-चन्द्र-बलदेव-सुरेभ-वाणी—
कवल्य-धर्म-वृष-नारद-वासवाश्च ॥४९॥

**इति श्वेताः ।**

**कृष्णाः**—
पापाम्बरागुरु-तमो-विष-कज्जलाब्धि—
दानाभ्र-शाड्वल-सुरा-मृगनाभि-पङ्काः ।
श्यामार्कजा-बहुल-दुर्दिन-धूम-दूर्वा-
श्रीकण्ठ-केकि-गल-सीरि-पटेक्षुपङ्काः ॥५०॥

शस्त्र-प्रियङ्गु-तिल-सवल-नीलपद्म—
लोहाश्म-गर्भ-मल-केश-तमाल-तालाः ।
क्रव्यादजो-हरि-यमासुर-सौरि-विन्ध्य-
कालेभ-चर्म-महिकाहि-पिकालि-काकाः ॥५१॥

**इति कृष्णाः ।**

**रक्ताः**— वक्त्र-स्फुलिङ्ग-मणि-विद्रुम-दन्ति-बिन्दु—
सिन्दूर-धातु-जतु-हिङ्गुल-कुङ्कुमानि ।
किङ्किल्लि-किंशुक-कुसुम्भक-बन्धुजीव—
कादम्बरी-कनक-दाडिमपुष्प-गुञ्जाः ॥५२॥

गुञ्जेन्द्रगोप-वटफल-करिबिन्दु-मणि-स्फुलिङ्ग-कुपितदृशः ।
खद्योतविद्रुमाणि च शोणाश्मा बन्धुजीवकुसुमानि ॥५३॥

[इति] **रक्ताः** ।

**वर्तुलानि—वक्राः**— बालेन्दु-किंशुक-हलाङ्कुश-कर्त्तरी-भ्रू-
चापार्द्ध-चन्द्र-गजदन्त-नखाङ्क-कुञ्च्यः ।
मित्राङ्गुलीमयजलाश्वमुखाश्वपुच्छ ( ? )-
गुल्फाङ्घ्रि-सर्पफण-कण्टक-वेदिकेति ॥५४॥

गोपानसी-शकट-वंश-कटाक्ष-दात्र-
कौपीन-चिर्भट-सुखासन-तोरणानि ।
कुद्दाल-सिंहनख-वृश्चिककण्ट-विद्यु—
चञ्चू-परैधित-कराग्र-तडागपाल्यः ॥५५॥

[इति] **वक्राः** ।

**मध्यशून्यवृत्तानि**— पाली-कपर्द-प्रर(रि)खा-नृतिहार-वप्र—
मालोर्मिका-वलय-नूपुर-मेखलाः स्युः ।
व्याकृष्टचाप-मृगजालिक-कर्णपाश—
बाह्यालि-पाणियुग-पाश-करीरकण्ठाः ॥५६॥

[इति] **मध्यशून्यवृत्तानि** ।

**मध्यपूर्णवृत्तानि**— सूर्येन्दु-ताल-सरसी-नद-कम्बु-पर्ण—
छत्र-स्फुरा-पटह-चक्र-वितान-छताः ।
द्वीपालवाल-कमठ-श्रुति-नेत्ररेखा
आदर्श-भाजन-पिधान-कपोलपुण्ड्राः ॥५७॥

[इति] **मध्यपूर्णवृत्तानि** ।

**स्फारवक्रवृत्तानि**— स्थाली-गुहा-चषक-कुण्ड-शराव-पद्म-
घण्टा-कमण्डलु-कटाह-कचोल-कूपाः ।
नाभी-शिरस्त्रमणि-कर्पटि(?)-चक्र-गर्भ—
गेह-प्रणाल-नलिका-शरधि-प्रतोल्यः ॥५८॥

**[इति] स्फारवक्रवृत्तानि ।**

**परिधिवृत्तानि**— कुम्भाण्ड-चूचुक[क]-कम्बु-मृदङ्ग-कण्ठ—
वक्षोज-दूष्य-दधिसार-शिरो-नितम्बाः ।
तुण्डी-चतुःपथ-वयोऽण्डक-गुल्म-गोल—
धम्मिल्ल-कण्टक-तमो-मणिकेभ-कुम्भाः ॥५९॥

**[इति] परा(रि)धिवृत्तानि ।**

**रक्ताः**— तारा-स्फुलिङ्ग-मणि-दाडिम-बीज-गुञ्जा—
मुक्ता-वराट-पिटकालि-सुमेरु-पद्म(द्माः ?) ।
घुण्डी-कणाम्बुलव(?)-पूग-घनाश्म-बाष्प—
स्वेदाङ्गमा(?)-करज-दन्त-तुषारलेशाः ॥६०॥
उल्काग्नि-ताम्र-पवि-विद्युदशोकपर्ण—
मद्य-प्रवाल-रसनाधर-लोचनान्ताः ।
माल्लूर-कुर्कुटशिखा-कपि-कीरतुण्ड-
बालार्क-कासर-चकोरकनेत्र-कुम्भाः ॥६१॥

**इति रक्ताः ॥**

**पीताः**— काश्मीर-वल्क-गरुडाच्युतचीर-हेम—
ब्रह्मार्क-मेरु-कपि-रीति-पराग-कोकाः ।
स्वर्णाब्ज-शालि-कदलीफल-केतकानि
हारिद्र-शङ्करजटा-बल-कर्णिकाराः ॥६२॥

**इति पीताः ।**

स्वर्गापगाः स्वर्णपथा पताकाः
शेषाहि-मुक्ताफल-पुष्पमालाः ।
निर्मोक-पट्ट-प्रमुखाः कवीन्द्रै-
र्योज्याः प्रबन्धे ऋजुलं विसंज्ञाः ॥६३॥

**बलिनः**— अभ्र-गिरि-दातृ-वीराग्नि-ऋषभ-यम-त्रिविष्टपगुणज्ञाः ।
धर्मार्थितत्त्वनिष्ठाः सौधप्रासादभूमिरुहाः ॥६४॥
गिरि-पवन-करटि-भीमादि-कूर्म-वराह-कृष्ण-बलि-शेषाः ।
अश्वत्थामा हनुमान् वाली जमदग्निसूनुश्च ॥६५॥
बलभद्र-कुम्भकर्णौ दाशरथिः विहगराडरुणौ ।
स्कन्दार्जुनसुग्रीवाः केशरि-शरभादयो बलिनः ॥६६॥

**इति बलिनः ।**

**खर्वाः**— अङ्गुष्ठपर्व-दुर्जन-पामर-कृपणार्थि-भीरु-मूर्खाश्च ।
चतुरङ्गपुरुष-वामन-पारपत-दीन-कुब्ज-दुःस्थाद्याः ॥६७॥

**इति खर्वाः ।**

**गम्भीराः**— सागर-मनीषि-मानस-नाभिस्वर-सत्त्व-कूप-हृदय-नदाः ।
वेदार्थ-तर्कविद्या-दैवज्ञादीनि जिनवाचः ॥६८॥

**इति गम्भीराः ।**

**कोमलाः**— शिरीषकुसुम-चूताशोकादिनवीनपत्रपुष्पाणि ।
रम्भामृणालवालोलपाङ्कुराङ्गुलीयपर्वाणि ॥६९॥
बालककेशा दशना ललनातनु-कमलपत्र-नेत्रान्ताः ।
अधरस्तालुरसज्ञा मनुष्यजातेषु सुकुमाराः ॥७०॥

**इति कोमलाः ।**

**कर्कशाः**— दर्भस्थली-कमलनाल-सकोपचित्त-
पित्त-ग्रह-प्रहरणानि रतं च दास्याः ।
जिह्वा गवामुपलपर्वतभूमयश्च
दारिद्र्य-दग्धजन-विग्रह-फेन-गोधाः ॥७१॥
मातङ्ग-धामनी-त्वग्-मौर्वीकिण-कूर्मपृष्ठ-सन्नाहाः ।
कम्बल-सायक-पर्वाण्यपि शाकतैलदलस्य तलदेशः ॥७२॥

**इति कर्कशाः ।**

**श्रुतिसुखदाः**—शुक-पारापत-हंसाः सारस-कुररी-शिखण्डि-परपुष्टाः ।
करि-केसरीन्द्र-नादा रथाङ्ग-सारङ्ग-चाष-दुर्गाश्च ॥७३॥

वीणा-पणव-मृदङ्गा गेयं ललनावचो बुधगिरश्च ।
मधुकृति झङ्कृति मणिनो बालोल्लापाश्च शारिकाम्भौदाः ॥७४॥

इति श्रुतिसुखदाः ।

**श्रुतितिक्तानि**—बक-टिट्टिभ-जम्बुक-कपि-वृकरुत-मार्जार-शुद्रकलहाश्च ।
रासभ-घरट्ट-घूकाभषणोष्ट्ररुतानि कर्णतिक्तानि ॥७५॥

इति श्रुतितिक्तानि ।

**चन्द्रोदयः**— मधुपानं च सुरतं यामिकानां महारवः ।
तस्करा भाः प्रदीपानामौषधिज्वलनं तथा ॥ ७६ ॥

इति चन्द्रोदयः ।

**सूर्योदयः**— प्रबोधकास्ताम्रचूड-शुक-काकादि-पक्षिणः ।
वेणु-वीणा-गेय-वेद-काव्य-शास्त्र-परिश्रमाः ॥ ७७ ॥

आयुधाभ्यसनं चन्द्रतारादीपागमप्रभाः ।
कुमुदानां च संकोचः पङ्कजानां प्रबोधनम् ॥ ७८ ॥

संयोगश्चक्रवाकानां घूकानां च दृगत्ययः ।
प्रभाविकासः प्रालेयं चाच्छटा (?) पल्लवादिषु ॥ ७९ ॥

धेन्वश्च गजसारङ्गाजाविकादिप्रबोधनम् । .
दध्नो विलोडनं वज्रोदकपानं च रोगिणाम् ॥ ८० ॥

ध्वान्तापनोदनं वायुर्महाकाव्यार्थचिन्तनम् ।
जपहोमौ मुनीन्द्राणां शेषाणां देवतार्चनम् ॥ ८१ ॥

इति सूर्योदयः ।

**वनम्**— अनेकवृक्षसंकीर्णमुद्यानं नगराद् बहिः ।
तत्र च पुष्पावचयो जलक्रीडा जलाशये ॥८२ ॥

इति वनम् ।

**विवाहः**— विविधकौतुकाकृष्टललनाव्याकुलं पुरम् ।
कौसुम्भवसनादित्सा रक्तलेखाश्च गोत्रिणाम् ॥ ८३ ॥

परमान्नमोदकादि परिहासकथादिकम् ।
अलुब्धनयनश्चैव नाट्यं वाराङ्गनादिषु ॥ ८४ ॥

इति विवाहः ।

**मृगया**—वागुरिका गुणव्याधाः पलाशाम्बरधारिणः ।
विहङ्गममृगादीनां बाणघातादिवर्णनम् ॥ ८५ ॥

**इति मृगया ।**

**वर्ण्यगुणाः**—संधाहङ्कृतिशौर्यसाहसमहो धीरत्वशक्तिश्रियो
विद्यादानशरण्यवाक्शमकलासत्योचिती(?)भक्तयः ।
न्यायस्थैर्यविवेककीर्तिविनयप्रज्ञाप्रभुत्वादयो
ज्ञालावण्यसुहृद्गभीरग(गु)रुता सौभाग्यशोभोद्यमाः ॥ ८६ ॥

**इति वर्ण्यगुणाः ।**

**वर्ण्याङ्गावयवाः**—मौलिश्रोत्रालिकभ्रूहनुरदकरदृग्जानुनासौष्ठवक्त्रं
स्कन्धग्रीवाभुजोरःस्तनकचनखवाक्गर्भनाभीवपूंषि ।
कक्षारोमांह्रिजङ्घावलिकटिजघनाङ्गुष्ठगुल्याङ्गुलीस्फिग्-
गुह्यक्रोडप्रकोष्ठध्वनिकफणितलं वर्णनीयं क्रमेण ॥ ८७ ॥

**इति वर्ण्याङ्गावयवाः ।**

**वर्णनीयवस्तुसङ्ग्रहः**—पुर-नृप-कुमार-मन्त्र(न्त्रि)-प्रयाण-रण-दूत-जलधि-वन-गिरयः ।
रवि-चन्द्रोदय-परिणय-ऋतु-मधु-जलकेलि-रत-विरहाः ॥ ८८ ॥

**पुरम्**— वप्राट्ट-परिखा-वापी-प्रपा-चैत्य-प्रपालिकाः ।
वेश्या साध्वी पुरे रम्ये प्रतोली तोरणं वनम् ॥८९॥

**नृपः**— शक्तिस्तेजो बलं शस्त्रं न्यायशास्त्रं यशो रणम् ।
जनरागो नृपे दानमरिषड्वर्गसाधनम् ॥९०॥

**कुमारः**— शस्त्रं शास्त्रं यशो न्यासः कवित्वं मित्रखेलनम् ।
सौभाग्यं स्मरचारुत्वं धैर्यं त्यागं नृपाङ्गजे ॥९१॥

**मन्त्री**— जनानुरागता बुद्धिः शास्त्रं शौर्यं च मन्त्रिणि ।
**सेनानी**—सेनानी राजगुणवान् सैन्यन्यासविचक्षणः ॥ ९२ ॥

**देवी**— रूपसौभाग्यलावण्यभक्तिवैदग्ध्यसाधुता ।
सर्वाङ्गवर्णनं देव्यामसूर्यंपश्यता सदा ॥९३॥

**प्रयाणम्**—प्रयाणे भूरिनिश्वा(स्वा)न-भूकम्प-बल-धूलयः ।
पार्ष्णिग्रहश्च नासीरः करभोक्ष-खर-ध्वजाः ॥९४॥

**रणम्**— भूकम्पधूलिचलचारभटामरत्वं
निश्वा(स्वा)नभेरिशरमण्डपकुम्भिमुक्ताः ।
सन्नाहरक्ततटिनीमधुपानभर्तृ-
नामग्रहाम्बरसुरागतयः समीके ॥९५॥

**दूतः**— सर्वदेशसमाचारसर्वभाषाविचक्षणः ।
स्वामिभक्तश्च शूरः स्यात् परिचितोपलक्षणः ॥९६॥

**जलधिः**—द्वीपाद्रि-विष्णु-रत्नोर्मि-पोत-यादो-जगत्प्लवः ।
वार्द्धौ चन्द्रागमः कुल्यासंग ऊर्वोदपूरणम् ॥९७॥

**वनम्**— वने ऋतुद्रुमाः सिन्धु-पल्वल-जीव-पर्वताः ।
मयूर-पिक-चक्राङ्ग-चक्र-सारस-षट्पदाः ॥९८॥

**गिरयः**— शृङ्ग-रोद(ध)-गुहा-रत्न-वन-जीवाध्युपत्ति(त्यु)का ।
शैल-मेघोषधी-धातु-वंश-निर्झर-किन्नराः ॥९९॥

**रव्युदयः**—तारेन्दुदीपकौषधिघूकतमश्चौरकुमुदकुलटार्त्तिः ।
चक्राब्जनेत्रदिनमणिपान्थोदयशोणता सूर्यात् ॥१००॥

**चन्द्रोदयः**—जलधिजल-नेत्र-कैरव-चकोर-चन्द्राश्म-दम्पतीप्रीतिः ।
चक्राब्ज-मान-कुलटा-विरहितमार्त्तिश्च विमलता चन्द्रात् ॥१०१॥

**परिणयः**—स्नानं मातृस्थितिश्वेतभूषामण्डलवर्त्तनम् ।
वेदी सङ्गीतता रक्षा वेदलाजा करग्रहे ॥ १०२ ॥

**वसन्तः**— सुरभौ दोला-कोकिल-मारुत-सूर्यगति-तरुदलोद्भेदाः ।
जातीतरपुष्पचयाम्रमञ्जरीभ्रमरझङ्काराः ॥ १०३ ॥

**ग्रीष्मः**— ग्रीष्मे केसर-मल्ली-ताप-सरःशोष-बहलवात्याश्च ।
सक्तु प्रपा प्रपास्त्री मृगतृष्णाम्रादिफलपाकाः ॥ १०४ ॥

**वर्षा**— वर्षासु घन-शिख-स्मय-हंसगमाः पङ्क-कन्दलोद्भेदाः ।
जाती-कदम्ब-केतक-झञ्झानिल-निम्नगा-प्रीतिः ॥ १०५ ॥

**शरद्**— शरदीन्दुरविपटुत्वं जलाच्छतागतिर्हंसवृषदर्पाः ।
सप्तच्छद-पद्म-सिताभ्रधाम-शिखिपक्षमदहान्यः ॥ १०६ ॥

**हेमन्तः**— हेमन्ते दिनलघुता-शीत-बुभुक्षा-तैल-हिमपातः ।
**शिशिरः**—शिशिरे शिरीषदुर्दिनकुन्दामलकाद्यशिखिरतप्रीतिः ॥ १०७ ॥

लज्जामानच्युतिः प्रेमाधिक्यं रक्तेक्षणभ्रमः ।

**मधुपानम्**—सीधुपानेन वैकल्यं स्खलनं वचने गतौ ॥ १०८ ॥

**जलकेलिः**—जलकेलौ गोत्रस्खलनेर्ष्या-वक्रोक्ति-संभ्रमश्लेषाः ।
पद्मोन्मूलनमज्जनविहगोड्डयनानि जलहतिविवृद्धी ॥ १०९ ॥

**रतम्**— रतेप्रमोदवैयात्यरोमाञ्चालिङ्गनादयः ।

**विरहः**— विकारपाण्डुतौत्सुक्यवैचित्याकल्पतादयः ॥ ११० ॥

**इति महाकाव्ये वर्णनीयवस्तुसंग्रहः ॥**

**महाकाव्यम्**—सर्गबन्धो महाकाव्ये इतिहासः कथाश्रयः ।
स्याद् वृत्तैर्भिन्नवृत्तान्तैः सालङ्कारैः कथागतः ॥ १११ ॥

पुराब्धि-शैलर्तु-शशाङ्क-सूर्योदयाश्च पुष्पावचयोऽम्बुकेलिः ।
कादम्बरीपान-रतोत्सवाश्च स्याद् विप्रलम्भश्च विवाहयुक्तयः ॥ ११२ ॥

कुमारशिक्षा च तथा च मन्त्रो दूतप्रयाणाजिसुरार्चनार्थाः ।
स्वनायकोत्कर्षगुणस्तथान्येऽप्युच्चैर्विशेषाः कविभिः प्रयोज्याः ॥ ११३ ॥

सरित् सरो वनं वापी कूपो वाह्यचतुःपथम् ।
सुरद्वारं पुरश्चण्डी क्षेत्रपालमठस्तथा ॥ ११४ ॥

कपिशीर्षाट्टालमाला यन्त्रायुधसमाकुलः ।
नवद्वारप्रतोलीकः प्राकारः परिखावृतः ॥ ११५ ॥

नृपादिवेश्मविबुधालयनाटकमन्दिरम् ।
शस्त्रं विद्या गृहमठा मातङ्गाश्वसुमन्दिराः ॥ ११६ ॥

ब्राह्मणादिचतुर्वर्णाश्रमो लोकस्थितिः कविः ।
दातृयाचकधर्मज्ञभिषजः सुकलाविदः ॥ ११७ ॥

शुभविद्याप्युपाध्याययोधशस्त्रोपजीविनः ।
पु(प)ण्याङ्गनानटविटगायनाः प्रमदाकुलम् ॥ ११८ ॥

घण्टापथस्वर्णमणिकारवैकटिकादयः ।
सौगन्धिकगान्धिकाश्च वैदेहाः कान्दुकादयः ॥ ११९ ॥

ताम्बूलिको मालिकश्च वास्तुविद्याविशारदः ।
कुविन्दश्छत्रभृत्काचहराश्च स्वैरिणी सती ॥ १२० ॥

कुम्भचर्मच्छत्रचूर्णकारा मृगयुधीवरौ ।
रजकः सूचिकः कल्यपालनापितचित्रकाः ॥ १२१ ॥ षट्पदी ।

## इति नगरवस्तुव्यावर्णनोपायाः ।

**रत्नाकरः**—नालिकेरी च खर्जूरी पूगी-ताल-तमालकाः ।
कौङ्कणद्वीपवेलासु वनमेतत् प्रकीर्तितम् ॥ १२२ ॥

सांयात्रिकाश्च नौवित्ता वेलाकूलोपजीविनः ।
ग्राहकूर्ममहामत्स्यं वराहमकरादयः ॥ १२३ ॥

जलपूर्वाः सर्वसत्त्वाः केसरीभनरादयः ।

महापक्षधराः शैलास्तथा दैत्याश्च शङ्ककाः ।
प्रवालवल्लरीहंसवेत्रगह्वरशुक्तिकाः ॥ १२४ ॥

दैत्यवाडववैकुण्ठनिवासो मौक्तिकाकरः ।
संपत्तिस्थैर्यगाम्भीर्यगुणाम्भोधरवर्द्धनः ॥१२५॥

शरण्यः सर्वदाद्रीणां सरित्-कामुकता तथा ।
चन्द्रालोकनतो वृद्धिर्वर्षासु जलशोषणम् ॥१२६॥

लक्ष्मीन्दुकौस्तुभोच्चःश्रवेन्द्रमातङ्गकालकूटसुराः ।
वेदामृतधन्वन्तरिकल्पद्रुमकामधेनुश्च ॥१२७॥

पाञ्चयज्ञा(जन्या)भिधः शङ्खो रम्भाद्या देवतागणाः ।
चतुर्दशमहारत्नयोनिः शैवलमञ्जरी ॥१२८॥

## इति रत्नाकरः ।

**पर्वतादिः**—तुषारकन्दराधातुतटीगङ्गादवाग्नयः ।
शृङ्गमेघाप्सरःसिद्धविद्याधरवनेचराः ॥१२९॥

रत्नौषधिसरित्क्रौञ्चशिखण्ड्यादिविहंगमाः ।
व्याघ्रचित्रककस्तूरीगन्धेणगवयानिलाः ॥१३०॥

सिंहशार्दूलशरभचामरीशशशूकराः ।
मार्जारमहिषौ खड्गाजगराहिवृकादयः ॥१३१॥

भूर्जरुद्राक्षशरलप्रयालसुरदारवः ।
नमेरुकर्णिकाराद्या द्रुमा ब्रह्मस्थलाम्बुजे ॥१३२॥

कल्पवृक्षादयः सर्वे पर्वतादौ प्रकीर्तिताः ।
सितौ हिमाद्रिकैलासौ शेषाः कृष्णा महीधराः ॥१३३॥
नमेरु-ब्रह्मकमले नान्यत्र तुहिनस्थलात् ।
लवङ्गैलात्वग्मरिचा भोगिवेष्टितचन्दनाः ॥१३४॥
कर्पूरश्चेति वर्ण्याः स्युर्नान्यत्र मलयाचलात् ।
रेवानिर्झरभूर्भद्रजात्युत्पत्तिविधायिनी ॥१३५॥ षट्पदी ।
एवं ज्ञात्वा मुहुः सम्यक् **कविशिक्षां** विचक्षणः ।
ग्रथ्नीयान्नूतनं काव्यं गुरौ विनयवामनः ॥१३६॥

इति विंशतिप्रबन्धकर्तृश्री**विनयचन्द्रा**चार्यसंकलितायां **काव्यशिक्षायां विनयाङ्कायां** प्रथमः शिक्षापरिच्छेदः ॥

---

# २. क्रियानिर्णयपरिच्छेदः ।

काव्यं क्रियाभिर्भवति । ताश्चेमाः—

प्रवर्तते भवत्यास्ते विद्यतेऽस्ति च तिष्ठति ।
वर्त्तते वसति प्रादुराविः-सम्भवति ध्रुवम् ॥१॥

समुत्पद्यते जन्यते जायते भुवि जीवति ।
श्वसिति प्राणिति प्रादुराविष्करोति–कुरुते ॥२॥

रचयते रचत्याशु विधत्ते दधाति पुनः ।
मृज्यते मृजति समुत्पादयति–पादयते ॥३॥

निर्वर्त्तयति राध्नोति साधयत्याशु सिध्यति ।
साध्नोति साध्यति प्रीतिं राध्यत्येते क्रियार्थदाः ॥४॥

प्रसूयते सूयति च सूते सवति पुत्रकम् ।
जनयत्यथ गत्यर्थाः सरतीयर्ति गच्छति ॥५॥
प्रतिष्ठते त्वेत्ययते व्रजत्ययति सर्पति ।
ऋच्छत्यटति चरति क्रामत्यमति मीमति ॥६॥

प्रेङ्खति द्रमति रङ्गति वल्गत्यभ्रति भ्रमति धावति याति ।
भ्राम्यति द्रवति वभ्रति मार्गं शिषतीह च ससर्ति जिहीते ॥७॥

स्रंसते ध्वंसते च ध्वंसते(? ति) वृक्षात् पतत्यधः ।
भृश्यते भ्रश्यति फलं ह्यते ड्डीयते खगः ॥८॥

आचष्टे वक्ति गदति ब्रूते वदति जल्पति ।
रटत्याख्याति कथयत्याह संकीर्तयत्यपि ॥९॥
आभाषते व्याहरत्युदाहरत्युद्गृणाति च ।
वचांसि संकीर्त्तयते रणत्यणति भाषते ॥१०॥

वादयतेऽभिधत्ते [च] ल[प]त्यभिदधाति च ।
वादयत्युच्चरति च जपति क्वणति स्फुटम् ॥११॥

संभाषयत्यालापयति प्रहर्षयति सेवकान् ।
सुखयत्याह्लादयते चन्दत्याह्लादयत्यपि ॥१२॥

नमस्यति स्तुते नौति स्तौत्युपास्ते निषेवते ।
शुश्रूषते शंसतीट्टे भजते वरिवस्यति ॥१३॥
प्रणमत्याराधयति नमत्युपचरत्यपि ।
आश्रयत्याश्रयते [च] वादयत्यभिवन्दते ॥१४॥
कवयत्यर्चत्यृचतीडी(?ड)यते पूजयति मानयति हसति ।
अर्चतेऽर्हति महति यजते वर्णयति यजति पूजयते ॥१५॥
पणायते पनायते पणायति पनायति ।
विकत्थते कीर्तयते श्लाघतेऽञ्चति पूजति ॥१६॥
उपश्लोकयते मानयते वर्णयते तथा ।
अर्हयते महयतेऽर्हयतीडयति स्तवैः ॥१७॥
वितरति ददाति दत्ते सुनोति सुनुतेऽर्पयत्यथार्पयते ।
ददते व्युत्सृजति धनं यच्छत्यर्थिभ्य उत्कृष्टः ॥१८॥
पालयते पालयति दयतेऽवति रक्षति ।
गोपायति गोपयति त्रायते पाति रक्षणे ॥१९॥
नाटयति नटति नृत्यति कायति गायति विकुर्वते किलति ।
क्रीडति दीव्यति कलति [च] खेलति विहरति च खु(खू)र्दते लसति ॥२०॥
तर्कति कङ्कति गग्घति जक्षिति प्रहसति स्मयते कगतीति च ।
तदनु निक्षति चुम्बति रमयत्यहह दुर्ललितः स्मरविक्लवः ॥२१॥
पचते पचति श्राति श्रायति राधयति साधयत्यन्नम् ।
श्रयति स्नपयति [भृज्जति] भृज्यत इह भर्त्स(र्जे)ते पाके ॥२२॥
वल्गते स्नाति भुङ्क्ते च चर्वति स्नाति(?) जीवति ।
खादत्यभ्यवहरति जक्षति [च] सुभोजनम् ॥२३॥
भक्षयत्यादयत्यादयते भक्षयते [तथा] ।
ग्रसते ग्रसत्याहरति गलते [च] गलत्यपि ॥२४॥
वमत्युद्ग(गि)रति छर्दत्युच्छादयति स्रस्यति ।
निष्ठीवते छर्दयते निष्ठीवति निरस्यति ॥२५॥
क्षेवति क्षेवते वान्तौ वेत्ति जानाति बोधति ।
जानीते बोधते शास्त्रमुपलभते बुध्यते ॥२६॥

विचिन्तते विमृशतेऽथाधिगच्छति तर्कते ।
उत्प्रेक्षते संभावयत्यूहते तर्कयत्यपि ॥२७॥

परिविगणयति निरूपयते परि[वि]गणयत इह परामृशति ।
मीमांसते निरूपयति मनोत्यालोचते मनुते ॥२८॥

आलोचयत्युत्पश्यति विचारयति मन्यते ।
आलोचयते [च] विचारयते च स्युर्विचारणे[1] ॥२९॥

चिन्तयत्यध्ययति [च] ध्यायति स्मरति स्मृतौ ।
चिन्तयते भावयते परिभावयतीत्यपि ॥३०॥

रसयते रासयते पिबत्याच(चा)मति ध्रुवम् ।
धयति भू( चू )षति लेढीत्येते पानार्थवाचिनः ॥३१॥

शृणोत्याकर्णयति च निशामयति च श्रुतौ ।
क्रोडचङ्कपालीकुरुते च चितां परिष्वजते ॥३२॥

परिरभते स्पृशति [च] परामृश्यत्याश्लिष्यति ।
आलिङ्गत्युपगूहते स्पर्शे जिघ्रति लिम्पति ॥३३॥

संशेते विशङ्कते भ्रा[म्यति भ्र]मति रेवति(ते) ।
विभ्राम्यति तर्कयति कल्पयति चिकित्सति ॥३४॥

[सं]शेते [परा]मृशत्यान्दोलयते संशयार्थाः ।
विस्फूर्जति स्मरति च प्रस्मरतीति विस्मृतौ ॥३५॥

निश्चिनोति चिनुते नयत्यवधारयति च ।
अवस्यति निश्चयार्थे मारयति मारयते ॥३६॥

मीनीते द्रूणीते क्षणोति क्षुण(क्षणु)ते हिनस्ति संहरति ।
क्षु(क्षि)णुते तृणेढि कर्षति विशसति सूदयति तक्ष्णोति ॥३७॥

द्रूणाति मीनाति कृणाति हन्ति प्रमाथयत्येषति संक्षुणोति ।
विदारयत्यर्दयते क्षिणीते निबर्हति प्लुष्यति तक्ष्णुते च ॥३८॥

प्रोषति प्लोषति श्रोष(ण)ति श्लोष(ण)ति दहत्यपि ।
लुम्पति शुम्भति हन्तावासादयति विन्दति ॥३९॥

---

१. प्रतौ 'आलोचयति विचारयति विचारयते एते स्युर्विचारणे' इति पाठः ।

विन्दते लभते प्राप्नोत्यापद्यते भावयते ।
अधिगच्छत्युपलभते भवते लाभवाचिनः ॥४०॥

प्रेरयत्येलयतीषयते स्थापयति [तथा] ।
वादयत्यापयति हिनोति व्यापारयति च ॥४१॥

आज्ञापयति क्षपते नुदति क्षिप्यति ध्रुवम् ॥
नुदते मयति नियुङ्क्ते योजयति क्षिपति ॥४२॥

प्रेरयति स्थापयते वीरयते वेषयत इहेलयते ।
चोदयते ज्ञापयते व्यापारयते नियोजयते ॥४३॥

छिन्ते छिनत्ति वृश्चति कृन्तत्याखण्डते द्यति च्छुरति ।
त्वक्षति तक्षति तोडति मुण्डति तोडयति तक्ष्णोति ॥४४॥

छेदयति च्छेदयते छ्यत्याखण्डयति च लुनाति ।
तोडयते च लुनीते ह्याखण्डयते तरुं भिल्लः ॥४५॥

कामयतेऽभिलषति काङ्क्षते गृध्यतीच्छति ।
काङ्क्षत्यर्थयते लुभ्यत्याशास्तेऽर्थयतीप्सति ॥४६॥

वाञ्छति द्राङ्क्षति ध्राङ्क्षति स्पृहयति वाञ्छति ।
वरयति गर्वयति वष्टि का(?ता)म्यति गर्वति ॥४७॥

कामयति स्पृहयते त्वरयते च ध्वाङ्क्षति ।
मर्दयते प्रेक्षते च रोचते तृष्यतीप्सिते ॥४८॥

मोक्षत्यर्हयतेऽर्हत्यर्हयत्युज्झा(ज्झ)ति मुञ्चति ।
परिहरत्युत्सृजति व्रजयते [च] व्रजति ॥४९॥

तृणक्ति(त्ति) मुञ्चते मुञ्चति यस्यति [च] मोचति ।
जहाति त्यजति त्यागे कृषते कर्षते महीम् ॥५०॥

विलिखति कृषति प्रतिषिध्यति खेदत्यादिशत्यथाचष्टे ।
वारयति निराकुरुते स्तु(स्त)भ्नोति स्तम्भते निषेधयति ॥५१॥

स्तुभ्नोति स्तुभ्नाति स्तुम्भते निषेधयते स्कुनुते ।
स्कुनोति सेतुं स्कुन(नी)ते स्कुभुना(भ्ना)ति च स्कुनाति पुनः ॥५२॥

स्कुभनो(भ्नो)तीति स्कुम्भेन(र्म)र्षति सहते तितिक्षते मृषति ।
क्षाम्यति मृष्यति मृषयति मर्षयति [च] मृष्यते क्षमते ॥५३॥

मर्षयति(ते) मृषयते सहति क्षान्तिवाचिनः ।
शक्यते शक्यति वाहयत्यपि दुर्वचो वसा ॥५४॥

चर्चयत्यधीतेऽध्येति शिक्षते पठति श्रुतिम् ।
वर्द्धते स्फायते नन्दत्यृध्यते(त्ये)धते प्यायते ॥५५॥

प्रवयते व्याप्रियते व्यापिपर्ति प्रयस्यति ।
घटते चेष्टते चक्षुः स्पन्दते बहुधा स्फुटम् ॥५६॥

खेदयते खेदयति क्लिश्नाति व्यथ[य]ते च मूलयति ।
व्यथयति बुन्दति रुजते मूलयते दुःखयति तुदते ॥५७॥

दुःखयते तापयते पीडयते रुजयति ।
उद्वेजयते दुनोति तापयति पीडयति ॥५८॥

क्लेशयते बाधयते शोषयति बाधयति ।
क्लेशयति महासत्त्वो धूपायति धूपायते ॥५९॥

धुक्षते धिक्षते क्लाम्यत्युद्वेजयति खिन्दति ।
व्यथते बाधते क्लिश्यत्याखिद्यते संतपति ॥६०॥

कुन्थति पुन्थति लुन्थत्यवसीदति दूयते ।
क्लेशति कर्जति क्षन्ते(? ते) खर्जति ग्लायतेतराम् ॥६१॥

स्थीयतेऽसौ तु मुरति मुण्डते गुण्डयत्यपि ।
गुण्डते [च] वेष्टयति कुप्यति स्नायति ध्रुवम् ॥६२॥

वेष्टयते [च] क्षणति चटति स्युः सुचण्डने ।
धुनोति धुनुते कम्पयते ध्वनयते करम् ॥६३॥

धूनयति कम्पयति धुनीते धुनुते तथा ।
धुनाति धुनति स्वाङ्गं विधुनाति विधूनने ॥६४॥

आज्ञां ददाति दत्ते संभजति स्वीकरोति गृह्णाति ।
गृह्णीते संभजते ग्राहयते ग्राहयत्यपि वृणीते ॥६५॥

व्यालोडयति लोडति लोडयते च मन्थति ।
विगाहते च स्वजति मथ्नाति मथति स्वयम् ॥६६॥

कुप्यति क्रुध्यति द्वेष्टि रुष्यति द्रुह्यतीर्ष्यति ।
रोषयति गुरोर्मार्गं रौषे रोषत्यसूयति ॥ ६७ ॥

प्रासंवृणोति वृणुते छादयति छादयते ।
अपिधत्ते-दधाति स्थगयते च स्थगयति ॥ ६८ ॥

प्रोर्णोति प्रोर्णुते धत्ते कुञ्चयते विदायति ।
स्तृणोति स्तृणुते कुञ्चयति स्तृणो(णा)ति कुञ्चति ॥ ६९ ॥

रुन्द्धे रुणद्धि स्तृणीते स्फोटयते दारयते ।
स्फोटयति दारयति भिन्ते भिनत्ति भेदने ॥ ७० ॥

प्रवेपते कम्पते च चलत्येजति कम्पते(ने) ।
शेते निद्रायति सुप्ति(?) स्वपिति स्वापवाचकाः ॥ ७१ ॥

रुण्टति लुण्टति मूषति मोषति मुष्णाति कोजति वस्तूनि ।
चोरयते चोरयति ग्लोचति च म्लोचति स्तेये ॥ ७२ ॥

बिभेत्युद्विजते विद्रवति चैव पलायते ।
त्रस्यत्याशङ्कते विद्रवति धावति नाशने ॥ ७३ ॥

घोणते घूर्णते भ्राम्यति भ्रम्यति च घोणति ।
घूर्णति भ्रमति भ्रामे भूषयति विभूषति ॥ ७४ ॥

भूषयते मण्डयते चावतंसति मण्डति ।
मण्डयत्यलङ्कुरुते—करोति मण्डयत्यपि ॥ ७५ ॥

प्रसाधयति प्रसाधयते भूषार्थवाचिनः ।
भ्राजते भ्रासति भाति भ्रासते च प्रकाशते ॥ ७६ ॥

भासते दीप्यते द्योतते राजति विराजते ।
चकास्ति शोभते शुम्भते शुम्भति च रोचते ॥ ७७ ॥

क्षरति स्रवति श्चोतति सूदति कुञ्चत्यथ ।
पोषयत्युपचिनोत्युपचिनुते च पुष्यति ॥ ७८ ॥

पुष्णात्येते पोषणार्थाः कौति ध्वनति कूजति ।
कवते कुवते रौति क्ष्णौति स्वनति गुञ्जति ॥ ७९ ॥

गुजति [गोजति] रसति लसति नदत्यपि ।
जुगुप्सते[ऽथ] कुत्सति विगर्हयति निन्दति ॥ ८० ॥

गल्हते गर्हते [ चैव ] बीभत्सति च गर्हति ।
कुत्सयते शपते च शप्यत्याक्षिपति क्रुधा ॥ ८१ ॥

शप्यते शपत्याक्रोशत्याक्रोशेऽथ च लज्जते ।
बाला ह्रीच्छति जिह्रेति व्रीडति त्रपते तथा ॥ ८२ ॥

रोदते स्वदते भक्तं स्वादते स्वर्दते तथा ।
तृप्यति ध्रायति प्रीयते प्रीतौ प्रीणयत्यथ ॥ ८३ ॥

धिनोति संबोधयति पृणोति सुखयत्यसौ ।
प्रीणात्याह्लादयत्याह्लादयते [च] स बोधते ॥ ८४ ॥

तृप्नोति तर्पयति च तर्पयते सुखयते ।
आकारयत्याह्वयत आमन्त्रयत्याह्वयति ॥ ८५ ॥

आमन्त्रयते स्निह्यति मेदत ईक्षते च पूषति प्रीत्या ।
तुष्यति माद्यति पुष्यति कर्वति खर्वति च विचिनोति ॥ ८६ ॥

विचिनोत्यवेक्षतेऽसावन्विष्यति मृगयते गवेषयते ।
अन्वेषते च मार्गति मार्गयति चिनोति मार्गयते ॥ ८७ ॥

आलोकयति लोकते विलोकते च पश्यति ।
निभालयति भालयते रूपयति रूपयते ॥ ८८ ॥

गवेषयत्यालोकार्थाः परा-नि-परि-वर्तते ।
व्यावर्तते घोटते च वलति व्याघोटनार्थाः ॥ ८९ ॥

उन्न्युपदिग्धे छुरति [तथा] रिप(? फ)ति लिम्पति ।
उपदेहे विकिरति विक्षेपे विक्षिपत्यपि ॥ ९० ॥

संग्रामयति च जवति च संग्रामयते च संप्रहरति भटः ।
जञ्जति युध्यत्यर्दति [च] युध्यते ताडयत्याशु ॥ ९१ ॥

शक्नोति संगतेर्जन्तुः स्नुह्यते प्रभवत्यलम् ।
तरति प्लवते ज्ञानपोतेन भववारिधिम् ॥ ९२ ॥

कन्दति क्रदति क्रन्दत्याक्रोशति च कुन्दति ।
कुन्दते क्रन्दते कूर्दते शोके[1] .... .... ॥

---

१. अतः परं पद्यरचनाया लोपः ।

रिणक्ति—रिचिर् विरेचने रु० ।

अनुशीलति—शील समाधौ भू० । शीलयति—शील उपधारणे चु० । शिलति—शिल षिल उञ्छे तु० । सिलति तथैव ।

वृंहति—वृहि वृहि वृद्धौ भू० । वृंहयति—पट पुट वृहि दण्ड० चु० । बृंहति— बृहू उद्यमे तु० ।

व्याधते—व्याधृ लोडने भू० । बाधते—बाधृ लोडने भू० ।

विध्यति—व्यध ताडने दि० । विधति—विध विताने[1] [ तु० ] ।

वर्हति—वृह वृद्धौ भू० । वर्हयति – वर्ह हिंसायां तु०(चु०) । निबर्हति—बर्ह भू० ।

गजति— गजशब्दार्थाः । गाजयति—गजमार्जशब्दार्थाः चु० । गर्जति—गर्जशब्दार्थाः । गर्जयति—गर्जशब्दे चु० ।

कणति—कण क्वण शब्दे भू० । क्वणति, कुणति—कुण शब्दोपकरणयोः तु० । कूजति—कूज अव्यक्ते शब्दे भू० ।

तेतिल्यते—तिल स्नेहने तु० । चिक्रीयितः । तिल्लन्ति—तिल्ल गतौ भू० ।

चिल्लन्ति—चिल्ल शैथिल्ये भू० । [चुल्लति]—चुल्ल हावकरणे भू० ।

प्रसूते—षूङ् प्राणि प्र० अ० । प्रसूयते–षूङ् प्राणिप्रसवे दि० । प्रसौति–षु प्रसवे [अ०] । प्रसवति(? पेसति)–पिसृ पेसृ गतौ भू० ।

शास्ति—शासु अनुशिष्टौ [अ०] । आशास्ते—आङ् शासु इ० [अ०] । आशंसते—आशंसि सिद्ध० भू० । शंसति—शंसु स्तुतौ भू० । विशसति—शसु हिं० भू० ।

घिणते – घिणि घुणि ग्र॰ भू० । गृह्णाति— ग्रह उपादाने क्र्या० । गर्हते–गृह्ह गर्हणे भू० । गृहयते—गृह ग्रहणे चु० ।

ददाति—दुदाञ् दाने अ० । दाति दाप् लवने चु० (अ०) । दायति—दैप् शोधने भू० । द्यति—दोऽवखण्डने दि० ।

वेत्ति—विद ज्ञाने [अ०] । विद्यते—विद सेत्ता० दि० । [ विन्ते ] विद विचारणे रु० । विन्दति—विद्लृ लाभे तु०

---

१. प्रतौ 'विध विताने विधति' इति क्रमः ।

उदयते—अय वय० भू० । उदयति—इण गतौ अ० । उदीयते—ई गतौ दि० ।

महति—मह पूजायां भू० । महयति—स एव चु० । महीयते—महीञ् कण्ड्वादौ । मंहते—वहि महि गतौ भू० ।

वृणक्ति—वृजी वर्जने रु० । वृक्ते—वृजी वर्जने अ० । वर्जति वर्जयति वा—वृजी वर्जने चु० ।

संपृणक्ति—पृची संपर्के रु० । संपृक्ते—पृची संपर्के अ० । संपर्चति संपर्चयति [वा]—पृच संयमने चु० ।

नियुक्ते—युजिर् योगे रु० । नियोजति नियोजयति—युज पृच संयमने चु० ।

किरति—कॄ विक्षेपे तु० । करोति—डुकृञ् क० त० । कृणोति—कृञ् विहिंसायां आ० (स्वा०) । कृणाति—कॄञ् हिंसायां क्र्या० ।

तयते—तय गतौ दं० भू० । तायते—तायृ पूजा० भू० । त्रायते—त्रैङ् पा० भू० । स्त्यायते-ष्ट्यै स्त्यै शब्दसंघा० भू० ।

क्षुभ्नाति—क्षुभ संचलने क्र्या० । क्षोभति—क्षुभ संचलने भू० । क्षुभ्यति—क्षुभ संचलने दि० ।

लक्षते लक्षयति—शम लक्ष आलोचने चु० । लक्षयते—स एव ।

तनोति—तनु विस्तारे त० । तानयति—तनु श्रद्धोपतापयोः चु० । वितनति—स एव ।

मुञ्चति—मुचॢ मोक्षणे रु० (तु०) । प्रमोचयति—मुच प्रमोचने चु० । मोक्षयति—मोक्ष असने चु० ।

मार्ष्टि—मृजू शुद्धौ अ० । मार्जयति—मृजू शौचालङ्कारयोः चु० ।

उत्कण्ठते—कठि शौचे भू० । उत्कण्ठति—कठि कृच्छ्रजीवने भू० । उत्कण्ठयति—कठि शोके चु० ।

धृष्णोति—ञिधृषा प्रागल्भ्ये भू० । धर्षति धर्षयति—धृष अवयवे चु० ।

वृत्यते—वृत वर्तने दि० । वर्तयति—वृत वृध भाषार्थादि० चु० । वर्तते—वृत वर्तने अ०(भू०) ।

वर्द्धते—वृध वृद्धौ अ० (भू०) । वर्द्धयति—वृत वृध भाषार्थाः चु० । वर्द्धयति— वर्ध छेदनपूरणयोः चु० ।

लोटयति—पट पुट लुट दं० चु० । लुट्यति—लुट विलोठ(ट)ने दि० । लोटति—लुट विलोटने भू० ।

प्रयच्छति—दाण् दाने भू० । दीदांसते—दा खण्डने भू० । दानयति—दान च बन्धने चु० ।

शीकते—शीकृ सेचने भू० । शीकति शीकयति—चीक शीक आमर्षे चु० ।

खेलति—खेलृ षेलृ क्ष्वेलृ गतौ भू० । सेलति क्ष्वेलति —स एव । खेलायति—खेलाय-धातुः कण्ड्वादौ ।

शुच्यति—शुच्यै चुच्यै अभि० भू० । शोचति—शुच शोके भू० । शुच्यति—ईशुचिर् पूति० दि० ।

कौति—टुक्षु रु कु शब्दे अ० । कवते—कुङ् शब्दे भू० ।

धावति—धावु गति०, सृ गतौ, सर्त्तेर्द्धावः । धान्वति धवि गतौ भू० ।

छदति छादयति—[ छद संव० चु० ]

पतयति—चु० अदन्तः । पतति—शल [ हुल पत्ल गतौ ] भू० । अधिपत्यते—पत ऐश्वर्ये दि० ।

प्रथते—प्रथ प्रख्याने भू० । प्रथयति—पृथुमाचष्टे इन् । प्राथयति—प्रख्याने चु० ।

यतते—यती प्रयत्ने भू० । यातयति—यत निकारोपस्कारयोः चु० । निर्यातयति—[ स एव ]

शपति—शप आक्रोशे भू० । शप्यति—शप० दि० । शपते—रुचपचादित्वादात्मने ।

सज्जति—षस्ज गतौ भू० । परिष्वजते—स्वज परिष्वङ्गे भू० । सजति—षंज सङ्गे भू० ।

मेदते—मिदृ मेदृ मेधाहिंसयोः भू० । मेद्यति—ञिमिदा स्ने० दि० । मेदयति—मिद तिल० चु० । वेदयते—विद संख्याने चु० ।

कुथ्नाति—कुन्थ संक्लेशे क्र्या० । कुन्थति—कुथि पुथि० भू० । कुथ्यति—कुथ पूतिभावे दि० ।

गूरयते—गूर उद्यमे चु० । गूर्यते—गूरी हिंसायां दि० ।

बोधते—बुधिर् बोधने भू० । बोधति—बुध अवगमने भू० । बुध्यते—बुध अवगमने दि० ।

गर्वति—कर्व खर्व गर्व भू० । गर्वयते—गर्व माने चु० । गर्वायते—आयिः ।

त्वरते—ञित्वरा संभ्रमे भू० । तूर्यते—तूरी त्वरण-हिंसन० दि० । त्वरयते—त्वरां करोति इन् ।

अर्चते--अर्च पूजायां भू० । अर्चति—अर्च पूजायां भू० । अर्चयति—इन् ।

अनुमीमति—अम द्रम हम्म मीमृ गतौ भू० । अनुमीयते—माङ् माने दि० अनुमाययते—मी गतौ चु० ।

दयते—दय दान–ग० भू० । दयते—देङ् मेङ् भू० । दीयते—दीङ् क्षये दि० ।

मार्गयति—मार्ग अन्वेषणे चु० । मार्गति—स एव । मृगयते—मृग अन्वेषणे चु० ।

हिनस्ति—तृह हिसि रु० । हिंसति हिंसयति—[ हिसि हिंसायाम् चु० ]

बीभत्सते—बध बन्धने भू० । बध्नाति—बन्ध बन्धने क्र्या० । बन्धयति—बन्धि हिंसायां चु० ।

व्यययति—व्यय वित्तसमुत्सर्गे चु० । व्ययति—व्यय गतौ भू० ।

मुटति—मुट आक्षेपप्रमर्दनयोः तु० । मोटति—मुट प्रमर्दने भू० । मोटयति—मुट संचूर्णने चु० ।

अर्जति—अर्ज षर्ज० भू० । अर्जते—स्वच सृज ईज इञ्ज ऋज गतौ भू० । अर्जयति—अर्ज प्रतियत्ने चु० ।

जिह्रेति—ह्री लज्जायां अ० (जु०) । ह्रीच्छति—ह्रीच्छ लज्जायां भू० । हृणीयते— हृणीञ् कण्ड्वादिभ्यो यः (भू०) ।

कन्दति—कदि क्रदि क्लदि ह्लादने भू० । क्रन्दते—कदि क्रदि वैक्लव्ये भू० । क्रन्दयति--क्रन्द गतौ चु० ।

उल्ललते—लल ईप्सायां भू० । लालयति—लल उपसेवायां चु० ।

लङ्घते—लघि ग० भू० । लङ्घयति--लघि चु० । लङ्घते—लघि शोषणे भू० ।

सीदति—षद्‌लृ विशर० भू० । सादयति—आङः सद पद्यर्थे चु० ।

सीदति—षद्‌लृ० तु० ।

गर्हते—गर्ह ग० भू० । गर्हति—गर्ह विनिन्दने चु० ॥१००॥

प्रापयति—[आ]प्लृ लम्भने चु० । प्रापति—स एव । [आ]प्नोति—[आ]प्लृ व्या० स्वा० ।

गल्भते, गल्भति—गल्भ धाष्ट्र्ये भू० आ० ।

क्लीबते, क्लीब्यति—क्लीबृ अधाष्ट्र्ये भू० दि० । क्लीबायते—[स एव] ।

क्षाम्यति—क्षमूष् स० दि० । क्षमति(ते)—क्षम सहने भू० ।

लोकते—लोकृ दर्शने भू० । लोकयति—लोकृ भाषार्थाः चु० ।

तोलयति—तुल उन्माने चु० । तुलयति—'तुला' शब्दादिन् ।

सृजति—सृज वि० तु० । सृज्यते—सृज विसर्गे दि० ।

क्लिश्नाति—क्लिश विबाधने क्र्या० । क्लिश्यति—क्लिश उपतापे दि० ।

हृष्यति—तुष हृष तुष्टौ दि० । हर्षति—हृषु अलीके भू० ।

मिलति—मिल श्लेषणे तु० । मीलति—मील श्मील० भू० ।

पवते—पुङ् पवने भू० । पुनीते—पुङ् पवने क्र्या० ।

लोचते—लोकृ लोचृ द० भू० । लोचयति—लोचृ भाषार्थाः चु० ।

निन्दति—णिदि कुत्सायां भू० । नेदते—णिद् णेद् कुत्सा० भू० ।

तञ्चति(तनक्ति)—तञ्चू संकोचने रु० ।

तञ्चति—वञ्चु चञ्चु तञ्चु भू० ।

मिमीते—माङ् माने अ० । माति—मा माने अ० । मयते—मेङ् प्र० भू० ।

दुनोति—दुङ् उपतापे स्वा० । दूयते—दूङ् परितापे दि० ।

ध्रुवति—ध्रुव गतिस्थैर्ययोः तु० । ध्रवति—ध्रु स्थैर्ये भू० ।

धारति—धार गतिचातुर्ये भू० । धूर्यते—धूरी गूरी० दि० ।

विलसति—लस श्लेषण० भू० । लासयति—लस शिल्पयोगे चु० यिः ।

गाधते—गाधृ प्रति० भू० । गृध्यति—गृध अभिकां० दि० । गर्द्धयति—चु० ।

स्वदते, स्वादते—षद स्वाद ष्वर्द० भू० । स्वादयति—चु० ।

खिद्यते—खिद दैन्ये दि० । खिन्दति—[खिद परिघाते] तु० । खिन्ते—[खिद दैन्ये] रु० ।

डिपति—डिप क्षेपे तु० । डिप्यति—दि० । डेपयति—चु० ।

त्रुट्यति, त्रुटति—भुण त्रुट० तु० दि० । तुटति—तुट कलहकर्मणि तु० ।

रजति—रञ्ज रागे भू० । रज्यति—रञ्ज रागे दि० । राजते—राजृ दीप्तौ भू० ।

निषेधति—षिधू गत्यां भू० । सेधति—षिधू शास्त्रे भू० । सिध्यति—षिधु संराद्धौ दि० ।

सहते—षह मर्षणे भू० । सहति—चु० । उत्साहयति—स एव ।

द्रियते—दृङ् आदरे तु० । दरति—अरण्यगुणे, दृ भये भू० । दृणाति—दृ विदारणे क्र्या० ।

जोडयति—जुड संचूर्ण-प्रेरणयोः चु० । जुडति—जुड थुड गतौ तु० । जोडति—जुड(?) सम्बन्धे भू० ।

अश्नाति—अश भोजने क्र्या० । अश्नुते—अशू व्याप्तौ स्वा० । असति—अस दीप्त्या० भू० ।

नयते—नय रक्षणे भू० । नयते—णीङ् प्रापणे उभ० । नृणाति—नॄ नये क्र्या० ।

विच्छायति—गुपूवत् । विच्छयति—विच्छरयं गत्यर्थे चु० । विच्छति—स एव ।

राध्नोति—राध साध० स्वा० । रध्यति—रध हिं० दि० । राध्यति—राध साध सं० दि० ।

भ्रंसते—स्रंस भ्रंस अवस्रं० भू० । भ्रश्यति—[भ्रंशु अधःपतने] दि० । भृशायते—यिः ।

शाडते—शाडृ श्ला० भू० । शलते—शल चलने भू० । शलति—शल श्वल आशु० भू० ।

स्तम्भते—ष्टभि स्कभि० भू० । स्तम्नाति—स्तम्भ सौत्रो धातुः क्र्या० । स्तम्नोति—[स्वा०] ।

स्तोभते—स्तुभ स्तम्भे भू० । स्तुभ्नाति—क्र्या० । स्तुभ्नोति—[स्वा० । ]

विष्कम्भते—ष्टभि स्कभि० क्र्या० । विष्कम्नाति—[क्र्या०] ।

श्लिष्यति—श्लिष आलिङ्गने दि० । श्लेषति—उषु श्रिषु श्लिषु० भू० । श्लेषयति—चु० ।

द्रुह्यति—द्रुह जि० दि० । दोहति—तुहिर् दुहिर् अर्दने भू० । दोग्धि—दुह प्रपूरणे अ० ।

पिबति—धेट् पा पाने भू० । पीवति—पीव मीव० भू० । पीयते—पी पाने दि० ।

वक्ति—वच परि अ० । वाचयति—वच सम्भाषणे चु० । वचति—चु० ।

संवादयति—वद सम्भाषणे चु० । संवदते—वद स्थैर्ये भू० । वदति—वद व्य० भू० ।

कृणत्ति—कृती छे० रु० । कीर्त्तयति—कॄत संश० चु० ।

श्लथयति—श्लथ दौर्बल्ये चु० । श्लथते श्लथयते—दि०(चु०) ।

अर्दते—अर्द हिंसायां भू० । अर्दति अर्द गतौ भू० । अर्दयति—चु० ।

भक्षयति—भक्ष अदने चु० । भक्षति—भक्ष भक्ष० भू० । म्लक्षति—[भ्रक्ष म्लक्ष भू० ] ।

हिण्डते—हिडि अनादरे भू० । हिलति—हिल हावक० अ०( तु० ) । अवहेडते—हेडृ अनादरे भू० ।

वण्टति—वट विभाजने भू० । वण्टयति—चु० । वण्टापयति—स एव अदन्तः ।

मूषति—मूष स्तेये भू० । मुष्णाति—मुष स्तेये क्र्या० । मुष्यति—मुष खण्डने दि० ।

वयति—वेङ्(ञ्) तन्तु भू० । व्यूयते—उयी तन्तु भू० । वयते—अय वय भू० ।

खायति—खै स्वदने भू० । खदति—खद हिं० भू० । खादति—खाद भ० भू० ।

वाति वा गति अ० । वायति—पै ओवै शोषणे भू०, वायते वा । [ वृणुते—] वृञ् वरणे दि० (स्वा०) ।

दोलयति—दुल उत्क्षेपे चु० । दोलाय-धातुः कण्ड्वादौ ।

[धू]पायति—तप धूप सं० भू० । धूपयति—[चु०] ।

नेनेक्ति—णिजिर् शौच० अ० ।

मृद्नाति—मृद क्षोदे क्र्या० । [म्रदते]—म्रद मर्दने भू० ।

अर्हति—अर्ह मह पू० भू० । अर्हयति—अर्ह पू० चु० ।

प्राणिति—अन च० अ० । प्राण्यते—अन प्राण० दि० ।

प्रपञ्चते—पच व्यक्तीकरणे भू० । प्रपञ्चयति—पच विस्तारव० चु० ।

[रोदिति]—रुदिर् अश्रुविमोचने अ० । रुदिति अपि ॥

प्रलम्भते विदभ्नोति तथा गर्द्धयते खलः ।
प्रतारयत्यल्पबुद्धिः सदा वञ्चयते जनान् ॥९४॥
नमत्यभ्यस्यति कलां संशीलयति शीलति ।
विस्रंसते विश्वस(सि)ति च प्रत्येति च मद्वचः ॥९५॥
उन्मीलति विकसति च स्फोटति च स्फोटते स्फुटत्याशु ।
उन्मेषत्युन्मिषति प्रबुध्यते जृम्भते पद्मम् ॥९६॥
श्री**वीरपाण्ड्य**क्षितिपालनिर्मितं
**क्रियानिघण्टं** विगणय्य तत्त्वतः ।
कविप्रयोज्याधिकधातुसुन्दरं
तमेव चक्रे स्मृतयेऽहमात्मनः ॥९७॥

गोपायति—गुपू र० भ्वा० । जुगुप्सते—गुप गोपन कु० भ्वा० । गोपयति—गुप पुटेत्यादौ चु० । गुप्यति—गुप व्याकुलत्वे दिवादौ ॥१॥

पृणाति— पॄ पालनपू० क्र्या० । पृणक्ति—पृण प्रीणने रु० । प्रीणाति—प्रीञ् तर्पणे क्र्या० । पृणोति—पृ प्रीतौ स्वा० । प्रीयते—प्रीङ् प्रीतौ दि० । प्रयते—प्रीञ् तर्पणे चु० । प्रीणयति—स एव स्वार्थे हेतुः ॥२॥

प्रियते—पृ[1] व्यायामे [तु०] । पिपर्ति—पॄ पालनपू० अ० । पारयति—पार तीर० । पारयति—पृ पूरणे [चु०] । पूरयति—पूरी आ०(चु०) । पूयते—पूयी विशरणे [भू०] । पूर्यते—पूरी आप्यायने [दि०] ॥३॥

क्षयति—क्षि क्षये भ्वा० । क्षणोति—क्षण हिंसा० [स्वा०] । क्षायति—क्षै जै क्षी क्षये भ्वा० । क्षायते—भ्वा० कर्मकर्तरि । क्षणुते—क्षणु हिंसायां [त०] ॥४॥

मीमांसते—मान पू० भ्वा० । मानयति—मानत पू० चु० । मानति—विकल्पेनन्ताः । मनते [मानयते]—मनु स्तम्भे चु० । मनुते—मनु बोधने तनादौ । मन्यते—मन ज्ञाने दिवादौ ॥५॥

धुनोति—धुञ् कम्पने स्वा० । धुनाति—धूञ् कम्पने क्र्या० । धुवति—धू विधूनने तु० । विधूनयति—धूञ् कम्पने चु० । धूपच् विकल्पेनन्ताः ॥६॥

पुष्णाति—पुष पुष्टौ क्र्या० । पुष्यति पुष पुष्टौ दि० । पूषति—पुष पु० भ्वा० । पोषयति—पुष धारणे चु० । [पूषति]—पूष वृद्धौ भ्वा० ॥७॥

---

१. अत्र 'अदादिः' इति जुहोत्यादेरर्थे प्रयुक्तः, हेमचन्द्राचार्याभिप्रायेण ।

जीर्यति—जॄषु क्लृषु व० दि० । जृणाति—जॄ वयोहानौ [क्र्या०]। जूर्यते—जूरी जूर्णे दि० । जिनाति—ज्या वयो० क्र्या० । जरति—जॄ अभिभवे भ्वा० । जारयति—जॄ वयो० चु० ॥८॥

ग्राथयति—ग्रन्थ बन्धने चु० । वा इन् । ग्रथति—[स एव] । ग्रन्थयति—ग्रन्थ सन्दर्भे चु० । इन् वा । ग्रन्थति—[स एव ] । ग्रथ्नाति—ग्रन्थ सं० क्र्या० । ग्रन्थते—ग्रथि वकि कौ० भू० । तृप्यति—तृप प्रीणने दि० । तृप्नोति—तृप प्रीणने स्वा० । तर्पयति—तृप प्रीणने चु० । इन् वा । तर्पति—[स एव] । ॥९॥

मृष[य]ति—मृष तितिक्षा० चु० । मृषति—(स एव ) । मृष्यति—शक मृष क्ष०(दि०) । मर्षयति—मृष तिति० चु० । यजादिपाठ आत्मने । मर्षति—वा इन् मर्षते ॥१०॥

व्रीणाति—व्री वरणे क्र्या० । वृणीते—वृङ् संभक्तौ क्र्यादि । वृणाति—वॄ वरणे क्र्या० । वरति—वर ईप्सायां भ्वा० । वरयति वा । वृणोति—वृञ् वरणे स्वा० । वरति—वृञ् आवरणे भू० । व्रीयते—व्री वरणे दि० । वारयति—चु० । वरते—वृञ् वरणे भ्वा० ॥११॥

निष्कडति—कड मदे तु० । कलते—कल संख्याने भू० । कालयति—कल बिल डिप चु० । कलयति—कल गतौ चु० ॥१२॥

श्राति—श्रा पाके अ० । श्रायति—श्रै पाके भू० । श्रीणाति—श्रीङ् पाके क्र्या० ॥१३॥

इर्ते—ईर गतौ अ० । इयर्ति- ऋ सृ गतौ अ० । प्रेरति—ई क्षेपे भू० । प्रेरयति—स एव । प्रेलति- इल प्रेरणे वा । प्रेलयति—[स एव ]॥१४॥

स्फुटति—स्फुट विकसने तु० । स्फोटते—स्फुट विकसने भू० । स्फोटति—स्फुटि रु विशरणे भू० । स्फोटयति—चट स्फुट भेदे चु० ॥ १५ ॥

शोभते—द्युत शुभ रुच दीप्तौ भू० । शुभति—शुभ शुम्भ शोभार्थे तु० । शुम्नोति—शुभ शुम्भ० स्वा० । निशुम्नोति—शुंभ भाषणे स्वा० ॥१६॥

धरति—धृञ् धारणे उभय० भ्वा० । धारयति—[ स एव ] । धीयते—धीञ् अनादरे दि० । धियति—धि धारणे तु० । ध्रियते—धृञ् अनवस्थाने तु० ॥ १७ ॥

शेषति—कृष शिष भू० । विशिनष्टि—शिष्लृ विशे० रु० । शेषयति—शिष असर्वोपकरणे चु० । शेषति- -स एव ॥१८॥

वस्ते—वस्‌ आच्छादने अ० । निवासयति—वस स्नेह-छेदापहरणेषु चु० । वासयति—स एव । उपवासयति—[स एव धातुः।] निर्वासयति—स एव धातुः । निवसति—वस आच्छादने भू० ॥१९॥

इच्छति—इषु इच्छायां तु० । अन्वेषते—एष्ट हेष्ट गतौ भू० । प्रेषते—ईष गतिहिंसा० भू० । इष्णाति—इष आभीक्ष्ण्ये क्र्या० । अन्विष्यति—इष गतौ दि० ॥२०॥

शिनोति—शिञ्‌ निशामने स्वा० । निशीशांसते—शानच्‌ तेजने भू० । निश्यति—शो तनूक० दि० । निशणति—वन षण सं. भू० । निशानयति—शान तेजने चु० ॥२१॥

प्रमिणोति – डु मिञ्‌ प्रक्षेपणे स्वा० । मीनाति – मीञ्‌ दूञ्‌ हिं० क्र्या० । प्रमीयते – मीङ्‌ हिंसायां दि० । मयते – मेङ्‌ प्रतिदाने भू० ॥ २२ ॥

आज्ञापयति–ज्ञा अवबोधने भू० ( चु० ) । संज्ञपयति–स एव । उपज्ञपयति–स एव । ज्ञपयति–स०॥ २३ ॥

उद्घट्टते–घट्ट चलने भू० । संघट्टयति-–स० चु० । विघाटयति—घट संघाते चु० । घटते—घट चेष्टायां भू० ॥२४॥

तुडति—तुड तोडने तु० । तोडति—तुड तोडने भू० । तोडयति—तुड तोडने चु० ॥२५॥

कुरति—कुर शब्दे तु० । गुञ्जति—गुज शब्दे तु० । कुनाति—कुङ्‌ शब्दे क्र्या० । क्नूयते—क्नूयी शब्दे भू० ॥ २६ ॥

भावयते—भू प्राप्तावात्मनेपदी चु० । भवते—स एव । भावयति—भू कृप अव कल्पने चु० । आविर्भवति—भू [स]त्ता० भू० ॥ २७ ॥

शुन्धति—शुन्ध शुद्धौ भू० । शुन्धयति—शुन्ध शुद्धौ चु० । शुन्धते—विकल्पेनन्तः । शुध्यति—शुध शौ० दि० ॥ २८ ॥

तापयति—तप दाहे चु० । तपति—तप धूप सं० भू० । वितपति(ते)—'[उ]द्‌-विद्‌भ्यां तपः' आ० । तप्यते—तपसीपः कर्म० [ दि० ] ॥ २९ ॥

अतिरेचयति—रिच वियोजनसंपर्चनयोः । विकल्पेन । छिनत्ति—छिदि सद्धि० रु० । छेदयति—छेद द्वैधी० चु० ॥ ३० ॥

उड्डीयते—डीङ्‌ गतौ दि० । उड्डयते—डीङ्‌ विहाय० भू० ॥ ३१ ॥

ददाति––दुदाञ् डुभृञ् धा० भू० । संधयति––ट्धें पा पाने भू० ॥ ३२ ॥

स्निह्यति––स्निह प्रीतौ दि० । स्नेहयति––स्निह स्नेहने चु० ॥३३॥

आलिङ्गति––उख लिङ्गि० भू० । लिङ्गयति––लिङ्ग विचित्री० चु० ॥ ३४ ॥

घोषति––घुषिरु शब्दे भू० । घोषयति––घुषिरु विशब्दे चु० ॥ ३५ ॥

व्याघोटते––घुट परिवर्तने भू० । व्याघुटति––घुट प्रतिघाते तु० ॥ ३६ ॥

व्याहोडते––होडृ अनादरे भू० । व्याहोडति––हुडृ हूडृ गतौ भू० ॥३७ ॥

श्रन्थते––श्रन्थ शैथिल्ये भू० । श्रथयते––स० [ चु० ] ॥ ३८ ॥

भाजयति––पट पुटेत्यादौ भज भाषार्थाः चु० । संविभजति––भज श्रिञ् सेवायां भू० ॥३९॥

मन्दते––मदि स्तु० भू० । मन्दायते––मन्दाय कण्ड्वा० ॥ ४० ॥

उद्विजते––उद्विजी० तु० । उद्विनक्ति––उद्विजी० रु० ॥ ४१ ॥

क्षिप्यति––क्षिप प्रेर० चु० ( दि० ) । क्षिपति––क्षिप प्रे० तु० ॥ ४२ ॥

क्रीडति––क्रीडृ विहारे भू० । किलति––किल सै(शै)त्यक्रीडनयोः तु० ॥४३॥

चेतति––चिती सं० भू० । चेतयते––चित संवेदने चु० ॥ ४४ ॥

लुभ्यति––लुभ गार्ध्ये दि० । लुभति––लुभ विमोहने तु० ॥ ४५ ॥

भर्जते––भृजी भर्जने भू० । भृज्जति––भ्रस्ज पाके तु० ॥ ४६ ॥

क्षाम्यति च । बृंहिरे बाधति त्यक्षध्वम्––इत्यादि क्रिया अशुद्धाः । स्फायन् वलन् सूत्रबलात् शुद्धाः ।

आसेतिवादिका जह्यादिति असभ्या इत्यादि क्रियापदानि दुष्टानि ।

इत्थं काव्यक्रियां ज्ञात्वा नानाग्रन्थेषु दर्शिताम् ।
काव्यं कुर्वीत मेधावी विनयस्तस्य कार्मणम् ॥ ९८ ॥

इत्याचार्यश्री**विनयचन्द्र**लिखितायां **काव्यशिक्षायां विनयाङ्कायां क्रियानिर्णयो** नाम द्वितीयः परिच्छेदः ॥

# ३. लोककौशल्यपरिच्छेदः ।

लोकव्यवहारकौशल्यात् काव्यम् । तद्यथा–

**एकः**–परमात्मा ।

द्वौ सूर्याचन्द्रमसौ, शब्दार्थौ, लोचने, अश्विनीकुमारौ, भुजौ, नयविनयौ, आचार-विचारौ, शुक्रवारप्रतिपदौ, द्वितियाशशधरौ, मङ्गलार्थे, रविमन्दौ क्रूरार्थे ।

**त्रीणि** भुवनानि । त्रिधा भूमिः–उच्चा, नीचा, समा । त्रयः पुरुषाः–उत्तम-मध्यमाधमभेदैः । त्रयः पुरुषार्थाः– धर्मार्थ-कामाः, पदार्थाः–जीव-धातु-मूलानि ।

शरीरं बहिरात्मास्मदन्तरात्मा तदीश्वरः ।
अशरीरी क्षीणकर्मा परमात्मा निराकृतिः ॥१॥

त्रिविधो दूतः—निसृष्टार्थो विशिष्टार्थः शासनहरश्चेति, वेदाः, अग्नयः, गुणाः–माधुर्य-ओजः-प्रसादाः, रत्नानि–ज्ञान-दर्शन-चारित्ररूपाणि, गुणाः–सत्त्व-रजस्तमोलक्षणा वा, रीतयः—वैदर्भी-गौडी-पाञ्चालीयाः, दण्डाः– मनो-वाक्कायाः, नाड्यः– इडा-पिङ्गला-सुष्मणालक्षणाः, उपसर्गाः, – दैवा मानुषाः पशुभवाः, ध्यान-धे(ध्ये)य-धारणाः, दुर्गाणि – जल-पर्वत-धन्वभेदैः । तिस्रः शक्तयः – प्रभूत्साह-मन्त्रलक्षणाः, उदयाः–गो-भू-हिरण्यलक्षणाः । त्रयो देवाः–ब्रह्माद्याः ।

शब्दानां त्रितयं त्रयी हुतभुजां शक्तित्रयं त्रिस्वरा–
त्रैलोक्यं त्रिपदी त्रिपुष्करमथ त्रिब्रह्म वर्णास्त्रयः ।
यत् किञ्चिज्जगति त्रिधा नियमितं वस्तु त्रिवर्गात्मकं
तत् सर्वं **त्रिपुरेति** नाम भगवत्यन्वेति ते तत्त्वतः ॥२॥

**चत्वारः**—पुरुषार्था धर्माद्याः, वृत्तयो–भारती-सात्त्वकी-कौशिकी–आरभटी—लक्षणाः, कषायाः–क्रोध-मान-माया-लोभैः, ध्यानानि–पिण्डस्थ-पदस्थ–रूपस्थ–रूपातीतानि, आर्त्त–रौद्र–धर्म–शुक्लानि वा । चतस्रो राजविद्याः–आन्वेक्षकी( आन्वीक्षिकी )-त्रयी–वार्ता–दण्डनीतयः, उपायाः—साम-दाम-भेद–दण्डाः । चत्वारो नायकाः धीरोदात्त–धीरललित–धीरोद्धत–धीरप्रशान्ताः । नायको दक्षिणोऽनुकूलो दु(धृ)ष्टः शठश्चेति । सौख्यकरणानि–अभ्यास-अभिमान-संप्रत्यय-विषयकरणानि । चतुर्विधः प्रमोदः–बालसंस्कार-काव्य-प्रज्ञा-तत्त्वनिश्चयैः । बुद्धयः–स्वभावजा[1] औत्पत्तिकी कर्मजा

१. केषाञ्चिन्मते वैनय(यि)की चेति ।

पारिणामिकी चेति । चत्वारोऽभिनयाः—आङ्गिकवाचिक-आहार्य-सात्त्विकभेदैः । चत्वारि मेरुवनानि—भद्रशालादीनि । संज्ञाः—आहारभय-परिग्रह-मैथुनलक्षणाः । विकथाः—स्त्री-भक्त-देश-राजकथाभिः । वर्णाः—द्विजाद्याः । गजाश्च भद्र-मन्द-मृग-संकीर्णाः । दिशः पूर्वाद्याः । चत्वारि वादित्राणि, तद्यथा—

ततं वीणाप्रभृतिकं तालप्रभृतिकं घनम् ।
वंशादिकं तु शुषिरमानद्धं मुरजादिकम् ॥ ३ ॥

[ अभिधानचिन्तामणि, २८६–८७ ]

**पञ्च**—इन्द्रियाणि प्रसिद्धानि । समितयः- ईर्याद्याः । पाण्डित्यम्--वक्तृत्वमागामित्वं शास्त्रसंस्कारजं प्रौढित्वं सारस्वतप्रमाणं चेति । चरितम्—दान-मान-ज्ञान-वीरविलासा धर्माचारप्रख्यापनं चेति । राज्यपालनम्—भूमि-राज्य-प्रजा-धर्म-शरीरपालनैः । उत्सवः--धर्म-द्रव्य-काम-विद्या-मोक्षमहोत्सवैः । शरीराणि—औदारिक-वैक्रिय-आहारक-कार्मण-तैजसानि । पञ्च वक्त्राणि—हरस्य । कामबाणाः—शोषण-तापन-दीपन-मोहन-उन्मादैः । पञ्च बुद्धीन्द्रियाणि--श्रोत्रं त्वक् चक्षुषी जिह्वा घ्राणमिति । पञ्च कर्मेन्द्रियाणि--वाक्-पाणि-पाद-पायूपस्थानि । पञ्चधा व्याकरणम्—सूत्र-आदि-उणादि-परिभाषा-लिङ्गानुशासनलक्षणम् । परिचयः--प्रसादीकृतदर्शनावर्जनेन १, संभाषणेन २, माधुर्यचर्यया ३, सविकारस्तुतिवचनैः ४, कथितोपचारप्रयोजनैश्च ५ । मन्त्रः--कर्मणामारम्भोपायः पुरुषद्रव्यसंपद् विनिपातप्रतीकारः कार्यसिद्धिश्चेति । पञ्चधा पापी—ब्रह्म--स्त्री-भ्रूण-गो--मुनिहत्याभेदात् ।

**षड्विधं** दर्शनम्, तद्यथा—

जैनं बौद्धं तथा सांख्यं मीमांसं च तथा परम् ।
शिवं लोकायितं चेति षडेते दृष्टयो मताः ॥ ४ ॥

द्रव्य-गुण-कर्म-सामान्य-विशेष-समवायलक्षणाः षट् पदार्थाः । प्रमाणानि—प्रत्यक्ष-परोक्ष-अनुमान-शब्द-अर्थापत्ति-आप्तवचनैः । षड् लेश्याः—कृष्ण-नील-कापोत-तेज-पद्म-शुक्लाभिधानैः । षड्विधं भाषालक्षणम्—संस्कृत-प्राकृत-अपभ्रंश-पैशाचिक-मागध-शूरसेनाभिः । षड् जीवनिकायाः—पृथ्वी-अप्-तेजो-वायु-वनस्पति-त्रसभेदैः । [षड्] ऋतवः—वसन्त-ग्रीष्म-वर्षा-शरद्-हेमन्त-शिशिरभेदैः । षड्विधा लक्षणाः, तद्यथा—[१]रूढिलक्षणा यथा--कुशल, द्विरेफ, द्विक इति । (२) प्रयोजनलक्षणा यथा--गङ्गायां घोषोऽत्रापरिमितशैत्यपावनत्वादयो धर्मा व्यङ्ग्याः । (३) उपादानलक्षणा यथा--मञ्चाः क्रोशन्ति ।

(४) लक्षणलक्षणा यथा–कुन्ताः प्रविशन्ति । (५) शुद्धलक्षणा यथा–गौर्वाहीकः । केषाञ्चिन्मते सारोपेति नामा (६) साध्यवसानिका यथा–गौरेवायम् । षट् पुत्राः—

औरसो धर्मपत्नीजस्तत्समः पुत्रिकासुतः ।
क्षेत्रजः क्षेत्रजातश्च स्वगोत्रेणेतरेण वा ॥ ५ ॥

**सप्ताङ्गं** राज्यम्--

स्वामी जनपदोऽमात्यो दुर्गं कोशो बलं सुहृत् ।
परस्परोपकारीदं सप्ताङ्गं राज्यमुच्यते ॥ ६ ॥

सप्तधा कीर्तिः—दान-पुर(ण्य)-विद्वज्जन-वक्तृत्व-काव्य-वर्तन-शौर्यादिभिः । सप्तविधमुत्तमत्वम्—वयोरूपपदज्ञानशीलप्रयोगपर्यन्तं चेति । सप्त नयाः—नैगम-संग्रह-व्यवहार-ऋजुसूत्र-शब्द-समभिरूढ-एवंभूतनामानः । सप्तविधं सौख्यम्—धृता पत्नी, भाण्डपदातिः, मुण्डितं शीर्षमित्यादि । सप्त भुवनानि तद्यथा—

भुवनानि निबध्नीयात् त्रीणि सप्त चतुर्दश इति ।

सप्त वाराः—आदित्याद्याः, समुद्रा वा, ऋषयः—भृगु-अत्रि-अङ्गिरस(स्)-कुत्स-वि(व)शिष्ठ-गौतम-भरद्वाजभेदैः । सप्तविधा प्राप्तिः–'दाने ज्ञाने जले कामे विज्ञाने पात्र-सङ्ग्रहे' सर्वज्ञतेति । सप्त क्षेत्री—चतुर्विधसंघ-चैत्य-बिम्ब-पुस्तकैः । भयानि—इहलोक-परलोकाकस्मिकादीनि । पौर-ज(जा)नपद-योधानामनुग्रहः, गुप्तिरक्षणेष्वप्रमादः, तुला-भाण्डसमानवृत्तिः, उचितप्रवृत्तिः, अनुचितनिवृत्तिः इति सप्त प्रशमनानि ।

**अष्ट** द्वीपाः, समुद्राः, मङ्गलानि–दर्पणादीनि, प्रवचनमातरः, कर्माणि, कुल-पर्वता वा ब्रह्मणोऽष्टौ श्रुतयः । अष्टविधमभिमानलक्षणम्–ज्ञाने दाने धर्मेऽर्थे कामे बले शत्रुघाते समारम्भे । अष्ट स्वर्णगुणाः—विषघात-रसायन-मङ्गलार्थ-विनय-प्रदक्षिणावर्त्त-गुरुका-दग्धकुक्षिः । पयोगुणाः —

सुगन्धि अ(?सु)व्यक्तरसं तृष्णाघ्नं शुचि शीतलम् ।
स्वच्छं [च] लघु हृद्यं च पयसोऽष्टौ गुणाः स्मृताः ॥ ७ ॥

रुद्रमूर्तयः—क्षिति-जल-पवन-हुताशन-यजमान-आकाश-सोम-सूर्याः । अष्टौ नार्योऽगम्याः—स्वगोत्रजा गुरुपत्नी मित्रभार्या वर्णाधिका प्रव्रजिता कुमारी पुत्रवधूः लघुभ्रातृवधूश्चेति । *अष्टौ त्याज्या नराः—मूर्खः शठः क्लीबः निर्घृणः व्यसनी अतिशोभी* गर्वितः निष्ठुरश्चेति । अष्टविधं विदग्धानां सुरतावसानम्–आलिङ्गनं चुम्बनं धावनं केशोद्धरणं रागादिवेशनं सीत्कारादिमुञ्चनं नखस्पर्शनं मृदुकुट्टनं चेति । बुद्धिगुणाः—

शुश्रूषा श्रवणं चैव ग्रहणं धारणं तथा ।
ऊहापोहोऽर्थविज्ञानं तत्त्वज्ञानं च धीगुणाः ॥ ८ ॥

अष्टौ विवाहाः—अलंकृत्य कन्याप्रदानं ब्राह्मो विवाहः १, विभवविनियोगेन कन्याप्रदानं प्राजापत्यः २, गोदानमिथुनदानपूर्वं आर्षः ३, यज्ञार्थं ऋत्विजः कन्याप्रदानमेव दक्षिणा स दैवतः ४, मातृपितृबन्धूनामप्रामाण्यात् परस्परानुरागेण मिथोयोजनायां स गान्धर्वः ५, पणबन्धेन कन्यादानमासुरः ६, प्रसह्य कन्याग्रहणाद् राक्षसः ७, सुप्तप्रमत्तकन्याग्रहणात् पैशाचः ८ इत्यादि ।

**नव** निधयो, गुप्तयो ब्रह्मचर्यस्य, तत्त्वादीनि–जीवाजीवादीनि, ग्रैवेयकविमानानि, जैने विष्णवः प्रतिविष्णवो बलदेवाश्च । नव शयनगुणाः—अनग्नशायी, प्रसारितगात्रः, श्वेतवसनाच्छादनः, अशब्दविशायी, असम्बन्धविशायी, असम्बाधविशायी, संमुखशायी, अहमितशायी, स्मृतदेवगुरुशायी, । नव रसाः शृङ्गाराद्याः, नव नक्षत्रवीथ्य इत्यादि ।

**दशधा** साधुधर्मः–क्षान्त्यादि, विष्णोरवताराः, दिग्पा(क्पा)लाः । दशविधं बलम्–वज्र-काय-बुद्धि सन्तोष-स्थान-सुहृज्जन-शस्त्र-मन्त्र-देवता-राजबलैः । दशविधो जयः—ज्ञान-सत्य-प्रताप-संग्राम-आचार-वाक्-निद्रा-आहार-इन्द्रिय-जयः, अजयश्चेति । दशविधः संग्रहः–ज्ञाने मित्रे पात्रे शौचे प्रवीणयोगे बले यज्ञे धर्मे संग्रहे गुणे चेति । दश दशा इत्यादि ।

**[एकादश]** रुद्राः, एकादश गणधरा वीरस्य, एकादश गणाः— नन्द्याद्याः । अङ्गानि आचारादीनीत्यादि ।

**[द्वादशारं चक्रम्, तद्यथा–]**

अरिर्मित्रमरेर्मित्रं मित्रमित्रमतः परम् ।
तथारिमित्रमित्रं च विजिगीषोः पुरः स्मृताः ॥ ९ ॥
पार्ष्णिग्राहस्ततः पश्चादाक्रन्दस्तदनन्तरम् ।
आसारावनयोश्चैव विजिगीषोश्च पृष्ठतः ॥ १० ॥

मध्यम उदासीनश्च–द्वादशारं चक्रम् । जैने द्वादश चक्रिणो भरताद्याः, तद्यथा–भरतः, सगरो, मघवा, सनत्कुमारः, शान्तिः, कुन्थुः, अरः, सुभूमो, महापद्मो, हरिषेणः, जयनामा, ब्रह्मदत्तेति । सौधर्माद्याः कल्पा द्वादश ।

**त्रयोदश** ताम्बूलगुणाः—

ताम्बूलं कटु-तिक्तमुष्ण-मधुरं क्षारं कषायान्वितं
पित्तघ्नं कृमिनाशनं द्युतिकरं दुर्गन्धनिर्नाशनम् ।

वक्त्रस्याभरणं विशुद्धिकरणं कामाग्निसंदीपनं
ताम्बूलस्य सखे त्रयोदश गुणाः स्वर्गेऽपि ते दुर्लभाः ॥ ११ ॥

**चतुर्दश** भुवनानि, तथा विद्यास्थानानि—शिक्षा-कल्प-व्याकरण-छन्दो-व(वि)चिति-ज्योतिष-निरुक्तानीति षडङ्गानि, चत्वारो वेदाः, इतिहास-पुराण-मीमांसा-न्यायशास्त्रं चेति। गुणस्थानकानि, रज्जवः, पूर्वाणि ।

**पञ्चदश** कर्मभूमयः, तिथयः, सिद्धाश्च ।

**षोडश** देव्यः, चन्द्रकलाः।

**सप्तदशविधः** संयमः ।

**अष्टादश** प्रकृतयः—सूत्रधारु, सुवर्णकारु, लोहकारु, चर्मकार, मालिय, तम्बोलिय, छिपा, सुईय, खात्रिय, सालवी, तेरमा, मोचिय, ओड, गान्छा, वरड, चित्रकार, कुम्भकार, नापित-प्रकृतयः । अष्टादश अधमाः—मातङ्ग, अन्त्यज, कल्यपाल, कोलिक, भिल्ल, बावर, मेय, ताईय, नीजावा, म्लेच्छ, पुलिन्द, अइवाल, नोडा, तुर(रु)ष्क, काबा, पार्वतीय, आहेडिय, शौकरिक, जालिक । अष्टादश लोकप्रसिद्धानि व्रतानि । 'अष्टादशद्वीपनिखातयूपः' [ रघुवंश, ६, ३८ ] । विनोदपात्राणि—मालाकार आप्त हित स्निग्ध मन्त्रि महत्तम अमात्य बुद्धि उभय सुख आग्म्यायिक देश पुरुष मर्ध धन [धान्य] काम विज्ञानं चेति । यथासम्भवं किञ्चिल्लिख्यते—

**द्वाविंशतिः** परीषहाः । **चतुर्विंशतिः** तीर्थकराः । **अष्टाविंशति**र्नक्षत्राणि ।

**द्वात्रिंश**ल्लक्षणानि—

छत्रं पुष्पफलं ध्वजोऽथ कलशः कन्दर्पकूर्माङ्कुशौ
लक्ष्मीः स्वस्तिकतोरणं वरसरः पञ्चाननो मेदिनी ।
अङ्कस्थाल-गजौ नदी रवि-शशी प्रासादमत्स्यौ यवौ
यूपस्तूपकमण्डलौ गिरिवरः सच्चामरे दर्पणम् ॥ १२ ॥
उक्षा पताका कमलाभिषेकः सद्दामकेकी किल पुण्यभाजाम् ।
शारीरके सन्ति सुमानुषाणां द्वात्रिंशदित्थं किल लक्षणानि ॥ १३ ॥

**चतुस्त्रिंश**च्चराः—कार्पटिक-उदास्थित-गृहपति-वैदेहिक-तापस-कितव-किरात-ग्रामटिक-अहितुण्डिक- शौण्डिक-सौभिक-पाटच्चर-विट- विदूषक-पीठकमर्दक-नट-नर्तन-गायन-वादक-जीवक-गणक-शाकुनिक-भिषज्-ऐन्द्रजालिक-नैमित्तिक-सूद-आरालिक-[स्नापक]संवाहक-तीक्ष्ण[द]रसद-मूक-बधिर-अन्धच्छद्मानः स्थायि-यायिभेदेनो(ना)वसर्पवर्गः।

**द्विचत्वारिंशत् प्रबन्धाः—**

स्वरार्तः सुरपूर्वं स्यात् करणं वर्त्तिनी तथा ।
विवर्त्तिनी मातृका स्यादेलाढीकी तु क्रौम्वडः ॥ १४ ॥

लम्भको जयमाला स्याच्चर्या मङ्गल एव च ।
एकताली रासकः स्यादेकचारिण्यतः परम् ॥ १५ ॥

कैवाटो नन्दनामाथ पञ्चतालेश्वराभिधः ।
गद्यं च मङ्गलाचारो मनोरम उदीरितः ॥ १६ ॥

प्रमोदो वर्णसर-कौसर-संदोहकस्तथा ।
सोमकीर्त्तिः प्रबन्धः स्यात् ततो रागकदम्बकः ॥ १७ ॥

आर्या गाथा चच्चरी च वीरश्री शुकसारिका ।
सोमवल्लभसंज्ञः स्यादथ कन्दश्चतुर्मुखः ॥ १८ ॥

प्रतापवर्द्धनाख्यश्च विजयश्चक्रवालकः ।
त्रिभङ्गिविक्रमश्चाथ वाच्यः क्रौञ्चपदस्तथा ॥ १९ ॥

कलहंसोऽथ मन्तव्यो नाम्ना हरिविलासकः ।
प्रबन्धानामिति प्रोक्ताश्चत्वारिंशद्‌द्वयादिका(? धिकाः)॥ २० ॥

[ इति ] प्रबन्धनामानि ।

अथ **षट्त्रिंशत् रागाः** । केषांचिन्मते **द्विचत्वारिंशत्** । तेषां नामानि—

श्रीसोमरागः श्रीरागो मालवश्रीर्वसन्तकः ।
दीपको भैरवस्तोडी पञ्चमश्लोकसाटकः ॥ २१ ॥

वेलाकुली मध्यमादिर्गौडी गुण्डकृतिस्तथा ।
गन्धारसिद्धिर्गान्धारो बङ्गालो गूर्जरी ततः ॥ २२ ॥

वराटी मोटकी रामकृतिः प्रथममञ्जरी ।
धन्यासिका डोम्बकृतिः गौडी देवकृतिस्तथा ॥ २३ ॥

सौराष्ट्री शुद्धनाटा च छाया नाटा च भैरवी ।
अन्धाली द्रविडी देवशाखा वाक्पतिराटिका ॥ २४ ॥

अथ कर्णाट-बङ्गालः कामोदा ललिताम्बरः ।
मल्लार-शाबरी देशः वल्लाता स्तम्भतीर्थिका ॥२५॥

अथ **तालाः**–

तालश्चञ्चत्पुटः पूर्वं ततश्चावपुटाभिधः ।
षट्पिता पुत्रकश्चैव संपक्वेष्टाकनामकः ॥२६॥
उद्घट्टश्चादितालश्च द्वितीयोऽकुडकवकः ।
मट्टश्च प्रतिमट्टश्च कङ्कालः प्रतितालकः ॥२७॥
गारुकिश्चचरी क्रीडा त्रिभङ्गिश्चैकतालिका ।
जयश्री जलतालश्च श्रीरङ्गो रङ्गभूषगः ॥२८॥
पार्वती लोचनः सोमकीर्तिश्च जयमङ्गलः ।
सिंहविक्रीडितः सिंहनन्दनो वीरविक्रमः ॥२९॥
मुकुन्दो मल्लिकामोदः श्रीनन्दन-चतुर्मुखौ ।
प्रतापशेखरः सोमवल्लभो दर्पणो रतिः ॥३०॥
जम्पाभिनन्दो नान्दी च तुरङ्गगति-मन्मथौ ।
गजेन्द्रगति-लक्ष्मीशौ द्विचत्वारिंशदित्यमी ॥३१॥

[इति] तालनामानि ।

**चतुःषष्टिर्योगिन्यः**—वहुडी वाली कविली कुमारी कागी जलहरी सीयली नील-कण्ठ(ण्ठी) पारसी दूनत्री शङ्करा पिङ्गला अनङ्गसीहा दाहूलार श्रीचर्या नन्दा श्रीमङ्गला श्रीसिद्धा श्रीईसार्वा श्रीमकरा अमरा सनसा मनसा विषहरा अलोभी अग्रीव वस्त्रकुमारि(री) धवलकुरुदा भिम्भला सङ्कारिणी जालामालिनी महलछि(छी) दाहना रसा मरसा क्रदला माणिक्या कालिका हरसिद्धि बाइणि(णी) कोसला मयूरती अभकुमारी जया विजया नेता विनेता भेलषी महामाया आशापुरा एकलवीरी ईश्वरी पिप्पला ऊ विंझवासिणि(णी) हिडम्ब शूनरेखा जालिन्धरी स्वसीपर्ली हिवपाडसी हिवपतङ्गी हिमशालिनी हिमेश्वरी महलव ६४ ॥

**पीठ**—अहूठ कोलापुरु उडियाणु जालिन्धरु कामरु अर्बुदु ।

**मातरः** ७—ब्रह्माणी माहेश्वरी कौमारी वैष्णवी वाराही ऐन्द्राणी चामुण्डा ।

**ऋषयः**—मरीच-काश्यप- आत्रेय-भृगु- नारद- गालव- वशिष्ठ- कण्व- जाबालि-विश्वामित्र-कपिष्ठल-पुलस्त्य-पुलह-अगस्त्य-विश्वावसु- पारासरु- गर्ग- शाण्डिल्य- कौण्डिन्य-प्रभृतिलौकिकऋषयः ।

**आदित्याः**—इन्द्र विष्णु विवस्वान् मित्रु(त्र) अंशु धाता त्वष्टा पूषा वरुणु अर्यमा भृगु सविता १२ ।

**अष्टषष्टिर्महातीर्थानि**–प्रभास-ॐकार–अमरेश्वर-विश्वेश्वर-महाकाल-कनखल-कुरुक्षेत्र-मरु-चण्डीश-भस्मगात्रप्रभृतीनि ।

**द्वासप्ततिः कलाः**—गीत वाद्य नृत्य गणित पठित ५ लिखित वक्तृत्व कवित्व कथा वचन १० नाटक व्याकरण छन्दोऽलङ्कार दर्शन १५ ध्यान धातुर्वा(वा)द धर्म अर्थ काम २० वाद बुद्धि शौच [मन्त्र] विचार २५ नेपथ्य विलास नीति शकुन क्रीत ३० चित्र संयोग हस्तलाघव सूत्र कुसुम ३५ इन्द्रजाल सूचिकर्म स्नेह पान आहार ४० [विहार] सौभाग्य प्रयोग गन्ध वास्तु ४५ रत्न पात्र वैद्य देशभाषित देशविजय ५० वाणिज्य आयुध युद्ध समय वर्तन ५५ हस्ति तुरग पुरुष नारी पक्षि ६० भूमि लेप काष्ठ सैन्य वृक्ष ६५ छद्म हस्त उत्तर शरीर प्रत्युत्तर ७० शास्त्र-[लक्षण]कलाश्चेति ७२ ।

**चतुरशीतिः कलाः**, चतुरशीतिर्विज्ञानानि—हेतुविज्ञान तत्त्व मोहन कर्म धर्म ५ लक्ष्मी योग शङ्ख दन्त काल १० गुटिका रसायन वचन कवित्व मन्त्र १५ यन्त्र तन्त्र मर्दन नेपथ्य खत्रकर्म २०इष्ट लेप सूत्र चित्रक रङ्ग २५ सूचिकर्म शकुनकर्म छद्म कर्मकर राग ३० गन्धयुक्ति आगार शैल काच कांस्य ३५ काष्ठ कुम्भ लोह पत्र वंश ४० नख देश तृण प्रासाद धातु ४५ विभूषण स्वरोदय द्यूत अध्यात्म अग्नि ५० विद्वेषण उच्चाटन स्तम्भन मोहन वशीकरण ५५ वस्तु स्वयंभू हस्ति अश्व पक्षि ६० स्त्री चक्र वस्त्र पाशुपाल्य कृषि ६५ वाणिज्य लक्षण काल शस्त्रबन्ध युद्धकरण ७० वियुद्धकरण आखेटक कुतूहल कोशपुष्प ७५ इन्द्रजाल पान अशन शयन विनोद ८० जन रत्न सौभाग्य शौच ८४ इत्यादि। केषाञ्चिन्मते विनय नीति आयुध वाद व्यापार धारणि विज्ञानं चेति ।

**चतुरशीतिर्देशाः**– [**पूर्व०**–] गौड कन्यकुब्ज कोल्लाक कलिङ्ग अङ्ग वङ्ग कुरङ्ग आचाल्य(आराढ्य) कामाक्ष[1], ओण्ड्र[2] पुण्ड्र[3] उडीश(स)[4] मालव[5] लोहित–[पाद];[6] **पश्चिम०**–काछ(कच्छ) वालम्भ सौराष्ट्र कुङ्कण लाट श्रीमाल अर्बुद मेदपाट मरु वरेन्द्र[7] यमुना[8] गङ्गाती(पा)र[9] अन्तर्वेदि[10] मागध[11]; **मध्य०**– कुरु डाहल कामरूप काञ्ची[12] अवन्ती[13]

---

१–४. अमी देशा वस्तुतो मध्यदेशेषु वर्तन्ते ।

५. अयं देशः पश्चिमदेशेषु गण्यते।

६. अस्य देशस्य गणना मध्यदेशेषु क्रियते ।

७–११. अमी देशाः पूर्वदेशेषु वर्तन्ते । 'यमूना' स्थाने 'यामुन' इति प्रयुज्यते ।

१२. अयं देशो दक्षिणापथे स्थितः ।

१३. अस्य देशस्य पश्चिमदेशेषु गणना ।

पापान्तक[14] किरात[15] सो(सौ)वीर[16] औसीर वोकाण[17]; **उत्तरापथ०**— गूर्जर सिन्धु केकाण नेपाल टक्क तुरुष्क ताइकार[18] बर्बर जर्जर[19] कीर काश्मीर हिमालय लोहपुरुष श्रीराष्ट्र; **दक्षिणपथ०**— सिङ्हल चौड कौश(र)ल पाण्डु(ण्ड्य) अन्ध्र विन्ध्य कर्णाट द्रविड श्रीपर्वत विदर्भ धाराउर[20] लाजी[21] तापी[तट] महाराष्ट्र आभीर नर्मदातट दी(द्वी)पदेशाश्चेति[22] ।

[**शतम्**—] श्रीआदिनाथस्य पुत्राणां ।

**अष्टोत्तरशतं व्याधीनाम्,** तद्यथा—स्वरभेद स्वेद कर्णमूल शूल श्वास ज्वर भगन्दर कुष्ट कोष्ट एकाहिक द्व्याहिक त्र्याहिक चातुर्हिक वेलाज्वर नित्यज्वर भूतज्वर दाहज्वर पीनस आमाश्रय दद्रु ग्रहणि(णी) छर्दि तृष्णा भ्रमि मूर्च्छा पाद वल्मीक अन्त्रवृद्धि गृध्रसी पाहणी जृम्भाहिका उपजिह्वा प्रतिजिह्वा नाशा सिराशोणित इन्द्रलुप्तक कामग्रह उन्माद ज्वाला गर्दभा लूता अर्बुद व्याधेयी गजचर्म प्लीहोदर पामा स्फोट वलित महुलि क्लीब्य उप्पीहास पटल नील काच शुक्रार्म विसर्प तिमिरा खस खसर चलन कन्द रुधिरातीसार विकार उसपतिवात आमवात रङ्गिगिवात संवर्तनवात विशूचिका विचर्चिका अपचरिका गलशौण्डिका कक्षा वरालिका कोलेयक तिलपुष्पक वारुणक अपवाहक गण्डोलक अप्पुरक सुण्ट कोसण्ट ग्रीवाग्रह कटीग्रह वालत्रोटप्रभृतयः ।

**षष्टिः सहस्राणि** पुत्राणां सगरचक्रवर्तिनः ।

**अष्टाशीतिः सहस्राणि** वालिखिल्यप्रभृतिमहर्षिणाम् ।

**चतुरशीतिर्लक्षाणि** जीवयोनीनाम् ।

[ इत्येकादिपदार्थगणनाः ]

**समूहवाचकाः शब्दाः—**

राजन्यानां समूहो राजन्यकम् । गणिकानां च गाणिक्यम् । एवमौष्ट्रिकम् । औरभ्रिकम्, आजिकम्, वायसम्, काकम्, भैक्षम्, यौवतम् । जैनानां, संघाज्ञा द्विजानां

---

१४. अयं देशो दक्षिणापथे गण्यते ।

१५–१७. अमी देशाः पश्चिमदेशेषु वर्तन्ते । प्राय औसीरोऽपि तत्रैव ।

१८. अन्यत्र 'तायक' इति 'ताजिक' इति वा प्रयोगो दृश्यते ।

१९. अन्यत्र 'वर्जर' 'वज्रल' 'वजूर' 'वजुर' इति रूपान्तराणि दृश्यन्ते ।

२०–२१ अन्यत्र 'धाराधर' 'कांजी' 'विराट उरल कांजी,' 'धरानंग उरल जीमूत,' 'वैराट धारउर लाज्ज,' 'धारउर लाजी,' 'विराट ओरल' इति बहुविधानि नामान्तराणि प्रयुक्तानि ।

२२. अस्यां गणनायां देशसङ्ख्या पञ्चदशोना दृश्यते ।

स्थानाज्ञा, बौद्धानां तु संज्ञाज्ञा। शैवानां समूहः कविलासः (कैलासः), भट्टानां सउंदसि (सदस्), वणिजां च महाजनः, ताम्बूलिकानां लोकः, सूत्रधाराणां च आघाटः, तुर( रु )-ष्काणां *जमाथ, मलिनानां समूहो बहुसिः, योगिनां च समय इत्यादि ।*

हीरुयाणी--इत्यादि षट्कम् । पत्तनादि द्वादशकम् । मातरादिश्चतुर्विंशतिः । बड्ड इत्यादि षट्त्रिंशत् । भालिज्यादि द्विचत्वारिंशत् । हर्षपुरादि द्विपञ्चाशत् । श्रीनार प्रभृति षट्पञ्चाशत्। जम्बूसरःप्रभृति षष्टिः। पडवाणप्रभृति षट्सप्ततिः। दर्भावती-प्रभृति चतुरशीतिः । पेटलापद्रप्रभृति चतुरुत्तरं शतम् । खदिरालुकाप्रभृति दशोत्तरं शतम् । भोगपुरप्रभृति षोडशोत्तरम् । धवलक्ककप्रभृति पञ्चशतानि । मोहडवासाद्य-मद्र्ध्दाष्टमशतम् । कौङ्कण[ः] चतुर्दशाधिकानि चतुर्दशशतानि । चन्द्रावतीप्रभृति अष्टा-दशशतानि । द्वाविंशतिशतानि महीतटम् । नवसहस्राणि सुराष्ट्रासु । एकविंशति-सहस्राणि लाटदेशः । सप्तति सहस्राणि गूर्ज्जरो देशः पारेतश्च । अहूठलक्षाणि ब्राह्मण-पाटकम् । नव लक्षाणि डाहला । अष्टादशलक्षाणि द्विनवत्यधिकानि मालवो देशः । षट्त्रिंशल्लक्षाणि कान्यकुब्जः । अनन्तमुत्तरापथं दक्ष(क्षि)णापथं चेति । नलकूबरयोः द्यूतपराजये कार्यमनेनेति ।

[ इति समूहवाचकाः शब्दाः ]

## आभानकाः ।

सर्वसाधारि(र)णी गङ्गा न कस्यापि हि पैतृकी ।
उदरस्ते शकटे हन्त किं कर्त्तास्ति गणाधिपः ॥
खलः क्रमान्तदानेऽपि व्याप्नोत्युच्छीर्षकावधिः ।
उदङ्कोऽम्भोधिपोतेऽपि लभते भरणं निजम् ।
दुन्नि न हुन्ति कयाई खल्ली सीमन्तओ चेव ।
क्षते हि क्षारनिक्षेपः ।
दुर्बलायां वृतौ छिद्रं कर्तुं को नाम न क्षमः ।
दैवं दुर्बलघातकम् ।
दग्धस्योपरि पिटकोद्गमः ।
पूर्णे हि शकटे हन्त किं स्यात् पिञ्जानकं गुरुः ।
न पञ्चाशता जीव्यते किन्तु प्रत्याशया ।
किं हस्तिगुडां सहेत रासभः ।
गते हिमालयं वृद्धे किं नु वृष्टिः करिष्यते ।

पाहुणयहत्थेण सप्पमारणं एयम् ।
भग्नो हि कलशो हैमो न तुल्यः कलशान्तरैः
अहिरुच्छीर्षके, वैद्यो विद्यते योजने शते ।
स्वसुः पुष्पाणि बध्यन्ते स्वसुरेव हि सत्यगीः ।
न भाति चरणे बद्धं करभस्य हि नूपुरम् ।
गृहीता बलिभिर्बाढं कूर्दते स्थविरापि यत् ।
ममर्द गर्दभस्यापि स्वार्थे पादौ जनार्दनः ।
किं तेन कुण्डलेनापि येन पुट्यति पालिका ।
सच्चा किं न भवन्ति जे दूरं गया जक्खा ।
चोराणंपि धणं न थिरं हवइ ।
धर्महस्तोऽपि संप्राप्तो न रासभ्यपि जातुचित् ।
यत्र वा तत्र वा यातु कर्पासो हन्त लोड्यते ।
स्निग्धं दृष्ट्वा शिरोऽन्यस्य ताडयेत् स्वं न मुष्टिभिः ।
पश्य पूत्कृत्य फूत्कृत्य मूषकोऽप्यत्ति मानुषम् ।
हट्टान्तरगतमपि वलते कूटनाणकम् ।
नग्नक्षपणकग्रामे रजक[ः] किं करिष्यति ॥

[ इत्याभानकाः। ]

## परिचयाः ।

तर्कपरिचयात् काव्यं, यथा—

यत् प्राप्यं न मनोरथैर्न मनसा स्वप्नेऽपि दृष्टं न यत्
तत्रापि स्मरविप्रलब्धमनसां लोभाभिमानग्रहः ।
मोहोत्प्रेक्षितशुक्तिकारजतवत् प्रायेण यूनां भ्रमं
दत्ते तैमिरिकद्विचन्द्रसदृशं खे नूनमाशाकृषिः ॥ ३२ ॥

व्याकरणपरिचयो यथा—

द्विगुरपि सद्वन्द्वोऽहं गृहे च मे सततमव्ययीभावः ।
तत्पुरुषः कर्मधारयः येनाहं स्यां बहुव्रीहिः ॥ ३३ ॥

भरतपरिचयो यथा—

आतन्वन् सरसां स्वरूपरचनामानन्दिबिन्दूदयं
भावग्राहि शुभप्रवेशकगुणं गम्भीरगर्भस्थिति ।

उच्चैर्वृत्ति सपुष्करव्यतिकरं संसारविष्कम्भकं
भिन्द्याद्वो भरतस्य भाषितमिव ध्वान्तं पयो यामुनम् ॥ ३४ ॥

चाणा(ण)क्यपरिचयो यथा—

स्वामी प्रमोदेन मदेन मन्त्री, कोपेन राष्ट्रं व्यसनेन कोशः ।
छिद्रेण दुर्गं विषमेन सैन्यं, लोभेन मित्रं क्षयमेति राज्ञाम् ॥ ३५ ॥

वात्स्यायनपरिचयो यथा—

अधरे बिन्दुः कण्ठे मणिमाला कुचयुगे शशिप्लुतकम् ।
तव सूचयन्ति सुन्दरि कुसुमायुधशास्त्रपण्डितं रमणम् ॥ ३६ ॥

[ **कुट्टनीमत,** श्लोक ४०३ ]

धनुर्वेदीयः—

सदक्षिणापाङ्गनिविष्टमुष्टिं नतांशमाकुञ्चितसव्यपादम् ।
ददर्श चक्रीकृतचारुचापं प्रहर्तुमभ्युद्यतमात्मयोनिम् ॥ ३७ ॥

[**कुमारसम्भव,** स. ३, श्लोक. ७० ]

उत्पाद्यसंयोगः—

उभौ यदि व्योम्नि पृथक्प्रवाहावाकाशगङ्गापयसः पतेताम् ।
तेनोपमीयेत तमालनीलमामुक्तमुक्तालतमस्य वक्षः ॥ ३८ ॥

[**माघकाव्य,** स. ३, श्लो. ८ ]

भारतपरिचयो यथा—

भगदत्तप्रभावाया कर्णशल्या कूटस्वना ।
सेनेव कुरुराजस्य कुट्टिनी किन्तु निष्कृपा ॥ ३९ ॥

रामायणपरिचयो यथा—

उपशमितमेघनादं प्रज्वलितदशाननं मुदितरामम् ।
रामायणमिव सुभगं दीपदिनं हरतु दुरितं वः ॥ ४० ॥

यथा वा—

जनस्थाने भ्रान्तं कनकमृगतृष्णान्धितधिया
वचो वैदेहीति प्रतिपदमुदश्रु प्रलपितम् ।
कृता लङ्का भर्तुर्वदनपरिपाटीषु घटना
मयाप्तं रामत्वं कुश-लवसुता न त्वधिगताः ॥ ४१ ॥

[ —**अभिनन्दस्य** ]

मोक्षोपायपरिचयो यथा—

निरासङ्गा प्रीतिर्विषयनियमोऽन्तर्न तु बहिः
स्वभावे भावानां क्षययुषि विमर्शः प्रतिदिनम् ।
अयं संक्षेपेण क्षपिततमसामक्षयपदे
तपोदीक्षाक्षेपक्षपणनिरपेक्षः परिकरः ॥ ४२ ॥

आत्मज्ञानपरिचयो यथा—

तर्कः कन्दलकन्द एव कविता मिथ्यावचश्चर्वणं
साहित्यं पुनरेव दुःखपदवी कष्टावहं लक्षणम् ।
विद्यामण्डलमन्त्रतन्त्रविषयाः सर्वे ह्यनर्थप्रदाः
तत्त्वं मूढनिरक्षरं परपदं चेतश्चिरं चिन्तय ॥ ४३ ॥

पृथुशास्त्रकथाकन्थारामन्थेन वृथैव किम् ।
अन्वेष्टव्यं प्रयत्नेन तत्त्वज्ञैर्ज्योतिरान्तरम् ॥ ४४ ॥

[चित्रभारते]

धातुवादपरिचयो यथा—

नखदलितहरिद्राग्रन्थिगौरे शरीरे
स्फुरति विरहजन्मा कोऽप्ययं पाण्डुभावः ।
बलवति सति यस्मिन् सार्द्रमावर्त्य हेम्ना
रजतमिव मृगाक्ष्याः कल्पितान्यङ्गकानि ॥ ४५ ॥

[ **विद्धशालभञ्जिका**, अं. ३, श्लो. १७]

पुरुषलक्षणपरिचयो यथा—

व्यूढोरस्को वृषस्कन्धः शालप्रांशुर्महाभुजः ।
आत्मकर्मक्षमं देहं क्षात्रो धर्म इव स्थितः ॥ ४६ ॥

[ **रघुवंश**, स. १, श्लो. १३ ]

द्यूतपरिचयो यथा—

आकाशाग्रचकटित्रके शशिषटी गोले स्फुरत्तारका
पुञ्जी पुञ्जविराजिते सुरसरित्पट्टाङ्कपट्टाङ्किते ।
यावत् खेलति कौतुकात् कमलभूस्त्रैलोक्यलक्ष्म्या समं
तावत् कान्तिचयप्रथा भुवि कथा चूडामणि(णे)र्नन्दतात् ॥ ४७ ॥

चित्रपरिचयो यथा—

अतथ्यान्यपि तथ्यानि दर्शयन्ति विचक्षणाः ।
समे निम्नोन्नतानीव चित्रकर्मविदो जनाः ॥ ४६ ॥

[व्यासस्य]

देशपरिचयो यथा—

भोजैर्भञ्जमभीरुभिर्विलुलितं व्यामीलितं मालवै-
र्मद्रैर्विद्रुतमेव यानमसकृद्वन्ध्रैरधो मागधैः ।
वङ्गानामभिमन्युकङ्कणरवैर्व्राते पुरःसूचिते
मीनैः संकुचितं परस्परधृतैर्नीरन्ध्रमन्ध्रैः स्थितम् ॥४७॥

वृक्षपरिचयो यथा—

जम्बूलिम्बकदम्बनिम्बबकुलैर्लक्षाक्षभल्लातक-
द्राक्षाकिंशुककर्णिकारकदलीजम्बीरकोदुम्बरैः ।
सा सन्तानकबिल्वतिल्वतिलकश्लेष्मातकारग्वधै-
न्यग्रोधार्जुनशातनाशनवनश्यामान् ददर्शाश्रमान् ॥४८॥

वनेचरपरिचयो यथा—

वामस्कन्धनिष्पन्न(षण्ण)शार्ङ्गकुटिलप्रान्तार्पिताधोमुख-
स्यन्दच्छोणितलम्बमानशशकान् पाणिस्खलच्चामरान् ।
ज्यान्तप्रोतकपोतपोतनिपतद्रक्ताक्तभूमितटान्
साऽपश्यत् करिकुम्भभेदजनिताक्रन्दान् पुलिन्दान् पुरः ॥४९॥

[क्षेमेन्द्रस्य । ]

भक्तिपरिचयो यथा—

बाल्यादेव निरर्गलप्रणयिनी भक्तिर्मवानीपतौ
जन्माभ्यासविकासवासितमनःसंवाससंवादिनी ।
प्रायः प्राक्तनकर्मनिर्मितमहामोहप्ररोहापहा
भव्यानां भवभीतिभञ्जनसखी संजायते सन्मतिः ॥५०॥

विवेकपरिचयो यथा—

आशापाशविमुक्तियुक्तममलं सन्तोषमार्गे मनः
सेवायासविवर्जितं विहरणं मायाविहीनं वचः ।

---

१. °कारस्कर° इति पठितव्यम् ।

चण्डीशार्चनमात्मशुद्धिजननी गङ्गेव सत्सङ्गतिः
सोऽयं संतरणे परः परिकरः संसारवारांनिधेः ॥५१॥

प्रशमपरिचयो यथा—

चित्तं वातविकासिपांसुसचिवं रूपं दिनान्तातपं
भोगं दुर्गतगेहबन्धचपलं पुष्पस्मितं यौवनम् ।
स्वप्नं बन्धुसमागमं तनुमपि प्रस्थानपुण्यप्रपां
नित्यं चिन्तयतां भवन्ति न सतां भूयो भवग्रन्थयः ॥५२॥

तथा—

स कोऽपि स्मर्यतां मन्त्रः स देवः कोऽप्युपास्यताम् ।
येन न स्त्रीपिशाचीयं ग्रसते शीलजीवितम् ॥५३॥

संसार तव पर्यन्तपदवी न दवीयसी ।
अन्तरा दुस्तरा न स्युर्यदि रे मदिरेक्षणाः ॥५४॥

हस्तिपरिचयो यथा—

उच्चैः कुम्भः कपिशदशनो बन्धुरस्कन्धसन्धिः
स्निग्धाताम्रद्युतिनखमणिर्लम्बवृत्तोरुहस्तः ।
शूरः सप्तच्छदपरिमलः स्पर्द्धिदानोदकोऽयं
भद्रः सान्द्रद्रुमगिरिसरित्तीरचारी करीन्द्रः ॥५५॥

वैद्यकपरिचयो यथा—

अङ्गं चन्दनपङ्कपङ्कजबिशच्छेदावलीनं मुहु-
स्तापः शाप इवैष शोषणपटुः कम्पः सखीकम्पनः ।
श्वासाः संवृततारहाररुचयः संभिन्नचीनांशुका
जाताः प्रागनिदानवेदनमहारम्भः स तस्याक्षरः ॥५६॥

[ पद्यकादम्बर्याम् । ]

ज्योतिःशास्त्रपरिचयो यथा—

धामालोकयतां कलाः कलयतां छायाः समाचिन्वतां
क्लेशः केवलमङ्गुलीर्गणयतां मौहूर्तिकानामयम् ।
धन्या सा रजनी तदेव सुदिनं पुण्यः स एव क्षणो
यत्राज्ञातचरः प्रियानयनयोः सीमानमेति प्रियः ॥५७॥

[वसुधरस्य । ]

धनुर्वेदपरिचयो यथा—

आर्यस्योच्चभुजौघलाघववती संधानसंबन्धिनी
स्थाणुस्थानकसौष्ठवप्रणयिनी चित्रक्रियालङ्कृतिः ।
निःस्पन्देन मयातिविस्मयमयी सत्यं स्थितप्रत्यया
संहारे खरदूषणत्रिशिरसामेषैव दृष्टा स्थितिः ॥५८॥

[कनकजानक्याम् ।]

गजलक्षणपरिचयो यथा—

कर्णाभ्यर्णविकीर्णचामरमरुद्विस्तीर्णनिःश्वासवान्
शङ्खच्छत्रविराजिराज्यविभवद्वेषी निलीनेक्षणः ।
स्मृत्वा राघवकुञ्जरः प्रियतमामेकाकिनीं कानने
संत्यक्तां चिरमुक्तभोगकवलः क्लेशोष्मणा शुष्यति ॥५९॥

[कनकजानक्याम् ।]

तुरगलक्षणपरिचयो यथा—

आवर्तशोभी पृथुसत्त्वराशिः फेनावदातः पवनोरुवेगः ।
गम्भीरघोषोऽद्रिविमर्दखेदादश्वाकृतिं कर्तुमिवोद्यतोऽब्धिः ॥६०॥

[अमृततरङ्गकाव्ये ।]

छायोपजीवी यथा—

तत्त्वाश्रयस्थितिरियं तव कालकूट !
केनोत्तरोत्तरविशिष्टपदोपदिष्टा ।
प्रागर्णवस्य हृदये वृषलक्ष्मणोऽथ
कण्ठेऽधुना वससि वापि पुनः खलानाम् ॥६१॥

मात्सर्यतीव्रतिमिरावृतदृष्टयो ये
ते कष्ट नाम न खला व्यथयन्ति चेतः ।
मन्ये विमुच्य गलकन्दलमिन्दुमौले–
र्येषां सदा वचसि वल्गति कालकूटः ॥६२॥

पदकोपजीवी यथा—

यथा रन्ध्रं व्योम्नश्चलजलदधूमः स्थगयति
स्फुलिङ्गानां रूपं दधति च यथा कीटमणयः ।

यथा विद्युज्जालोल्लसनपरिपिङ्गाश्च ककुभ-
स्तथा मन्ये लग्नः पथिकतरुखण्डे स्मरदवः ॥६३॥

सरस्यामेतस्यामुदरवलिवीचीविलुलितं
यथा लावण्याम्भो जघनपुलिनोल्लङ्घनपरम् ।
यथा लक्ष्मश्चायं चलनयनमीनव्यतिकर-
स्तथा मन्ये मग्नः प्रकटकुचकुम्भः स्मरगजः ॥६४॥

पादोपजीवी यथा—

गन्तव्यं यदि नाम निश्चितमहो गन्तासि केयं त्वरा
द्वित्राण्येव दिनानि तिष्ठतु भवान् पश्यामि यावन्मुखम् ।
संसारे घटिकाप्रवाहविगलद्धारा समे जीविते
को जानाति पुनस्त्वया सह मम स्याद्वा न वा सङ्गमः ॥६५॥

[अमरुशतक, श्लो० १६२]

हंहो स्निग्धसखे विवेकबहुभिः प्राप्तोऽसि पुण्यैर्मया
गन्तव्यं कतिचिद्दिनानि भवता मत्सकाशात् त्वया[1] ।
त्वत्सङ्गेन करोमि जन्ममरणोच्छेदं गृहीतत्वरः
को जानाति पुनस्त्वया सह मम स्याद्वा न वा सङ्गमः ॥६६॥

सदृशैरक्षरैः—

सदृशैरक्षरैः काव्यं भवेत् कर्णसुखावहम् ।
एकेन मध्यमं प्रोक्तं द्वाभ्यां रम्यं त्रिभिस्तथा ॥६७॥

**व्याख्या**—गतिनिर्जितवृषभः श्रीवृषभः । अन्तरङ्गारिभिरपराजितः श्रीअजितः । उत्तीर्णभवः शम्भवः । पुण्याभिनन्दनः श्रीअभिनन्दनः । कृतसुमतिः सुमतिः । वर्णजितपद्मप्रभः पद्मप्रभः । प्रमाणोपेतपार्श्वः सुपार्श्वः । कान्त्या ह्रेपितचन्द्रप्रभः श्रीचन्द्रप्रभः । विहितविधिः सुविधिः । अनुकम्पितभूतलः शीतलः । सुश्रेयान् श्रीश्रेयान् । जगत्पूज्यो वासुपूज्यः । गुणैर्विमलो विमलः । सम्पदानन्तः श्रीअनन्तः । प्रकटितधर्मो धर्मः । कृतजगत्त्रयशान्तिः शान्तिः । कान्त्या जितदिव्यरत्नकुन्थुः श्रीकुन्थुः । गतारः श्रीअरः । सुरभिश्वासजितमल्लिः श्रीमल्लिः । सुव्रतः सुव्रतः । श्रियां नाथः श्रीनमिनाथः । कर्म-

१ अत्र 'सकाशात्क्वचित्' इत्यन्यत्र लब्धो पाठः समीचीनः ।

वल्लीवनलवननेमिः श्रीनेमिः । पद्मावतीवैराव्याभ्यां संगीतपार्श्वः पार्श्वः । निहितान्तरङ्गवीरो वीर इति ॥

स्मरहरो हरः । अरुद्रो रुद्रः । कपालशेखरश्चन्द्रशेखरः । कृतजगत्त्रयकालः कण्ठेकालः । सुमूर्तिरष्टमूर्तिः ॥

कृतदैत्यार्दनो जनार्दनः । सुपाणिः रथाङ्गपाणिः । सत्तमः पुरुषोत्तमः । सेवागतवसुदेवो वासुदेवः ॥

सुरज्येष्ठः सुरज्येष्ठः । विश्वविधाता विधाता । प्रकटितजगद्विधिर्विधिः ॥

वरदा शारदा । शुभकला कमला । हस्तजितपद्मावती पद्मावती । प्रकटितमङ्गला सर्वमङ्गला । नृपचक्रनाभिः श्रीनाभिः । पालितभरतः श्रीभरतः । कृतपरमारो धुन्धुमारः । सत्त्वजलधिचन्द्रो हरिश्चन्द्रः । श्रिया निर्जितवसुदेवो वसुदेवः । अलघुः रघुः । शौर्याभिरामो रामः । महारथो दशरथः । यज्ञप्रकटितसागरः सगरः । शुभधाता मान्धाता । अतुलवीर्यः कार्त्तवीर्यः । यदुचक्रापीडो दत्तपरवधूवैधव्यपीडो गौडः । सूर्यगाम्भीर्यपात्रं परममित्रम् । दानवकुलोत्तंसः कंसः । सबलो बलः । महाराजरुधिरकुलाम्बरैकरोहिणी रोहिणी । रूपप्ररूपितसुरदेवी पट्टदेवी । कृतरतिजया विजया । पुष्पधन्वसेना सेना । गुणवती प्रभावती । प्रकटितार्था सिद्धार्था । कृतमङ्गला सुमङ्गला । धर्मधारिणी धारिणी । कृतभद्रा सुभद्रा । प्रचण्डा चामुण्डा । इत्यादि ॥

पथिकवधूदत्तरागस्तडागः । मुदां पात्री धात्री । महावीरजननी जननी । प्रेमपात्रं कलत्रम् । गङ्गाजलपवित्रः पुत्रः । कृतप्रीतिर्नीतिः । दुर्निवारो मारः । सकलपुरुषरत्नरत्नाकरं नगरम् । रिपुदुर्णिवारः कुठारः । अधर्मकर्मपाकः श्वपाकः । अतुच्छो गच्छः । स्वकुलगगनतरणिर्गणिः । अमितिः समितिः । *असंख्यं संख्यम् । नरककारागाराकारा* दाराः । अस्थैर्यमुखं सुखम् । अमानो मानः । वायुवाजी वाजी । अगजो गजः । कृतपरविपत्तिः पत्तिः । करालः करवालः । परविदारणेष्वकृपणः कृपाणः । पीयूषसारिणी वाणी । लब्धप्रशंसो हंसः ॥

*तथा—पुण्यपाली प्रपाली* । स्तुत्यरूपाः कूपाः । अभिरामा आरामाः । कमलकुवलयदत्तभागास्तडागाः । कुनयफलवल्ली पल्ली । अस्तोकः शोकः । द्रुमद्रोणीधरो भूधरः । स्वार्थविमुखी सखी । गुणगेहं देहम् । तारो हारः । अमृतरचनं वचनम् । खण्डितवृजिनो जिनः । भवाम्भोधेररित्रं चरित्रम् । विभावरीतिमिरतस्करो भास्करः । रजां पात्रं गात्रम् । लोकलोभनो भूषनः । अगांवारिणे शान्तिकारिणे । सत्तमो

गौतमः । शीलभद्रः स्थूलभद्रः । सुबाहुः बाहुः । रणाशकः शकः । कैरलो रलः । क्लिष्टायुष्कस्तुरुष्कः । शुष्कतुष्कस्तुरुष्कः ।

उद्दामद्रविडद्रुमैकपरशुर्लाटाटवीपावको
वल्गद्वङ्गभुजङ्गराजगरुडो गौडाब्धिकुम्भोद्भवः ।
श्रीमद्गूर्जरराजकुञ्जरहरिः कीरान्धकारार्यमा
काम्बोजाम्बुजचन्द्रमा विजयते भोजो दिशां जित्वरः ॥६८॥

चौडः क्रोडं पयोधेर्विशति निवशते रन्ध्रमन्ध्रो गिरीणां
कर्णाटः पट्टबन्धं न भजति भजते गूर्जरो निर्झराणि ।
वेदिर्लेलीयते स्म क्षितितलतिलकः कान्यकुब्जोऽथ कुब्जो
भोजस्तु तन्त्रमात्रप्रसरभरभयव्याकुलो राजलोकः ॥६९॥

कोणे कोङ्कणकः कपाटनिकटे लाटः कलिङ्गोऽङ्गणे
सूरे गूर्जरनूतनो मम पिताप्यत्रार्पितस्थण्डिले ।
इत्थं नाथ विवर्द्धते निशि मिथः प्रत्यर्थिनां प्रस्तरः(?स्वनः)
स्थानान्यत्रभवो निरोधिकलहस्तद्वन्दिशालागृहे ॥७०॥

इत्यादि ॥

कारणमिव कृतयुगस्य, बीजमिव विबुधसर्गस्य, उत्पत्तिद्वीपमिव दर्पस्य, एकागारमिव करुणायाः, प्रतिवेशकमिव पुरुषोत्तमस्य, खनिपर्वतमिव पराक्रमस्य, सर्वविद्यासङ्केतगृहमिव सरस्वत्याः, द्वितीयामृतमथनमिव लक्ष्मीसमुत्थानस्य, बलदर्शनमिव वैदग्ध्यस्य, सर्वस्थानमिव स्थितीनां, सर्वस्वकथनमिव कान्तेः, अपवर्गमिव रूपपरमाणुसर्गस्य, सकलदुश्चरितप्रायश्चित्तमिव राज्यस्य, सर्वस्वबलसन्दोहावस्कन्दमिव कन्दर्पस्य, उपायमिव पुरन्दरदर्शनस्य, तपोवनमिव धर्मस्य, कन्यान्तःपुरमिव कलानां, परमप्रमाणमिव सौभाग्यस्य, राजसर्गसमाप्त्यवभृथस्नानदिवसमिव सर्वप्रजापतीनां, गम्भीरं च प्रसन्नं च त्रासजननं च रमणीयं च कौतुकजननं च पुण्यं च चक्रवर्तिनं **हर्ष**मद्राक्षीत् ।

[**हर्षचरिते** द्वितीयोच्छ्वासे ।]

नहुषः परकलत्राभिलाषी महाभुजङ्ग आसीत् । ययातिराहितब्राह्मणीपाणिग्रहणः पपात नरके । प्र(सु)द्युम्नः स्त्रीमय एवाभवत् । सोमकस्य प्रख्याता जगति जन्तुवधनिर्घृणता । मान्धाता मार्गणस्य व्यसनेन सपुत्रपौत्रो रसातलमगमत्(गात्) । पुरुकुत्सः कुत्सितं कर्म तपस्यन्नपि मेकलकन्यायामकरोत् । कुवलयाश्वो भुजङ्गलोक-

परिग्रहादश्वतरकन्यामपि न परिजहार । सम्वरणोऽमित्रदुहितरि विक्लवतामगात् । दशरथ [1][इष्टरामोन्मादेन मृत्युमवाप । कार्तवीर्यो गोब्राह्मणातिपीडनेन निधनमयासीत् । मरुत्त इष्टबहुसुवर्णकोऽपि देवद्विजबहुमतो न बभूव । शन्तनुरतिव्यसनादेकाकी वियुक्तो वाहिन्या विपिने विललाप । पाण्डुर्वनमध्यगतो मत्स्य इव मदनरसाविष्टः प्राणान्मुमोच । युधिष्ठिरो गुरुभयविषण्णहृदयः समरशिरसि सत्यमुत्सृष्टवान् । इत्थं नास्ति राजत्वमपकलङ्कमृते देवदेवादमुतः सर्वद्विपभुजो **हर्षात्** । ]

[ **हर्षचरिते** तृतीयोच्छ्वासे । ]

[शरद्गगनमिव पिण्डतां नीतम्, कालिन्दीप्रवाहमिव स्तम्भितजलम्, नन्दकजिगीषया कृष्णकोपितं कालियमिव कृपाणतां गतम्, लोकविनाशाय प्रकाशितधारासारम्, प्रलयकालमेघखण्डमिव नभस्तलात् पतितम्, दृश्यमानविकटदन्तमण्डलं हासमिव हिंसायाः, हरिबाहुदण्डमिव कृतदृढमुष्टिग्रहम्, सकलभुवनजीवितापहरणक्षमेण कालकूटेनेव निर्मितम्, कृतान्तकोपानलतप्तेनेवाय]सा घटितम्, अतितीक्ष्णतया पवनस्पर्शेनापि रुषेव क्वणन्तम्, मणिसभाकुट्टिमपतत्प्रतिबिम्बच्छद्मनात्मानमपि द्विधेव पाटयन्तम्, अरिशिरश्छेदलग्नैः कचैरिव किरणैः करालितधारम्, मुहुर्मुहुस्तडिदुन्मेषतरलैः प्रभाचक्रच्छुरितैर्जर्जरितातपम्, खण्डशः छिन्दितमिव दिवसम्, कटाक्षमिव कालरात्रेः, कर्णोत्पलमिव कालस्य, ओकारं क्रोधस्य, अलङ्कारमहङ्कारस्य, कुलमित्रं कोपस्य, दोहदं दर्पस्य, सुसहायं साहसस्य, अमात्यं मृत्योः, आगमनमार्गं लक्ष्म्याः, निर्गमनमार्गं कीर्त्तेः, कृपाणं दृष्ट्वा मुमोद ॥

[ **हर्षचरिते** तृतीयोच्छ्वासे ।]

विद्धि मां नारायणोरःस्थलीलीलाविहारहरिणीम्, पृथुभरतभगीरथादिराजवंशजयपताकाम्, सुभटभुजजयस्तम्भविलासशालभञ्जिकाम्, रणरुधिरतरङ्गिणीतरङ्गक्रीडादोहददुर्ललितराजहंसीम्, सितनृपच्छत्रषण्डशिखण्डिनीम्, अतिनिशितशस्त्रधारावनभ्रमणविभ्रमसिंहीम्, असिधाराजलकमलिनीं श्रियम् अद्राक्षीत्[2] ॥

[**हर्षचरिते** तृतीयोच्छ्वासे ।]

गृहीतहृदया लक्ष्मीरिव लोकगुरोः, स्फुरत्तरलतारका रोहिणीव कलावतः, सर्वजनजननी बुद्धिरिव प्रजापतेः, महाभूभृत्कुलोद्गता गङ्गेव वाहिनीनायकस्य, मानसानुवर्तनचतुरा हंसीव राजहंसस्य, सकललोकार्चितचरणा त्रयीव धर्मस्य, दिवानिशममुक्तपार्श्वस्थिति-

१. अतः परं पत्रे नष्टे **हर्षचरितादुद्धृतम्** ।

२. अयं शब्दो वस्तुतः पूर्वस्मिन् वाक्ये 'स्त्रियम्' इति शब्देन संबद्धः ।

रुन्धतीव महामुनेः, हंसमयीव गतिषु, परपुष्टमयीवालापेषु, चक्रवाकीमयीव पतिप्रेम्णि, प्रावृण्मयीव पयोधरोन्नतौ, मदिरामयीव विलासेषु, निधिमयीवार्थसञ्चयेषु, वसुधारामयीव प्रसाददानेषु, कमलमयीव कोशसङ्ग्रहेषु, कुसुममयीव फलदानेषु, संध्यामयीव वन्द्यत्वे, चन्द्रमयीव निरुष्मत्वे, दर्पणमयीव प्रतिपाणिग्रहणेषु, सामुद्रमयीव परचित्तज्ञानेषु, परमात्ममयीव व्याप्तिषु, स्मृतिमयीव पुण्यवृत्तिषु, मधुमयीव संभाषणेषु, अमृतमयीव तृष्यत्सु, द(वृ)ष्टिमयीव भृत्येषु, निवृ(र्वृ)त्तिमयीव सखीषु, वेतसमयीव गुरुषु, गोत्रवृद्धिरिव विलासानां, प्रायश्चित्तशुद्धिरिव स्त्रीत्वस्य, आज्ञासिद्धिरिव मकरध्वजस्य, व्युत्थानबुद्धिरिव रूपस्य, दिष्टवृद्धिरिव रतेः, मनोरथसिद्धिरिव रामणीयकस्य, दैवसंपत्तिरिव लावण्यस्य, वंशोत्पत्तिरिवानुरागस्य, वरप्राप्तिरिव सौभाग्यस्य, उत्पत्तिभूमिरिव कान्तेः, सर्गसमाप्तिरिव सौन्दर्यस्य, आयतिरिव यौवनस्य, अनभ्रवृष्टिरिव वैदग्ध्यस्य, अयशःप्रमृष्टिरिव लक्ष्म्याः, यशःपुष्टिरिव चारित्रस्य, हृदयशुद्धिरिव धर्मस्य, तुष्टिरिव सौहार्दस्य, रूपपरमाणुसृष्टिरिव प्रजापतेः, शमस्यापि शान्तिरिव, विनयस्यापि विनीतिरिव, आभिजात्यस्याप्यभिजातिरिव, संयमस्यापि संयतिरिव, धैर्यस्य धृतिरिव, [1][विभ्रमस्यापि विश्रान्तिरिव यशोवती नाम महादेवी प्राणानां प्रणयस्य विस्रम्भस्य धर्मस्य सुखस्य च भूमिरभूत् ।

[**हर्षचरिते** चतुर्थोच्छ्वासे ।]

[शनैः शनैश्चास्याः सर्वप्रजापुण्यैरिव परिगृहीता भूयोऽप्यापाण्डुतामङ्गयष्टिर्जगाम । गर्भारम्भेण श्यामायमानचारुचूचुकचूलिकौ चक्रवर्तिनः पातुं मुद्रिताविव पयोधरकलशौ बभार [उरःस्थलेन] । स्तन्यार्थमाननिहिता दुग्धनदीव दीर्घस्निग्धधवला माधुर्यमधत्त दृष्टिः । सकलमङ्गलगणाधिष्ठितगात्रगरिम्णेव गतिरमन्दायत । मन्दं मन्दं सञ्चरन्त्या निर्मल[मणि]कुट्टिमनिमग्नप्रतिबिम्बनिभेन गृहीतपादपल्लवा पूर्वसेवामिवारेभे पृथिव्यस्याः । दिवसमधिशयानायाः शयनीयमपाश्रयपत्रभङ्गपुत्रिकाप्रतिमा विमलकपोलोदरगता प्रसवसमयं प्रतिपालयन्ती लक्ष्मीरिवालक्ष्यत । क्षपासु सौधशिखराग्रगताया गर्भोन्माथमुक्तांशुके स्तनमण्डले संक्रान्तमुडुपतिमण्डलमुपरि गर्भस्य श्वेतातपत्रमिव केनापि धार्यमाणमदृश्यत । सुप्तया वासभवने चित्रभित्तिचामरग्राहिण्योऽपि चामराणि चालयांचक्रुः । स्वप्नेषु करविधृतकमलिनीपलाशपुटसलिलैश्चतुर्भिरपि दिक्करिभिरक्रियताभिषेकः । प्रतिबुध्यमानायाश्च चन्द्रशालिकाशालभञ्जिकापरिजनो[ऽपि] जयशब्दमसकृदजनयत् । परिजनाह्वानेष्वादिशत्यशरीरा वाचो निश्चेरुः । क्रीडायामपि नासहताज्ञाभङ्गम् । अपि च चतुर्णामपि महार्णवानामेकीकृतेनाम्भसा स्नातुं वाञ्छा बभूव । वेला[वन]लतागृहोदरपुलिन-

---

१. अतः परं पत्रे नष्टे **हर्षचरितादुद्धृतानि** पदानि ।

परिसरेषु पर्यटितुं हृदयमभिल]लाष । आत्ययिकेष्वपि कार्येषु सविभ्रमं भ्रूलता चचाल । संनिहितेष्वपि मणिदर्पणेषु मुखमुत्खाते खड्गपट्टे वीक्षितुं व्यसनमासीत् । उत्सारितवीणाः स्त्रीजनविरुद्धा धनुर्ध्वनयः श्रुतावसुखायन्त । पुत्रो जातः ।[1]

[ हर्षचरिते चतुर्थोच्छ्वासे । ]

अत्रान्तरे स्वयमेवानाध्माता अपि तारमधुरं सर्वे शङ्खा विरेसुः । अताडितोऽपि क्षुभितजलनिधिजलध्वनिधीरं जुगुञ्जाभिषेकदुन्दुभिः । अनाहतान्यपि मङ्गलतूर्याणि रेणुः । सर्वभुवनाभयघोषणापटह इव दिगन्तरेषु बभ्राम तूर्यप्रतिशब्दः । विधूतकेसरसटाश्च साटोपं गृहीतहरितदूर्वापल्लवकवलप्रशस्तैर्मुखपटैः समहेषन्त[2] हृष्टा वाजिनः । सलीलमुत्क्षिप्तैर्हस्तपल्लवैर्नृत्यन्त इव श्रवणसुभगं जगर्जुर्गजाः । अचिराच्चक्रायुधमुत्सर्जन्त्या लक्ष्म्या निःश्वास इव ववौ सुरामोदसुरभिर्दिव्यानिलः । यज्वनां मन्दिरेषु प्रदक्षिणशिखाकला[प]कथितकल्याणाः प्रजज्वलुरनिन्धना वैतानवह्नयः । भुवस्तलात्तपनीयशृङ्खलाबन्धबन्धुरकलशीकोशाः समुदगमन्महानिधयः । प्रहतमङ्गलतूर्यप्रतिशब्दनिभेन दिक्षु दिक्पालैरपि प्रमोदादक्रियतेव दिष्टवृद्धिकलकलः । तत्क्षण एव शुक्लवाससो ब्रह्ममुखाः कृतयुगप्रजापतय इव प्रजावृद्धये समुपतस्थिरे द्विजातयः । साक्षाद्धर्म इव शान्त्युदकहस्तस्तस्थौ पुरः पुरोधाः । पुरातन्यः स्थितय इवादृश्यन्तागता बान्धववृद्धाः । प्रलम्बश्मश्रुजालजटिलाननानि बहलमलपङ्ककलङ्ककालकायानि प्रथमप्रणष्टकलिकालस्य बान्धवकुलानीवाकुलान्यधावन्त मुक्तानि बन्धनवृन्दानि[3] । तत्कालापक्रान्तस्याधर्मस्य शिबिरश्रेणय इवालक्ष्यन्त लोकविलुण्ठिता विपणिवीथ्यः । विलसदुन्मुखवामनकवृन्दवेष्टिताः साक्षाज्जातमातृदेवता इव बहुबालकव्याकुला ननृतुर्वृद्धधात्र्यः । प्रावर्तत विगतराजकुलस्थितिरधःकृतप्रतीहारावनिरपनीतवेत्रिवेत्रो निर्दोषान्तःपुरप्रवेशः समस्वामिपरिजनो निर्विशेषबालवृद्धः समानशिष्टाशिष्टजनो दुर्ज्ञानमत्तामत्तप्रविभागस्तुल्यकुलयुवतिवेश्यालापविलासः । प्रनृत्तसकलकटकजनः पुत्रजन्मोत्सवो महान् ।

अपरेद्युरारभ्य सर्वाभ्यो दिग्भ्यः स्त्रीराज्यानीवावर्जितानि, असुरविवराणीवापावृतानि, नारायणावरोधनानीव प्रचलितानि, अप्सरसामिव महीमवतीर्णानि कुलानि, परिजनेन पृथुकरण्डपरिगृहीताः स्नानीयचूर्णावकीर्णाः सुमनसः, स्फटिकशिलाशकलशुक्ल-

---

१. प्रस्तुतप्रसङ्गसूचकानीमानि पदानि ।

२. प्रतौ ‘समयहेषन्त’ इति पाठः ।

३. प्रतौ ‘बन्धनानि बन्दिवृन्दानि’ इति पाठः ।

कर्पूरखण्डपूरिताः पात्रीः, कुङ्कुमवासभाञ्जि भाजनानि च मणिमयानि, सहकारतैल-तिम्यत्तनुखदिरकेसरजालजटिलानि चन्दनधवलपूगफलफालीदन्तुरदन्तशफरुकाणि, गुञ्जन्-मधुकरकुलपीयमानपारिजातपरिमलानि [पाटलानि] पटलकानि च, सिन्दूरपात्राणि च पिष्टातकपात्राणि बाल[ल]तालम्बमानविकटवीटिकांश्च ताम्बूलवृक्षकान्बिभ्राणेनानुगम्य-मानानि चरणविकुट्टनरणितमणिनूपुरमुखरदिग्मुखानि नृत्यन्ति राजकुलमागच्छन्ति समन्तात् सामन्तान्तःपुरसहस्राण्यदृश्यन्त ।

शनैः शनैर्व्यजृम्भत च क्वचिन्नृत्तानुचितचिरन्तनशालीनकुलपुत्रलोकलास्यप्रथित-पार्थिवानुरागः, क्वचिदन्तःस्मितक्षितिपालापेक्षितक्षीबक्षुद्रदासीकृष्यमाणराजवल्लभः, क्वचि-न्मत्तकटककुट्टनीकण्ठलग्नवृद्धार्यसामन्तनृत्तनिर्भरहसितनरपतिः, क्वचित्क्षितिपाक्षिसंज्ञादिष्ट-दुष्टदासेरगीतसूच्यमानसचिवचौर्यरतिप्रपञ्चः, क्वचिन्मदोत्कटकुट्टहारिकापरिष्वज्यमानजरत्-प्रव्रजितजनितजनहासः, क्वचिदन्योन्यस्पर्धोद्धुरविटपेटि(ट)कारब्धवाच्यावाच्यवचनयुद्धः, क्वचिन्नृपाबलाबलात्कारनर्त्यमाननृता(त्या)नभिज्ञान्तःपुरपालभावितभुजिष्यः, सपर्वत इव कुसुमराशिभिः, सधारागृह इव सीधुप्रपाभिः, सनन्दनवन इव पारिजातामोदैः, तुषार-वारिव कर्पूररेणुभिः, साट्टहास इव पटहैः, सामृतमथ[न] इव कलकलैः, सावर्त इव [रासक]मण्डलैः, सरोमाञ्च इव भूषणमणिकिरणैः, सपट्टबन्ध इव चन्दनललाटिकाभिः, सप्रसव इव प्रतिशब्दकैः, सप्ररोह इव प्रसाददानैरुत्सवामोदः ।

स्कन्धावलम्बमानकेसरमालाः काम्बोजवाजिन इवास्कन्दन्ततरलतारका हरिणा इवोड्डीयमानाः सगरसुता इव खनित्रैर्निर्दयैश्चरणाभिघातैर्दारयन्तो भुवमनेकसहस्त्रसंख्या-श्चिक्रीडुर्युवानः ।

[**हर्षचरिते** चतुर्थोच्छ्वासे । ]

**मान्द्यव्यावर्णनकौशल्यं** यथा—

विगतजयशब्दम्, अस्तमिततूर्यनिनादमुपसंहृतसंगीतम्, उत्सारितोत्सवम्, अप्रगीत-चारणम्, अप्रसारितापणपण्यम्, स्थानस्थानेषु पवनचलनकुटिलाभिः कोटिहोमधूम-लेखाभिरुल्लसन्तीभिर्यममहिषविषाणकोटिभिरिवोल्लिख्यमानम्, कृतान्तपाशवागुराभिरिव वेष्टयमानम्, उपरि कालमहिषालङ्कारकालायसकिङ्किणीभिरिव च कटु क्वणन्तीभिर्दिवसम्, वायसमण्डलीभिर्भ्रमन्तीभिरावेद्यमानप्रत्यासन्नाशुभम्, क्वचित्प्रतिशायितस्निग्धबान्धवाराध्य मानबुध्नम्[1], क्वचिद्दीपिकादह्यमानकुलपुत्रकप्रसाद्यमानमातृमण्डलम्, क्वचिन्मुण्डोपहारा-हरणोद्यतद्रविडप्रार्थ्यमानामातृक(मदर्क)म्, क्वचिदान्ध्रोद्ध्रियमाणबाहुवप्रोपयाच्यमान-

१. अन्यत्र '°राध्यमानाहिर्बुध्नम्' इति पाठः ।

चण्डिकम्, अन्यत्र शिरोविधृतविलीयमानगुग्गुलविकलनवसेवकानुनीयमानमहाकालम्, अपरत्र निशितशस्त्रीनिकृत्तात्ममांसहोमप्रसक्ताप्तवर्गम्, अपरत्र प्रकाशनरपतिकुमारकक्रियमाणमहामांसविक्रयप्रक्रमम्, उपहतमिव श्मशानपांशुभिरमङ्गलैरिव परिगृहीतम्, यातुधानैरिव विध्वस्तम्, कलिकालेनेव कवलितम्, पापपटलैरिवाच्छादितम्, अधर्मविक्षेपैरिव लुण्ठितम्, अनित्यताधिकारैरिवाक्रान्तम्, नियतिविलसितैरिवाद्री(त्मी)कृतम्, शून्यमिव सुप्तमिव मूर्च्छितमिव छलित[मिव] मुषितमिव विलक्षितमिव स्कन्धावारमाससाद ।

प्रविशन्नेव च विपणिवर्त्मनि कुतूहलाकुलबहुबालकपरीतमूर्ध्वयष्टिविष्कम्भविततेवामहस्तवर्तिनि भीषणमहिषाधिरूढप्रेतनाथसनाथे चित्रवति पट्टे परलोकव्यतिकरमितरकरकलितेन शरकाण्डेन कथयन्तं यमपटि(ट्टि)कं ददर्श । तेनैव गीयमानं श्लोकमशृणोत्—

मातापितृसहस्राणि पुत्रदारशतानि च ।
युगे युगे व्यतीतानि कस्य ते कस्य वा भवान् ॥ ७१ ॥ इति ।

तेन चाधिकतरमवदीर्यमाणहृदयः क्रमेण राजद्वारं प्रतिषिद्धसकललोकप्रवेशं ययौ । अवतीर्णश्चाभ्यन्तरान्निष्क्रामन्तमप्रसन्नमुखरागमुन्मुक्तमिवेन्द्रियैः **सुषेण**नामानं वैद्यकुमारमद्राक्षीत् । कृतनमस्कारं च तमप्राक्षीत् – 'सुषेण, अस्ति तातस्य विशेषो न वा' इति । सोऽब्रवीत्–'नास्तीदानीं यदि भवेत् कुमारं दृष्ट्वा' इति । मन्दं मन्दं द्वारपालैः प्रणम्यमानश्च दीयमानसर्वस्वम्, पूज्यमानकुलदेवतम्, प्रारब्धामृतचरुक्रियम्, क्रियमाणषडाहुतिहोमम्, हूयमानपृषदाज्यलवलिप्तप्रचलद्दूर्वापल्लवम्, पठ्यमानमहामायूरिकं प्रवर्तमानग्रहशान्ति निवर्तमानभूतरक्षाबलिविधानम्, प्रयतविप्रप्रस्तुतसंहिताजपं जप्यमानरुद्रैकादशीशब्दायमानशिवगृहम्, अतिशुचिनरसंपाद्यमानविरूपाक्षक्षीरकलशसहस्रस्नपनम्, अजिरोपविष्टैश्चानासादितस्वामिदर्शनदूयमानमानसैरभ्यन्तरनिष्पतितनिकटपरिजननिवेद्यमानवार्तैर्वार्तीभूतस्नानभोजनपानशयनैरुज्झितात्मसंस्कारमलिनवेषैर्लिखितैरिव निश्चलैर्नरपतिभिर्नीयमाननक्तंदिवम्, दुःखदीनवदनेन च प्रघणेषु बद्धमण्डलेनोपांशुव्याहृतैः केनचिच्चिकित्सकदोषानुद्घोषयता, केनचिदसाध्यव्याधिलक्षणपदानि पठता, केनचिद्दुःस्वप्नान्यावेदयता, केनचित्पिशाचवार्तां विवृण्वता, केनचित्कार्तान्तिकादेशान् प्रकाशयता, केनचिदुपलिङ्गानि गायता, अन्येनानित्यतां भावयता, संसारं चापवदता, कलिकालविलसितानि च निन्दता, दैवं चोपलभमानेनान्येन धर्माय कुप्यता, अन्येन राजकुलदेवताश्चाधिक्षिपता, अपरेण क्लिष्टकुलपुत्रकभाग्यानि गर्हयता, बाह्यपरिजनेन कथ्यमानपार्थिवावस्थं राजकुलं विवेश ।

बाष्पपयःपरिप्लुतलोचनेन च पितृपरिजनेन वीक्ष्यमाणो विविधौषधद्रव्यद्रवगन्धगर्भमुत्क्वथतां क्काथानां तैलानां सर्पिषां च पच्यमानानां गन्धमाजिघ्रन्नवाप तृतीयं कक्ष्यान्तरम् ।

तत्र चातिस्तिमितशब्दे गृहावग्रहणीग्राहिबहुवेत्रिणि, त्रिगुणतिरस्करिणीतिरोहितसुवीथीपथे, पिहितपक्षद्वारके, परिहृतकवाटपुटरटिते, घटितगवाक्षरक्षितमरुति, दूयमानपरिचारके, चरणताडनस्वनत्सोपानप्रकुपितप्रतीहारे, निभृतसंज्ञानिर्दिश्यमानसकलकर्मणि, नातिनिकटोपविष्टकङ्कटिनि, कोणस्थिताह्वानचकिताचमनवाहिनि, चन्द्रशालिकालीनमूकमौललोके, महा[धि]विधुरबान्धवाङ्गनावर्गगृहीतप्रच्छन्नप्रग्रीवके, संजवनपुञ्जितोद्विग्नपरिजने, प्रविष्टकतिपयप्रणयिनि, गम्भीरज्वरारम्भभीतभिषजि, दुर्मनायमानमन्त्रिणि, मन्दायमानपुरोधसि, सीदत्सुहृदि, विद्राणविपश्चिति, संतप्ताप्तसामन्ते, विचित्तचामरग्राहिणि, दुःखक्षामशिरोरक्षिणि, क्षीयमाणप्रसादवित्तमनोरथसम्पदि, स्वामिभक्तिपरित्यक्ताहारहीयमानबलविकलराजवल्लभभूभृति, क्षितितलपतितसकलरजनीजागरूकराजपुत्रकुमारके, कुलक्रमान(ग)तकुलपुत्रनिवहोह्यमानशुचिशोकसंकुचितकञ्चुकिनि, निरानन्दबन्दिनि, निःश्वसन्निराशासन्नसेवके, निस्सृतताम्बूलधूसरोधरवारयोषिति, विलक्षवैद्योपदिश्यमानपथ्याहारावहितपौरोगवे,[१] अनुजीविपीयमानोच्चषकधारावारिविनोद्यमानास्यशोषरुजि, राजाभिलाषभोज्यमानबहुभुजि, भेषजसामग्रीप्रतिपादनव्यग्रव्यवहारिणि, मुहुर्मुहुराहूयमानतोयकर्मान्तिकानुमितघोरातुरतृषि, तुषारपरिकरितकरकशिशिरीक्रियमाणोदश्विति, श्वेतार्द्रकर्पटार्पितकर्पूरपरागशीतलीकृतशलाके, नाश्यानपङ्कलिप्यमाननवभाण्डगतगण्डूष[ग्रहण]मस्तुनि, तिम्यत्कोमलकमलिनीपत्रभङ्गप्रावृतमृदुमृणालके, सनालनीलोत्पलपूलीसनाथसलिलपानभाजनभुवि, धारानिपातनिर्वाप्यमाणक्वथिताम्भसि, पटुपाटलामोदमुचि, मञ्चिकाश्रितसिकतिलककरीविश्रान्तातुरचक्षुषि, सरस(ल)शेवलवलयितगलद्गोलयन्त्रके, गल्वर्कशालाजिरोल्लासितलाजसक्तुमसारपारीपरिगृहीतकर्कशर्करे, शिशिरौषधिरसचूर्णावकीर्णस्फटिकशुक्तिशङ्खसञ्चये, सञ्चितप्रचुरप्राचीनामलकमातुलुङ्गदाडिमद्राक्षादिफले प्रतिग्राहीतविकीर्यमाणशान्त्युदकविप्रुषि, प्रेष्यापि(पे)ष्यमाणललाटलेपोपदिग्धदृषदि धवलगृहे स्थितम्, परलोकविजयाय नीराज्यमानमिव ज्वरज्वलनेनावरतपरिवर्तनैस्तरङ्गिणि शयनीये शेषमिव विषोष्मणा क्षीरोदन्वति विचेष्टमानम्, मुक्ताफलवालुकाधूलिधवलितं जलधिमिव क्षयकाले शुष्यन्तम्,[२] [ कालेन कैलासमिव दशाननेनोद्ध्रियमाणम्, अविरतचन्दनचर्चापराणां परिचारकाणामत्युष्णावयवस्पर्शभस्मीभूतोदरैरिव धवलैः करैः स्पृश्य-

१ हर्षचरिते °थ्याहरणाव° इति पाठः ।

* अतः परं पत्रे नष्टे **हर्षचरिता**दुद्धृतानि पदानि ।

मानं लोकान्तरप्रस्थितम्, स्थास्नुना स्वयशसैव चन्दनानुलेपनच्छलेनापृच्छ्यमानम्, अविच्छिन्नदीयमानकमलकुमुदेन्दीवरदलम्, कालकटाक्षपतनशबलमिव शरीरमुद्वहन्तम्, निबिडदुकूलपट्टनिपीडितकेशान्तकथ्यमानकष्टवेदनानुबन्धं मूर्धनि धारयन्तम्, दुर्धरवेदनोन्नमन्नीलशिराजालककरालेन च कालाङ्गुलिलिख्यमानलेखाख्यातमरणावधिदिवससंख्यानेन ललाटफलकेन भयमुपजनयन्तम्, आसन्नयमदर्शनोद्वेगादिव च किञ्चिदन्तःप्रविष्टतारकम्, शुष्यद्दशनपङ्क्तिप्रसृतधूसरदीधितितरङ्गिणीं मृगतृष्णिकामिवोष्णां निःश्वासपरम्परामुद्वहन्तम्, अत्युष्णनिःश्वासदग्धयेव श्यामायमानया रसनया निवेद्यमानदारुणसंनिपातारम्भम्, उरःस्थलस्थापितमणिमौक्तिकहारचन्दनचन्द्रकान्तम्, कृतान्तदू[त]दर्शनयोग्यमिवात्मानं कुर्वाणम्, अङ्गभङ्गवलनोत्क्षिप्तभुजयुगलम्, पर्यस्तहस्तनखमयूखैर्धारागृहमिव तापशान्तये रचयन्तम्, नेदिष्ठसलिलमणिकुट्टिमोदरेषु निपतद्भिः प्रतिबिम्बैरपि संतापातिशयमिव कथयन्तम्, स्पृशन्तीं प्रणयिनीमिव विश्वासभूमिं मूर्च्छामपि बहुमन्यमानम्, अन्तकाह्वानाक्षरैरिव च सभयभिषग्दृष्टैररिष्टैराविष्टम्, महाप्रस्थानकाले स्वसंतापमाप्तहृदयेषु संचारयन्तम्, अरतिप्रतिगृहीतमीर्ष्ययेव छायया मुच्यमानम्, उद्योगमिवोपद्रवाणाम्, सर्वाश्रमोक्षमिव क्षामतायाः, हस्तीकृतं विहस्ततया, विषयीकृतं वैषम्येण, कक्षीकृतं क्षयेण, गोचरीकृतं ग्लान्या, दग्धं दुःखोसिकया, आत्मीकृतमस्वास्थ्येन, विष(धे)यीकृतं व्याधिना, क्रोडीकृतं कालेन, लक्ष्यीकृतं दक्षिणाशया, पीतमिव पीडाभिः, जग्धमिव जागरेण, निगीर्णमिव वैवर्ण्येन, ग्रासीकृतमिव गात्रभङ्गेण, ह्रियमाणमिव विपद्भिः, वण्टचमानमिव वेदनाभिः, लुण्ठ्यमानमिव दुःखैः, आदिष्टितं दैवेन, निरूपितं नियत्या, घ्रातमनित्यत्वेन, अभिभूयमानमभावेन, परिकल्लितं परासुतया, दत्तावकाशं क्लेशस्य, वसतिमिव वैमनस्यस्य, [समीपे कालस्य,] अन्तिकेऽन्त्योच्छ्वासस्य, मुखे महाप्रयासस्य, द्वारि दीर्घनिद्रायाः, जिह्वाग्रे जीवितेशस्य वर्तमानम्, विरलं वचसि, चलितं तेजसि, विक्लवं चेतसि, विवशं चक्षुषि, विह्वलं वपुषि, क्षीणमायुषि, प्रचुरं प्रलापे, संततं श्वसिते, जितं जृम्भिकाभिः, पराधीनमाधिभिः, अनुबद्धमनुबन्धिकाभिः, पार्श्वोपविष्टयानवरतरोदनोच्छूननयनया गृहीतचामरिकयापि निःश्वसितैरेव वीजयन्त्या विविधौषधिधूलिधूसरशरीरया मुहुर्मुहुः 'आर्यपुत्र स्वपिषि' इति व्याहरन्त्या देव्या यशोमत्या शिरसि वक्षसि च स्पृश्यमानं पितरमद्राक्षीत् ।

[हर्षचरिते पञ्चमोच्छ्वासे ।]

क्रमेण च समीपमुपगतः शुश्राव लतावनान्तरितस्य मुमूर्षोर्महतः स्त्रैणस्य तत्कालोचितानेकप्रकारानालापान् । तथाहि— 'भगवन् धर्म, धाव शीघ्रम् । क्वासि कुल-

देवते । देवि धरणि, धीरयसि न दुःखितां दुहितरम् । क्व नु खलु प्रोषिता पुष्पभूतिकुलकुटुम्बिनी लक्ष्मीः । अनाथां नाथ मुखरवंश्य, विवृद्धाधिविधुरां विधवां वधूं [ वि ]बोधयसि किमिति नैनाम् । भगवन्, भक्तजने संज्वरिणि सुगत सुप्तोऽसि । राजधर्म पुष्पभूतिभवनपक्षपातिन्, उदासीनोऽसि कथम् । त्वया विपद्बान्धव विन्ध्य वन्ध्योऽञ्जलिबन्धः । मातर्महाटवि, रटन्तीं न शृणोषि( षी )मामा[ पत् ]पतिताम् । पतङ्ग, प्रसीद पाहि पतिव्रतामशरणाम् । प्रयत्नरक्षित कृतघ्न चारित्रचण्डाल, न रक्ष(क्षि)तासि राजपुत्रीम् । किमवधृतं लक्षणैः । हा देवि दुहितृस्नेहमयि यशोमति, मुषितासि दग्धदैवदस्युना । देव, दुहितरि दह्यमानायां नापतसि प्रतापशील शिथिलीभूतमपत्यप्रेम । महाराज राज्यवर्द्धन, न धावसि, मन्दीभूता भगिनीप्रीतिः । अहो निष्ठुरः प्रीतिभावः[1] । व्यपेहि पाप पावक स्त्रीघातनिर्घृण, ज्वलन्न लज्जसे । तात वात, दासी तवास्मि । संवादय द्रुतं देवीदाहं देवाय दुःखितजनार्तिहराय हर्षाय । नितान्तनिःशूक शोकश्वपाक, सकामोऽसि । दुःखदायिन् वियोगराक्षस, संतुष्टोऽसि । विजने वने कमाक्रन्दामि, कस्मै कथयामि, कमुपसर्पामि शरणम्, कां दिशं प्रतिपद्ये, कं रोदिमि, किमभागधेया करिष्यामि । गान्धारि, गृहीतोऽयं लतापाशः । पिशाचि मोचनिके, मुञ्च शाखाग्रहणकलहम् । कलहंसि, हंसि कमपरमुत्तमाङ्गम् । मङ्गलिके, मुक्तगलं किमद्यापि रुद्यते । सिन्दूरिके, दूरीभवति सखीसार्थः । स्थास्यसि कथमशिवे [ शव ]शिबिरे शबि(ब)रिके । सुतनु, तनूनपाति पतिष्यसि त्वमपि । मृणालकोमले मालावति, म्लानासि । मातर्मातङ्गिके, अङ्गीकृतस्त्वया मृत्युः । वत्से वत्सके, वत्स्यसि कथमनभिप्रेते प्रेतनगरे । नागरिके, गरिमाणमागतासि तया स्वामिभक्त्या । [ विराजिके, ] विराजितासि राजपुत्रीविपदि जीवितव्यव्यवसायेन । भृगुपतनाभ्युद्यमभागाभिज्ञे भृङ्गारधारिणि, धन्यासि । केरलि[2], कुतः पुनरीदृशी स्वप्नेऽपि सुस्वामिनी । मेनके, जन्मनि जन्मनि देवीदास्यमेव ददातु देवो देहं [ दहन् ] दहनः । विजये, वीजय कृशानुम् । भानुमति[3], नमतीन्दिवरिका दिवं गन्तुकामा । कामदासि, देहि दहनप्रदक्षिणावकाशम् । विचरिके, विरचय वह्निम् । विकिर किरातिके, [ कुसुम ]प्रकरम् । कुरविके[4], कुरु कुरबककोरकाचितां चिताम् । चामरं

---

१. **हर्षचरिते** 'प्रेतभावः' इति पाठः ।
२. **हर्षचरिते** 'केतकि' इति पाठः ।
३. **हर्षचरिते** 'सानुमति' इति पाठः ।
४. **हर्षचरिते** 'कुररिके' इति पाठः ।

चामरग्राहिणि, गृहाण पुनरपि कठिनं कण्ठे । मर्षयितव्यानि नर्मदे, नर्मनिर्मितानि निर्मर्यादहसितानि । भद्रे सुभद्रे, भद्रमस्तु ते परलोकगमनम् । अग्रामीणगुणग्रामानुरागिणि ग्रामिके,[1] गच्छ सुगतिम् । वसन्तिके, अन्तिकं[2] प्रयच्छ । आपृच्छते छत्रधारी देवि, देहि दृष्टिम् । इष्टा तव जहाति जीवितं विजयसेना । सेयमतिमुक्तिका मुक्तकण्ठमारटति निकटे नाटकसूत्रधारी। पादयोः पतति ते ताम्बूलवाहिनी बहुमती-(ता) राजपुत्रि पत्रलतिका । कलिङ्गसेने, अयमपश्चिमः परिष्वङ्गः । पीडय निर्भरमुरसा माम् । असवः प्रवसन्ति, वसन्तसेने । मञ्जुलिके, मार्जयसि कतिकृत्वः सुदुःसहदुःखसहस्रास्रदिग्धं दग्धचक्षुरिदम्, रोदिषि कियदाश्लिष्य माम् । निर्माणमीदृशं प्रायशो यशोधने । धीरयस्यद्यापि किं माम्, माधवि । केयमवस्था स्थापनानाम्। गतः स कालः कालिन्दि, सखीजनानुनयाञ्जलीनाम् । उन्मत्तिके मत्तबालिके,[3] कृताः पृष्ठतः प्रणयिनीप्रति(णि)पातानुरोधाः । शिथिलय चकोरवति, चरणग्रहणं ग्रा(ग्र)हिणि । कमलिनि, किमनेन पुनःपुनर्दैवोपालम्भेन। न प्राप्तं [चिरं] सखीजनसङ्गमसुखम् । आर्ये महत्तरिके तरङ्गसेने, नमस्कारः । सखि सौदामिनि, दृष्टासि । समुपनय हव्यवाहनार्चनकुसुमानि, कुमुदिके । देहि चितारोहणाय रोहिणि, हस्तावलम्बनम् । अम्ब धात्रि, धीरा भव । भवन्त्येवंविधाः कर्मविपाकाः पापकारिणीनाम्। आर्यपादरजसामयमञ्जलिः । परः परलोक[प्रयाण]प्रमाणोऽयं मातः। मरणसमये कस्माल्लवलिके, हलहलको बलीयानानन्दमयो हृदयस्य [मे] । परिहृष्यन्त्युच्चरोमाञ्चमुञ्चि किमङ्गीकृत्याङ्गानि । वामनिके, वामेन मे स्फुरितमक्ष्णा । वृथा विरमसि वयस्य वायस, वृक्षे क्षीरिणि क्षणे क्षणे क्षीणपुण्यायाः पुरः । हरिणि, हेषितमिव हयानामुत्तरतः। कस्येदमातपत्रमुच्चमत्र पादपान्तरेण, प्रभावति, विभाव्यते । कुरङ्गिके, केन सुगृहीतनाम्नो नाम गृहीतममृतमयमार्यस्य । देवि, दिष्ट्या बर्धसे देवस्य हर्षस्यागमनमहोत्सवेन' इति ।

[ हर्षचरितेऽष्टमोच्छ्वासे । ]

अथ गलति तृतीये यामे सुप्तसकलसत्त्वनिःशब्दे दिक्कुञ्जरजृम्भमाणगम्भीरध्वनिरताड्यत प्रयाणपटहः । अग्रतः स्थित्वा च मुहूर्तमिव पुनः पुनः प्रयाणक्रोशसंख्याख्यापकाः स्पष्टमष्टावदीयन्त प्रहाराः पटहे पटीयांसः । ततो रटत्पटहे, नन्दन्नान्दीके,

---

१. **हर्षचरिते** 'ग्रामेयिके' इति पाठः ।
२. **हर्षचरिते** 'अन्तरं' इति पाठः ।
३. **हर्षचरिते** 'मत्तपालिके' इति पाठः ।

गुञ्जत्कुञ्जे, कूण(ज)त्काहले, शब्दायमानशङ्खे, क्रमोपचीयमानकटककलकले, परिजनोत्थाप्यमानव्यापृतकगृहव्यवहारिणि, द्रुतद्रुघनघातधाट्यमानकोणिका[कील]कोलाहलाकलितककुभि, बलाधिकृतबध्यमानपाटीपतिपेटके, जनज्वलितोल्कासहस्रलोकलुप्यमानत्रियामातमसि, ग्रामचेटीचरणचलनोत्थाप्यमानकामिमिथुने, कटुककटुनिर्देशनश्यन्निद्रोन्मिषन्निषादिनि, प्रबुद्धहास्तिकशून्यीक्रियाणशय्यागृहे, सुप्तोत्थिताश्वीयविधूयमानसटे, कणत्कटकमुखरस्वरखनित्रखन्यमानक्षोणीपाशे, समुत्कील्यमानकीलशिञ्जानहिञ्जीरे, उपनीयमाननिगडतालक[ल]रवोत्तालतुरङ्गतरङ्ग्यमाणाग्रखुरे, लेशिकमुच्यमानमदस्यन्दिदन्तिसंदानशृङ्खलाखणखणनिनादनिर्भरभरितदशदिशि, घासपूलकप्रहारप्रमृष्टपांसु[ल]करिपृष्ठप्रसार्यमाणप्रस्फोटितचर्मणि, गृहचिन्तक[चेटक]संवेष्ट्यमानपटकुटीकाण्डपटकपटमण्डपपरिवस्त्रपटवितानके, कीलकलापापूर्यमाणचिपिटचर्मपुटे, संभाण्डायमानभाण्डागारिणि, भाण्डागारवहनवाह्यमानबहुबलवाहिके,[1] निषादनिश्चलानेकपारोप्यमाणकोशकलशपीडापीडसङ्कटायमानसामन्तौकसि, दूरगतदक्षदासेरकक्षिप्र[प्र]क्षिप्यमाणोपकरणसंभारभ्रियमाणदुष्टदन्तिनि, तिर्यग्गमननिमज्जाघनिकरकृच्छ्राकृष्टलम्बमानपरतन्त्रतुन्दिलचुन्दी[जन]जनितजनहासे, पीड्यमान[शार]शारिवरत्रागुणग्राहितगात्रविहारबृंहद्बहुबृहदुन्मत्तकरिणि, करिघटाघटमानघण्टाटङ्कारक्रियमाणकर्णज्वरे, पृष्ठप्रतिष्ठाप्यमानकण्ठालककदर्थितकूजत्करभे, अभिजातराजपुत्रप्रेष्यमाणकुप्रयुक्ताकुलकुलीनकुलपत्रककलत्रवाहने, गमनवेलावि[प्र]लब्धवारणधोरणान्विष्यमाणनवसेवके, प्रसादवित्तपत्तिनीयमाननरपतिवल्लभवारवाजिनि, चारुचारभटसैन्यस्यमाननासीरमण्डलाडम्बरस्थूलस्थासके, स्थानपालपर्याणलम्बमानलवणकलायीकिङ्किणीनालीसनाथसंकलिततलसारके, कुण्डलीकृतावरक्षिणीजालजटिलवल्लभपालाश्वघटानिवेश्यमानशाखामृगे, परिवर्धकाकृष्यमाणार्धजग्धप्राभातिकयोग्याशनप्रारोहके, व्याक्रोशीविजृम्भमाणघासिकघोषे, गमनसंभ्रमभ्रष्टभ्रमद्गुत्तुण्डतरुणतुरगतन्यमानानेकमन्दुराविमर्दे, सज्जीकृतकरेणुकारोहाह्वानसत्वरसुन्दरीदीयमानमुखालेपने, चलितमातङ्गतुरङ्गप्रधावितप्राकृतप्रातिवेश्यलोकलुण्ठ्यमाननिर्घाससस्यसंचये, संचरच्चेलचक्राक्रान्तचक्रीवति, चक्रचीत्कारिगन्त्रीगणगृह्यमाणप्रहृतवर्त्मनि अकाण्डो(ण्ड)दीयमानभाण्डभरितानडुहि, निकटघासलाभलुभ्यल्लम्बमानप्रथमप्रसार्यमाणसारसौरभेये, प्रमुखप्रवर्त्यमानमहासामन्तमहानसे, पुरः प्रधावद्ध्वजवाहिनि, प्रियशतालापलभ्यमानसंकटकुटीरकान्तरालनिःसरणे, करिचरणदलितमठिकोत्थितलोकलोष्टहन्यमानमेण्ठक्रियमाणासन्नसाक्षिणि, संघट्टविघट्टमानव्याघ्रपल्लीपलायमानक्षुद्रककुटुम्बके, कलकलोपद्रवद्रवद्द्रविणबलीवर्दविद्राणवणिजि, पुरःसरदीपिकालोकविरलायमानलोकोत्पीडप्रस्थितान्तःपुरकरिणीकदम्बके, हयारोहाहूयमानलम्बितशुनि, सरभसचरणापतन-

१. **हर्षचरिते** '°माननालीवाहिके' इति पाठः ।

निश्चलगमनसुखायमानखक्खटक्षत्रियस्तूयमानटङ्कणगुणे, स्रस्तवेसरविसंवादसीदद्दाक्षिणात्यसादिनि, रजोजग्धजगति, प्रयाणसमये, प्रतिदिशमागच्छद्भिर्गजवधूसमारूढैराधोरणैरूर्ध्वंध्रियमाणहेमपत्रभङ्गसारशार्ङ्गैः, अन्तरासनासीनान्तरङ्गगृहीतासिभिः, ताम्बूलिकविधूयमानचामरपल्लवैः, पश्चिमासनिकापितभस्त्राभरणभिन्दिपालपूलकैः, पत्रलताकुटिलकलधौतनलकपल्लवितपर्याणैः, पर्याणपक्षपरिक्षेपिपट्टिकाबन्धनिश्चलपट्टोपधानस्थिरावधानैः, प्रचलपादफलिकास्फालनस्फायमानपदबन्धमणिशिलाशब्दैः, उच्चित्रनेत्रसुकुमारस्वस्थगगनस्थगितजङ्घाकाण्डैश्च कार्दमिकपट्टकल्माषितपिशङ्गि[ङ्ग]पिङ्गैश्च अलिनीलमसृणसतुलासमुत्पादितसितसमायोगपरभागैश्च अवदातदेहविराजमानराजपट्टमेचकैः, कञ्चुकैश्च उपचितचीनचोलकैश्च तारमुक्तास्तबकितस्तबरकवारबाणैश्च नानाकषायकर्बुरकूर्पासकैश्च शुकपिच्छच्छायाच्छादनैश्च व्यायामोल्लुप्तपार्श्वप्रदेशविशच्चारुशस्त्रबन्धप्रविभक्तत्रिकैश्च, गतिवशवेल्लितहारलतालगल्लोलकुण्डलोन्मोचनप्रधावितपरिजनैश्च, चामीकरपत्राङ्कुरकर्णपूरविघट्टमानवाचालबालपाशैश्च उष्णीषपट्टावष्टब्धकर्णोत्पलनालैश्च कुङ्कुमरागकोमलोत्तरीयान्तरितोत्तमाङ्गैश्च चूडामणिखण्डखचितक्षौमचोलैश्च मायूरातपत्रायमाणशेखरषट्पदपटलैश्च मार्गागतशारिकेशारिवाहवेगदण्डैश्च पुरश्चञ्चच्चामरकिर्मीरकार्दरङ्गचर्ममण्डलमण्डनोड्डीयमानडामरचटुलचारभटभरितभुवनान्तरालैः, आस्कन्दत्काम्बोजवाजिशतैर्[शिञ्जानजातरूपायानरवमुखरितदिङ्मुखैश्च निर्दयप्रहतलम्बापटहशतपटुरवबधिरीकृतश्रवणविवरैः, उद्घोष्यमाणनामभिः, उन्मुखपादातप्रतिपाल्यमानाज्ञापातैः राजभिरापुपूरे राजद्वारम् ।

उदिते च भगवति दिनकृति राज्ञः समायोगग्रहणसमयशंसी सस्वान संज्ञाशङ्खो मुहुर्मुहुः । अथ नचिरादिव प्रथमप्रयाण एव दिग्विजयाय दिग्गजसमागममिव गमनविलोलकर्णतालदोलाविलासैः कुर्वाणया करेणुकयोह्यमानः, वैदूर्यदण्डविकटेनोपरि प्रत्युप्तपद्मरागखण्डखचिततया सूर्योदयदर्शनकोपादिव लोहितायतया ध्रियमाणेन मङ्गलातपत्रेण कदलीगर्भाभ्यधिकम्रदिम्ना नवनेत्रनिर्मितेन द्वितीय इव भोगिनामधिपतिरङ्गलग्नेन कञ्चुकेनामृतमथनदिवस इव क्षीरोदफेनपटलधवलाम्बरवाही, बाल एव पारिजातपादप इवाखण्डलभूमिमारूढः, विधूयमानचामरमरुद्विधूतकर्णपूरकुसुममञ्जरीरजसा सकलभुवनवशीकरणचूर्णेनेव दिशश्छुरयन्नभिमुखचूडामणिघटमानपाटलप्रतिबिम्बमुदयमानं सवितारमपि पिबन्निव तेजसा बहलताम्बूलसिन्दूरच्छुरितया विलभमान इव द्वीपान्तराण्योष्ठमुद्रयानुरागस्य स्फुरन्महाहारमरीचिचक्रवालानि चाम-

१. प्रतौ 'शारीरिक' इति पाठः ।

२. अतः परं पत्रे नष्टे **हर्षचरिता**दुद्धृतोऽयं सन्दर्भः ।

राणीव दिशोपि ग्राहयन्, राजकेक्षणोत्क्षिप्तत्रिभागया त्रीनपि लोकान् करदानायाज्ञापयन्निव सविभ्रमं भ्रूलतया द्राधीयसा बाहुप्राकारेण परिक्षिपन्निव रिरक्षया सप्तापि सागरमहाखातानखिलमिव क्षीरोदमाधुर्यमादायोद्गतया लक्ष्म्या समुपगूढः, गाढममृतमय] इव पीयमानः कुतूहलोत्तानकटकलोकलोचनसहस्रैः स्नेहार्द्रेषु राज्ञां हृदयेषु गुणगौरवेण मज्जन्निव, लिम्पन्निव सौभाग्यद्रवेण, द्रष्टृणाममरपतिरिवाग्रजवध[कलङ्क]-प्रक्षालनाकुलः, पृथुरिव पृथिवीपरिशोधनावधानसंकलितसकलमहीभृत्समुत्सारणः, पुरःसरैरालोककारकैः सहस्रसंख्यैरर्ककिरणैरिवाधिकारचातुर्यचञ्चलचरणैर्व्यवस्थास्थापननिष्ठुरैः भयपलायमानलोकोत्पीडान्तरिता दशापि दिशो ग्राहयद्भिरिव, चलितकदलिकासंपातपीतप्रचारं पवनमपि विनये स्थापयद्भिरिव, द्रुतचरणोद्धूतधूलिपटलावधूतान् दिनकरकिरणानप्युत्सारयद्भिरिव, कनकवेत्रलताविक्षिप्यमाणं दिनमपि दूरीकुर्वद्भिरिव दण्डिभिरितस्ततः समुत्सार्यमाणजनसमूहो निर्जगाम नरपतिः ।

[ **हर्षचरिते** षष्ठोच्छ्वासे ।]

उत्तमपुरुषव्यावर्णनकौशल्यं यथा—मेरुमय इव कल्याणप्रकृतित्वे, मन्दरमय इव लक्ष्मीसमाकर्षणे, जलनिधिमय इव मर्यादायाम्, आकाशमय इव शब्दप्रादुर्भावे, शशिमय इव कलासंग्रहे, वेदमय इवाकृत्रिमालापत्वे, धरणिमय इव लोकधृतिकरणे, पवनमय इव सजलरजोहरणे ।

इदानीम् **उपमापदानि**—

प्रतापेन धर्मेण दानेन कीर्त्या वा विनयेन विवेकेन नयेन सू(?शौ)र्येण—एतानि करणपदानि सामान्यानि । भरत इव, श्रीश्रेणिक इव, मान्धातेव, धुन्धुमार इव, पृथुरिव, चापविद्यया पार्थ इव, प्रतापे[न] रविरिव, सोमतया रजनीकर इव, सत्त्वेन हरिश्चन्द्र इव, सत्येन युधिष्ठिर इव, सगर इव, रघुरिव, नाभाग इव, भगदत्त इव, मघवानिव (मघवेव), सनत्कुमार इव, महापद्म इव, सुभूम इव, जय इव, ब्रह्मदत्त इव, पूरुरवा [इव], दुष्यन्त इव, हैहय इव, शक्त्या(क्ति)कुमार इव, तेजसा रविरिव, परप्राणत्राणेन जीमूतवाहन इव, वज्रायुधचक्रीव, उदयन इव, चण्डप्रद्योत इव, परमारिरिव इत्यादि ॥

देवी तस्य बभूव—रवेरिव छाया, रोहिणीव रोहिणीपत्युः, सूर्यस्येव पद्मिनी, नाभेरिव मरुदेवी, श्रीपार्श्वस्येव प्रभावती, श्रेणिकस्येव चेल्लणा, भरतस्येव स्त्रीरत्नम्, सप्तर्षीणामिव अरुन्धती, ईश्वरस्येव पार्वती, ब्रह्मण इव सावित्री, नारायणस्येव लक्ष्मी, हरिश्चन्द्रस्येव सुतारा, शचीपतेरिव शची, मेघस्येव विद्युत्, रतिपतेरिव रतिः, हिमा-

लयस्येव मेना, दुष्यन्तस्येव शकुन्तला, जितशत्रोरिव विजया, रामस्येव जानकी, नैषधेरिव दवदन्ती इत्यादि ।

उभयपक्षविघातिनी कंसस्येव जीवयशा इत्यादि ।

स द्वाभ्यां प्रियाभ्यां रेजे, पद्मावतीवैराट्याभ्यामिव धरणोरगराजः, सुमङ्गला-सुनन्दाभ्यामिव श्रीनाभेयः, गङ्गागौरीभ्यामिव शङ्कर इत्यादि ।

तिसृभिः प्रियतमाभिः स रेमे—सुमित्रादिभिर्दशरथ इव ।

चतसृभिः स शुशुभे—राजनीतिभिरिव राजा ।

पञ्चभिश्च—समितिभिरिव मुनिः ।

बहुभिः सोऽशोभिष्ट—करेणुभिरिव द्विपः, सुरभिभिरिव गोपतिः, शचीभिरिव विबुधपतिः, गोपीभिरिव माधवः, उरगीभिरिव फणीन्द्रः इत्यादि । भृङ्गी[भि]रिव पद्मम्, ताराभिरिव गगनम्, अश्विनीभिरिव चन्द्रमा इत्यादि ।

तनयोऽस्य बभूव इति—शक्रस्येव जयन्तः, हरस्येव कुमारः, नाभेरिव श्रीऋषभनाथः, चन्द्रस्येव बुधः, रवेरिव शनिः, प्राचीदिश इव रविः ।

तस्या गङ्गाया इव कनककमलम्, विदूरभूमेरिव रत्नम् इत्यादि ।

पुत्री बभूव तस्य—शक्रस्येव जयन्ती, ब्रह्मण इव भारती, सूर्यस्येव यमुना, जनकस्येव जानकी भीमस्येव दवदन्ती, द्रुपदस्येव द्रौपदी इत्यादि ।

द्वौ पुत्रौ तस्य जातौ—अश्विनीकुमाराविव, भुजाविव, नयने इव, नयधर्माविव ।

चत्वारः पुत्रास्तस्य बभूवुः—श्रीपतेरिव भुजाः, धर्मस्येव दानाद्या इत्यादि ।

नगरम्—राजगृहमिव श्रियः, प्रतिच्छन्दः इव स्वर्गपुरस्य, प्रतिमानमिव गजपुरस्य, नगरीश्रिया भोगवती पुरी. द्वैराज्यमिव अलकायाः, प्रतिनिधिरिव लङ्काया इत्यादि ।

मन्त्री—द्वितीय इवाभयकुमारः, मूर्तिमानिव चाणक्यः, प्रतिकृतिर्बृहस्पतेः, चतुर्विबुधद्विरत्नरत्नाकरः, करकमलकलितनीतिपुस्तकः, राजार्थकर्ता, हर्ता विपदाम् ।

पुरोहितः—सुरगुरुरिव बुद्ध्याः, अष्टादशपुराणपारावारपारीणः, आश्रयो विद्यानाम्, निवासो धर्माणाम्, यागविधिज्ञः, प्राज्ञः, दर्वीकरः, कुशकलितपाणिः, शान्त्यादिकर्मनिरतः, विरतः शूद्रदानेभ्यः ।

गजः—साक्षादैरावत इव सप्ताङ्गप्रतिष्ठतः, माणिक्यदण्डोत्पन्नः, समरसागर-तारणतरण्डः, करण्डः शौर्यरत्नानाम्, जिजिगिगिधिधि इत्यादिवाक्यशिक्षितसर्वक्रियः ।

तुरगः—साक्षाद् रेवन्त इव उच्चैःश्रवा इव, दिनकरतुरग इव, बुध्नावर्तविवर्जितो दशावर्तपूतः ।

निर्मांसं मुखमण्डले परिणतं मध्ये लघुं कर्णयोः
स्कन्धे बन्धुरमप्रमाणमुरसि स्निग्धं च रोमोद्गमे ।
पीनं पश्चिमपार्श्वयोः पृथुतरं पृष्ठे प्रधानं जवे
राजा वाजिनमारुरोह सकलैर्युक्तं प्रशस्तैर्गुणैः ॥७१॥

धौरितादयः पञ्चधारा इत्यादि ।

मुनिः—भृगुरिव, अत्रिरिव, अङ्गिरा इव, कुत्स इव, कौशिक इव, गौतम इव, वात्स्यायन इव, भारद्वाज इव, शाण्डिल्य इव, पौलस्त्य इव, पाराशर इव, अगस्त्य इव, लोपामुद्रापतिरिव, व्यास इव, वाल्मीकिरिव, नारद इव, दुर्वासा इव, याज्ञवल्क्य इव, सप्तमहर्षय इव, दक्ष इव, प्रजापतिरिव, धर्मेण भावनया क्षान्त्या विवेकेन परमार्थवृत्त्या तत्त्वदृशा तत्त्वज्ञानेन उपनिषदा इत्यादि ।

श्रीगौतम इव लब्ध्या, श्रीसुधर्मेव सन्तानवृद्ध्या, रूपेण वज्रस्वामीव, शीलेन स्थूलभद्र इव, क्षान्त्या दृढप्रहारिरिव, प्रभावनया वज्रस्वामीव, ग्रन्थकरणेन शय्यम्भव इव, श्रीपुण्डरीक इव तीर्थकरणेन, जिनशासनप्रभावनया विष्णुकुमार इव, सनत्कुमार इव राज्यत्यागेन, भावनया इलातीपुत्र इव, चिलातीपुत्र इव तपसा, श्रीदृढप्रहारिरिव उपसर्गसहनेन, गजसुकुमाल इव, अवन्तीसुकुमाल[1] इव, क्रोधत्यागेन स्कन्दकाचार्यशिष्यगण इव, मानेन बाहुबलिरिव, मायया पीठ इव, लोभजयेन कपिलमहर्षिरिव इत्यादि ।

सर्वोपमा— मर्यादया वारिधिरिव, गाम्भीर्येण वा श्लेषेण नदीनतया पात्राधारत्वेन वा रत्नोत्पत्त्या वा कल्याणवत्तया मेरुरिव विबुधसेव्यत्वेन वा विशालतया वा, चन्द्र इव कलावत्तया सुवृत्तेन वा तमोध्वंसेन वा । सिंह इव पराक्रमेण, श्लेषेण सद्गोत्रपरिचर्यया वा पूर्णक्रमत्वेन वा कुरङ्गहननेन वेति । पद्म इव श्रीनिवासत्वेन चित्रं कण्टकोच्छेदपरत्वेन पद्मशब्दः पुं—नपुंसकः । हर इव वृषभासितत्वेन संहारेण वा । गजपतिरिव दानेन । क्षेत्रमिव बहुधा न्यायसंयोगेन । क्षेत्रं रू(रो)पणया गुणबीजानाम् । आकरः प्रज्ञारत्नानाम् । निलयं सर्वविद्यानाम् इति । धनद इव धनेन, यम इव वैरिणाम्, सूर इव दोषोदयध्वंसेन, घन इव

---

१. प्रतौ तु 'अवन्तीसुकोसल' इति पाठः ।

संतापव्यपोहेन, वायुरिव प्राणदानेन, जिन इव गतरागत्वेन, इन्द्र इव पूर्वस्थितिपालनेन।

गौः—कामगौरिव सुदोह्या कुण्डोध्नी।

वृषः—सुसत्त्वेन कैलासशिखरीव, सुवर्णकिङ्किणीक्वाणभासुरः राजेव, शृङ्गाभ्यां नयपालनाभ्याम्।

सौधः—विमानमिव स्वर्गखण्डमिव बलाबलध्वजाञ्चलं सुवर्णपञ्चालिकामनोहरं रजतोत्तानपट्टम्।

चन्द्रः—पुण्डरीकमिव कामदेवमहीभुजः १, डिण्डिरपिण्ड इव रागवारिधेः २, रुचिरसुवृत्तमुखमिव जिनेश्वरस्य ३, द्वैराज्यमिव नीलविलोचनायाः ४, साक्षात्कीर्त्तिप्राग्भार इव यामिन्याः ५, कुञ्चिकेव नयनकैरवस्य ६, पीयूषाग्रयणमिव दृशाम् ७, निधानमिव प्रीतेः ८, आधानमिव धृतेः ९, बीजमिव स्मृतिभुवः १०, सुधाकुण्डमिव देवानाम् ११, इत्यादि।

रविः—प्रदीप इव कमलजागरणस्य १, उद्घाटनकुञ्चिकेव देवतायतनानाम् २, कुलागारमिव मुदाम् ३, उच्चाटनयन्त्रमिव तमसाम् ४, साधुरिव सत्यार्थदर्शनः ५, प्रीतिपात्रमिव कोकानाम् ६, शासनमिवोद्यमस्य ७, मूलस्तम्भमिव दिवसमहाप्रासादस्य ८, बीजमिव दिनलतायाः ९, प्रतिष्ठानमिव दिनपोतस्य १०, इत्यादि।

इन्द्रनीलशिलाबद्धमिव १, यमुनाजलपूरितमिव २, अञ्जनखचितमिव ३, नीलीरसपूरितमिव ४, अन्धकारपूरितं भुवनं बभौ।

मृगमदपुनरक्तं दन्तिदानानुवादो
मरकतमणिवीप्सा भृङ्गचेक्रीयितार्थः।
श्वयथुमुपदधानं स्म(?स्मा)रनीलोत्पलानां
यमकितयमुनाम्भो ध्वान्तमभ्येति भूयः ॥७२॥

कुरुविन्दकन्दलैरिव कश्मीरजकेशरैरिव व्याप्तम्।
बन्धूकप्रकरैरिव भुवनतलं भाति शशिकिरणैः ॥७३॥

प्रधानोपमासमुच्चयः यथा—दोहदेन पादपः १, मदेन द्विपः २, वेगेन वाजी ३, अलङ्कारेण काव्यम् ४, चैत्येन पुरम् ५, प्रतापेन नरेन्द्रः ६, शीलेन मुनिः ७, गाम्भीर्येण वारांनिधिः ८, रविणेव दिनम् ९, चन्द्रेण विभावरी १०, सत्येन वचनम्

११, सुकलत्रेण जन्म १२, दानेन धनम् १३, शुद्धक्रियया प्रयोगः १४, लोचनेन वपुः १५, फलेन फलिनः १६, रक्तपत्रेण अशोकः १७, विवेकेन साधुः १८, आचारेण कुलम् १९, उद्गारेण भोजनम् २०, भावेन धर्मः २१, तर्कविचारेण वैद्यः २२, लज्जया कुलवधूः २३, पाठेन मुनिः २४, सजलजलदेन नभः २५, उद्यमेन पुमान् २६, तथा सोऽमुकेन गुणेन इति ।

यथा—प्रमादेन मुनिः १, अगुणेन विद्या २, गर्वेण नरः ३, कुकलत्रेण जन्म ४, नकुलप्रचारेण दुर्गः ५, तुम्बीबीजेन गुडः ६, चिर्भटीबीजेन कणिका इति, तथा स दौरात्म्येन विनश्यति ।

मकरध्वजति रूपेण, श्रिया गरुडध्वजति, गाम्भीर्येण समुद्रति, दानेन कल्पवृक्षति, पराक्रमेण सिंहति—एवमादिना मकरध्वजायते इत्यादि ।

स चन्द्र इव कलाभिरभिवर्द्धते विद्याभिर्नदीभिरिव वार्द्धिर्धनैर्धनद इव चेत्यादि ।

राजयक्ष्मणेव स क्षीयते रोगेण कृष्णपक्षेणेव कलापतिः, पापैरिवाशुभपरिणाम इत्यादि ।

अद्य दिनम्, शुभसदनम्, वारोजनितनितान्तप्रमोदप्राग्भारः, कृतहर्षं वर्षम्, पुण्यावकाशो मासः, शुभपूर्तं मुहूर्तम्, यदा दृष्टोऽसि(स्ति) दिष्ट्या भवान् । गलितं वियोगेन, मिलितं धृत्या, उपचितं पुण्येन, हतं मोहेन इति ।

अद्य क्रियाः कामदुघाः, सत्याशिषो दर्शनिनः, तुष्टाः कुलदेवताः, फलितं स्वप्नेन, विकसितं लोचनाभ्याम्, नर्तितं मनसा, स्फुरितं वामबाहुना ।

हंसः साधुरिव विशुद्धपक्षः १, मुनिरिव चरणरागी २, राजपुत्र इव चरणरागी ३, महामुनिरिव सन्मानसाश्रयी ४ ।

देवतागारम्—आधार इध धर्मस्य, तिरस्कारयन्त्रमिव पापानाम्, सभेव हर्षमहीभुजः, प्रतिच्छन्द इव सिद्धायतनस्य देवविमानस्य वा, कुण्डमिव कर्तृकीर्तिजलानाम्, निधानमिव श्रेयसाम्, विश्रामस्थानमिव दृशाम् इत्यादि ।

द्विजः—मूर्तिमानिव श्रुतीनां समवायः, चतुर्थ इव वेदः, निवासभूः पुराणानाम्, यागयोगशतपथादिग्रन्थसंबन्धबन्धुरो धुरीण आचारवताम्, तरीषः शुभकर्मस्थितौ ।

श्वेताम्बरः—

भन्दं क्षान्तिभरादिवैष विहरन् वेषं वहन् विस्फुरत्—<br>शीलाङ्गश्च सहस्रपादरजसः सङ्गादिवानुज्ज्वलम् ।

लोहं मोहजिगीषयेव कलयन् सर्वाङ्गमङ्गे मलं
श्रो(?स्रो)तोबन्धनशृङ्खला इव शिरा बिभ्रत् तपस्वी स्फुटम् ॥७४॥

साक्षादिव जिनधर्मः, मूर्तिमानिव क्षमाभरः, अङ्गीवार्हद्धर्मः, भाजनमिव शमस्य, निधानमिव वा शेवधे(धि)रिव वा, आश्रय इव शुभानाम्, क्षेत्रमिव श्लोकबीजानाम्, उत्पत्तिरिव पुण्यानाम्, पञ्चसमितिसंपन्नः, त्रिगुप्तिगुप्तः, एकविधसंयमरतः, द्विध्यानविवर्जितः, त्रिदण्डरहितः, चतुःकषायजयी, पञ्चेन्द्रियनिग्रहपरः, षट्जीवनिकायवत्सलः, सप्तभीतिविनिर्मुक्तः, अष्टमदस्थानरहितः, नवब्रह्मचर्यगुप्तः, दशविधसाधुधर्मसुस्थितमनाः, एकादशाङ्गवित्, द्वादशप्रतिमाविधिज्ञः, त्रयोदशक्रियास्थानवेदी, जीवचतुर्दशकज्ञ इत्यादि ।

कोपे उपमानानि—दुर्वासा महर्षिरिव, चण्डरुद्राचार्य इव, चण्डकौशिक इव, स्कन्दकाचार्य इव, अच्चंकारितभट्टिकेव, कुभार्यायाः कपिकच्छुफलमिव, गोक्षुरकगण्डोपधानमिव, अग्निशिखेव, खदिराङ्गारशकटीव इत्यादि ।

हीनोपमा— शुनीयं गृहदेवीव खद्योतो भानुमानिव, इत्यादि ।

अधिकोपमा यथा— पातालमिव नाभिस्ते स्तनौ क्षितिधरोपमौ, इत्यादि ।

लौकिकी उपमा यथा—

स्थितः स्थितामुच्चलितः प्रयातां
निषेदुषीमासनबन्धधीरः ।
जलाभिलाषी जलमाददानां
छायेव तां भूपतिरन्वगच्छत् ॥ ७५ ॥

[ **रघुवंश**, सर्ग २, श्लोक ६ ]

कविप्रौढोक्तिमात्रनिष्पन्नोपमा यथा—घण्टामाघः, छत्रभारविः, दीपिकाकालिदासः, यमुनात्रिविक्रमः, धनपालारघट्ट इत्यादि ।

स्वदर्शनोपमा यथा—भावनया भरतः सिद्धः, मृगावती देवकी सुज्येष्ठा चेल्लणा धारिणी सुभद्रा कलावती रत्नमाला जयमालेत्यादि शीलेन ।

परदर्शनोपमा—शीले यथारुन्धती सीतेत्यादि ।

अनन्वयोपमा—जिनो जिन इव । रामरावणयोर्युद्धं रामरावणयोरिव । सागरः सागरोपमः । विषं विषमिवेत्यादि ।

इत्याद्युपमाप्रपञ्चोऽलङ्कारशास्त्रादवसेयः ।

रणं म्रियन्ते वीराः, बन्ध्यन्ते भाले रणपट्टाः, पूज्यन्तेऽस्त्रदेवताः ।

अस्त्राण्यमूनि—

खड्गः कुन्तल-भल्ल-गोफण-धनुः कुन्तः फरी मुद्गरो
नाराचः पतमाल-पाश-शफरी मुष्टिर्गदा-टिङ्कुली ।
सिल्लः कर्तरि-वज्र-मुष्टि-फलकं यन्त्रं त्रिशूलं झसं
दण्डः कुण्टि-परश्वधा-कटतला चक्राहि-पाशाङ्कुशाः ॥ ७६ ॥

लगुडो भिन्दपालश्च हरदं शक्ति-लाकडिः ।
यष्टिश्च वह्नितैलं च षट्त्रिंशच्छस्त्रसंग्रहः ॥ ७७ ॥

आयुधानां धनुः श्रेष्ठं सिल्लं कुन्तं च मध्यमम् ।
अधमं खड्गमित्याहुः छुरिका चाधमाधमा ॥ ७८ ॥

गरुडव्यूह-चक्रव्यूह-पद्मव्यूहरणम् ।

इति लोकव्यवहारं गुरुपदविनयादवाप्य कविसारम् ।
नवनवभणितिश्रव्यं करोति सुतरां क्षणात् काव्यम् ॥ ७९ ॥

इत्याचार्यश्री**विनयचन्द्र**विरचितायां **काव्यशिक्षायां**
**विनयाङ्कायां लोककौशल्यो** नाम तृतीयः परिच्छेदः ॥

# ४. बीजव्यावर्णनपरिच्छेदः ।

अथ [जिन]बीजानि—

पिता माता पुरी लक्ष्म वर्ण-कीर्ति-गुणश्रियः ।
प्रातिहार्याणि चाष्टापि देशना शमता सदा ॥ १ ॥

क्रोध-मान-माया-लोभ-मद-मोह-पराजयः ।
अष्टादशमहादोषवर्जनं जिनवर्णने ॥ २ ॥

व्याख्या—

**पिता**—नाभिश्च जितशत्रुश्च जितारिरथ संवरः ।
मेघो धरः प्रतिष्ठश्च महासेनो नरेश्वरः ॥ ३ ॥

सुग्रीवश्च दृढरथो विष्णुश्च वसुपूज्यराट् ।
कृतवर्मा सिंहसेनो भानुश्च विश्वसेनराट् ॥ ४ ॥

सूरः सुदर्शनः कुम्भः सुमित्रो विजयस्तथा ।
समुद्रविजयश्चाश्वसेनः सिद्धार्थ एव च ॥ ५ ॥

**माता**—मरुदेवी ईकार-आकारान्तः शब्दः ।

मरुदेवा विजया सेना सिद्धार्था च मङ्गला ।
ततः सुसीमा पृथ्वी लक्ष्मणा रामा ततः परम् ॥ ६ ॥

नन्दा विष्णुर्जया श्यामा सुयशाः सुव्रताऽचिरा ।
श्रीर्देवी प्रभावती च पद्मा वप्रा शिवा तथा ॥ ७ ॥

वामा त्रिशला क्रमतः पितरो मातरोऽर्हताम् ।

[ अभिधानचिन्तामणि १, ३६–४१ ]

**नगरी**—अयोध्या इत्यादि–विनीता, अयोध्या, श्रावस्ती, अयोध्या, कौशाम्बी, वाणारसी, चन्द्रपुरी, काय(क)न्दी, भद्रिलपुरं, सिंहपुरं, चम्पा, काम्पील्यम्, अयोध्या,

रत्नपुरम्, हस्तिनागपुरं, गजपुरं, नागपुरं, (मि)हिला, राजगृहं, मिथिलानगरी, शौर्यपुरं, वाणारसी, कुण्डग्राम इति जिननननगराणि ।

**लक्ष्माणि यथा**—

वृषो गजोऽश्वः प्लवगः क्रौञ्चोऽब्जं स्वस्तिकः शशी ।
मकरः श्रीवत्सः खड्गी महिषः शूकरस्तथा ॥ ८ ॥

श्येनो वज्रं मृगश्छागो नन्द्यावर्तो घटोऽपि च ।
कूर्मो नीलोत्पलं शङ्खः फणी सिंहोऽर्हतां ध्वजाः ॥ ९ ॥

[ अभिधान० १, ४७–४८ ]

गत्या हि विजितो वृष एवं गजोऽथ सेवते ।
चन्द्रोऽपि यं निष्कलङ्कं जिनं लाञ्छनछद्मना ॥ १० ॥

शङ्खोऽतिधैर्यं चिन्ताधिकफलप्रदमालोक्य सिंहोऽपि पराभूत इव यं निषेवते स विभुः पायात् ।

**वर्णौ** यथा—

रक्तौ च पद्मप्रभ-वासुपूज्यौ शुक्लौ च चन्द्रप्रभ-पुष्पदन्तौ ।
कृष्णौ पुननेमि-मुनी विनीलौ श्रीमल्लि-पार्श्वौ कनकत्विषोऽन्ये ॥११॥

**कीर्तिः**—कीर्तिरुज्ज्वला सुगन्धिर्वर्णनीया श्रीर्यथा शोभा सा चातिशयजनिता । अतिशयाश्चतुस्त्रिंशत् । ते च सिद्धान्तप्रसिद्धा ग्राह्या ग्रन्थगौरवभयान्न लिख्यन्ते ।

**प्रातिहार्याणि** यथा—

रक्ताशोकतरुर्विचित्रसुमनोवृष्टिः सुदिव्यो ध्वनिः
शुभ्रे भास्वरचामरे मणिमयं व्याभासि सिंहासनम् ।
भाश्चक्रं सुरदुन्दुभिस्फटिकरु ् छत्रत्रयं राजते
येषां ते विकरन्तु नोऽनघगुणाः पाप्मानमार्गाज्जनाः ॥ १२ ॥

**देशना** पञ्चत्रिंशद्गुणवती । तद्यथा—

संस्कारवत्त्वमौदात्त्यमुपचारपरीतता ।
मेघगम्भीरघोषत्वं प्रतिनादविधाय(यि)ता ॥ १३ ॥

इत्यादि । [ अभिधान०, १, ६५–७१ ]

**शमता** यथा—

बलं जगद्ध्वंसनरक्षणक्षमं
क्षमा च किं सङ्गमके कृतागसि ।
इतीव संचिन्त्य विमुच्य मानसं
रुषेव रोषस्तव नाथ! निर्ययौ ॥ १४ ॥

क्रोधादीनां जयो रूपकालङ्कारेण व्यावर्ण्यः स च अग्रे उदाहरिष्यते रूपकविचारे ।

अष्टादश **दोषा** यथा—

अन्तराया दान-लाभ-वीर्य-भोगोपभोगगाः ।
हासो रत्यरती भीतिर्जुगुप्सा शोक एव च ॥ १५ ॥

कामो मिथ्यात्वमज्ञानं निद्रा चाविरतिस्तथा ।
रागो द्वेषश्च नो दोषास्तेषामष्टादशाप्यमी ॥ १६ ॥

[ अभिधान० १, ७२-७३ ]

इदानीं जिनव्यावर्णने क्रियापदानि ।

वन्दे वन्दामहे नौमि स्तवीमि प्रणिदध्महे ।
दद्याद् देयात् सुखं जीया[द्] हरताद् विघ्नपद्धतिम् ॥ १७ ॥

हरन्तु मम पाप्मानं दिशन्तु मम सम्पदम् ।
पातु वोऽवतु मां देवः पापं हरतु वः सदा ॥१८॥

स्वामिन् ! जय जयाव त्वं पाहि पाहि स्मर त्रिधा ।
अङ्गीकरोमि सेवेऽहं भक्तितः समुपास्महे ॥१९॥

पापं लुनीहि करुणाकर! मां पुनीहि
दोषं मुषाण जगदीश! गुणं पुषाण ।
चित्तं प्रबोधय विशोधय दर्शनं मे
शीलं प्रवर्तय निवर्तय कर्मजालम् ॥२०॥

तव प्रेष्योऽस्मि दासोऽस्मि सेवकोऽस्म्यस्मि किङ्करः ।
ओमिति प्रतिपद्यस्व नाथ! नातः परं ब्रूवे ॥२१॥

नमः परपदस्थाय ज्योतीरूपाय तायिने ।
नमोऽस्तु ज्ञानरूपाय मुदितामोदशालिने ॥२२॥

यः परात्मा परं ज्योतिः परमः परमेष्ठिनाम् ।
आदित्यवर्णं तमसः परस्तादामनन्ति यम् ॥२३॥

सर्वे येनोदमूल्यन्त समस्ताः क्लेशपादपाः ।
मूर्ध्ना यस्मै नमस्यन्ति सुरासुरनरेश्वराः ॥२४॥

प्रावर्तन्त यतो विद्याः पुरुषार्थ[प्र]साधिकाः ।
यस्य ज्ञानं भवद्भाविभूतभावावभासकृत् ॥२५॥

यस्मिन् विज्ञानमानन्दं ब्रह्म चैकात्मतां गतम् ।
स श्रद्धेयः स च ध्येयः प्रपद्ये शरणं परम् ॥२६॥

तेन स्यां नाथवांस्तस्मै स्पृहयेऽहं समाहितः ।
ततः कृतार्थो भूयासं भवेयं तस्य किङ्करः ॥२७॥

इत्यादि **श्रीवीतरागस्तोत्राद्** अवगन्तव्या देवस्तुतिः ।

पिता— उपसर्गाः क्षयं यान्ति छिद्यन्ते विघ्नवल्लयः ।
मनः प्रसन्नतामेति पूज्यमाने जिनेश्वरे ॥२८॥

इति पिता ।

श्रीमन्नाभिनरेन्द्रस्य नन्दनो वृजिनं जिनः ।
नीतित्रयीलताकन्दो हरतादघघस्मरः ॥२९॥

पितुः पदेन पदद्वयम्, यथा—

कुलकृन्नन्दनो नाभिः स नाभिः पृथिवीभुजाम् ।
तत्पुत्रो जयतान्नित्यं जिनो जन्तुहितावहः ॥३०॥

पितुः पदेन पदत्रयम्, यथा—

भूपालमौलिमाणिक्यः सिद्धार्थो नाम भूपतिः ।
कुण्डग्रामपुरस्वामी तस्य पुत्रो जिनोऽवतु ॥३१॥

माता —मरुदेवीकुक्षिसरोविकस्वरसरोरुहम् ।
आदिमं जिननाथानां नाभेयं प्रणिदध्महे॥३२॥

पुरी, यथा—

अयोध्यायां जनिर्यस्य० ।

लक्ष्म, यथा—

स पातु वृषभध्वजः० । इत्यादि स्वयमभ्यूह्यम् ।

अभिनौमि जिनं ते । जीयासुर्जिनाः ।

शान्तिं वस्तनुतात् । वितर शं शम्भव ।

पालय माम्, तुभ्यं नमो, विधेहि सुविधिं सुविधे ।

जयति शत्रुं देवः । व्यमुचद् राज्यं शान्तिः ।

प्रवितनु मल्ले श्रियम् ।

इत्यादि कर्मपदानि ज्ञातव्यानि ।

## कारकशिक्षा

**संप्रदानं** यथा—देवदत्ताय ददात्यर्हन् श्रियम् ।

धर्मो मे रोचते चारुः ।

[**अधिकरणे** यथा–] शमे मतिं कारय त्वम् । धर्मे तत्त्वे वासनायां कलिमथने शत्रुपराजये इत्याद्यधिकरणे प्रयोगः ।

[**करणे** यथा–] मनसा वाचा कर्मणा धृत्या स्मृत्या भावेन विनयेन मनःशुद्ध्या समाधिना धिया वन्दनेन गुणग्रहणेन स्मरणेन परलोकभयेन वा नमामि ।

किशलयतु कलानां कौशलं चन्द्रमौलिः ।

स पातु वः कंसरिपोः कृपाणम् । इति करणम् ।

**अपादानं** यथा—पायादपायात् ।

विघ्नेभ्यो................जिनो विघ्नविनाशकः ।

संसारात् त्रायतां स्वामी मोहाद रक्षतु तीर्थकृत् । कुगतेः पातु वो वीर । इत्यादि ।

**संबन्धो** यथा— भविनां श्रियमादिशतु विभुः प्रणतः सुखयतु इत्यादि ।

**संप्रदानं** यथा–नमो देवाय । स्वस्ति प्रजायै ।

इति **कारकशिक्षा** ।

इदानीं **हरबीजानि**–

गङ्गागौर्यौ प्रिये यस्य त्रैलोक्यव्ययकारकः ।
विनायकः कुमारश्च द्वाविमौ तस्य नन्दनौ ॥३३॥

कैलासाद्रौ निवासश्च सर्पाभरणभासुरः ।
पिनाकशूलखट्वाङ्गगङ्गाहीन्दुकपालभृत् ॥३४॥

गजपूषपुरानङ्गकालान्धकमखासुहृत् ।
दैव्यानां वरदो नित्यं सर्वीयः सर्वगो विभुः ॥३५॥

व्याख्या—

मस्तके संस्थिता यस्य गङ्गा पावनसंवरा ।
स जीयाज्जगतामीशो महेशो महिमालयः ॥३६॥

अर्द्धमङ्गमनङ्गारेर्बिभ्रती पातु वः शिवा ।
पतिपुत्रकरव्यग्रव्याकुलैकपयोधरा ॥३७॥

त्रैलोक्यव्ययनाटिकानयनटः स्वामी जगत् त्रायताम् ।

इत्यादि विज्ञेयम् ।

विनायकः सुतो यस्य...............

प्रणयकुपितां दृष्ट्वा देवीं ससंभ्रमविस्मृत–
त्रिभुवनगुरुः प्रीत्या सद्यः प्रणामपरोऽभवत् ।
नमितशिरसो गङ्गालोके तया चरणाहता–
वतु भवतस्त्र्यक्षस्यैतद् विलक्षमवस्थितम् ॥३८॥

**आमन्त्रणे** सि औ जस्—हे वृक्ष, हे वृक्षौ, हे वृक्षाः । व्यङ्ग्यामन्त्रणे वृक्षेति ।

श्रेयःकल्याणमालां जयविजयशुभश्रेणिमाङ्गल्यलक्ष्मी–
मारोग्यं क्षेमवृद्धी रिपुविजयरमे सम्पदं भूरि भूतिम् ।
दिव्यास्त्रं दिव्यरूपं भुवनवशकरं चारुमन्त्रप्रभावं
निर्वाणं मोक्षसिद्धी दिशतु जिनपतिः सर्वदा भावभाजाम् ॥३९॥

हरतु दुरितम्, दिशतु शिवम्, अपहरतु कालकल्मषम्, प्रकटयतु परमपदम्, स्फुटयतु पदमव्ययम्। पातु वः, ददातु नः, बिभर्तु भुवनानि, जिनपरिवृढो द्रढयतु, प्रथयतु श्रियम्, दिशतु वा स श्रा(श्रे)यसीमुज्ज्वलाम्, श्रियं वितरतु, अवतु वः, पातु वः। प्रणिदध्महे, पर्युपास्महे, उपास्महे वयं देवाधिदेवम्। स्मर, नमत देवाधिदेवम्। वन्दे वन्द्यं देवं स्मरामि स्मरशासनम्।

अथ **मातरः**—ब्रह्माणी सिद्धा माहेश्वरी कौमारी वैष्णवी वाराही चामुण्डा इति सप्त मातरः । ईश्वरेणेमाः कृताः—

ब्रह्माणी निर्मिता येन भुवनोद्धारकाम्यया ।
जगत्यां स शिवः पायादपायेभ्यो विवेकिनः ॥४०॥

एवं सप्त श्लोका उत्पद्यन्ते, आसां बाहुप्रहरणवाहनवर्णनाभ्यः ।

लघिमा वशितेशत्वं प्राकाम्यं महिमाणिमा ।
यत्र कामावसायित्वं प्राप्तिरैश्वर्यमष्टधा ॥४१॥

यस्तरति महाम्भोधौ जीर्णपत्रमिवाचिरात् ।
लघिमावर्णने तस्य ब्रह्मापि खलु कातरः ॥४२॥

इत्यष्टौ भवन्ति श्लोकाः ।

**गङ्गां वन्दे**—निर्मोकमुक्तिमिव गगनोरगस्य, लीलाललाटिकामिव त्रिविष्टप[विट]स्य, विक्रयवीथिमिव पुण्यपण्यस्य, दत्तार्गलामिव नरकनगर[द्वार]स्य, अंशुकोष्णीषपट्टिकामिव सुमेरुनृपस्य, दुकूलकदलिकामिव कैलासकुञ्जरस्य, पद्धतिमिवापवर्गस्य, नेमिमिव कृतयुगचक्रस्य, सप्तसागरराजमहिषीं मन्दाकिनीम् ।

[ **हर्षचरिते** प्रथमोच्छ्वासे ]

[युवा—]अनङ्गयुगावतारमिव दर्शयन्तम्, चन्द्रमयीमिव सृष्टिमुत्पादयन्तम्, विलासप्रायमिव जीवलोकं जनयन्तम्, अनुरागमयमिव मार्गान्तरमारचयन्तम्, शृङ्गारमयमिव दिवसमापादयन्तम्, रागराज्यमिव प्रवर्तयन्तम्, आकर्षाञ्जनमिव चक्षुषोः, वशीकरणमन्त्रमिव मनसः, स्वस्थावेशचूर्णमिवेन्द्रियाणाम्, असंतोषमिव कौतुकस्य, सिद्धयोगमिव सौभाग्यस्य, पुनर्जन्मदिवसमिव मन्मथस्य, रसायनमिव यौवनस्य, एकराज्यमिव रामणीयकस्य, कीर्तिस्तम्भमिव रूपस्य, मूलकोशमिव लावण्यस्य, पुण्यकर्मपरिणाममिव संसारस्य, प्रथमाङ्कुरमिव कान्तिलतायाः, सर्गाभ्यास[फल]मिव प्रजापतेः, प्रतापमिव विभ्रमस्य, यशःप्रवाहमिव वैदग्ध्यस्य, अष्टादशवर्षदेशीयं युवानमद्राक्षीत् ।

[ **हर्षचरिते** प्रथमोच्छ्वासे ]

**स्त्री** विभाति—पुनः संजीवनौषधिरिव पुष्पधनुषः, वेलेव रागसागरस्य, ज्योत्स्नेव यौवनचन्द्रोदयस्य, महानदीव रतिरसामृतस्य, कुसुमोद्गतिरिव सुरततरोः,

---

१. सामान्यतोऽत्र ऐन्द्री दृश्यते, यथा—
माहेन्द्री चैव ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा वाराही चामुण्डा सप्त मातरः ॥

बालविद्येव वैदग्ध्यस्य, कौमुदीव कान्तेः, धृतिरिव धैर्यस्य, गुरुशालेव गौरवस्य, बीजभूमिरिव विनयस्य, गोष्ठीव गुणानाम्, मनस्वितेव महानुभावतायाः, तृप्तिरिव तारुण्यस्य ।

[ **हर्षचरिते** प्रथमोच्छ्वासे । ]

वीतरागदर्शने सति—लुण्ठितेव मनोरथैः, आकृष्टेव कुतूहलेन, प्रत्युद्गतेवोत्कलिकाभिः, आलिङ्गितेवोत्कण्ठ[या, अन्तःप्रवेशितेव]हृदयेन, स्नपितेवानन्दाश्रुभिः, विलुप्तेव स्मितेन, व(वा)जीतेवोच्छ्वसितैः, आच्छादितेव चक्षुषा, अभ्यर्चितेव वदनपुण्डरीकेण, सखीकृतेवाशया ।

[ **हर्षचरिते** प्रथमोच्छ्वासे । ]

'भवानीपतिः' इति स्तुतौ न कार्यः । यतो भवस्य भार्या भवानी, पतिशब्दो योजितः पत्यन्तरे प्रतीतिं जनयति । एवं 'मृडानीपतिः' 'अम्बिकापतिः' इति विरुद्धां धियमुत्पादयति ।

सती शिवा महादेवी भैरवी सर्वमङ्गला । इति गौर्या नामपदानि श्लिष्टानि ।

महासेनो महातेतः 'कुमारः' सुशब्दपूर्वः श्लिष्टो भवति, यथा—प्रभवति तारकोच्छेदनाय सुकुमारे रश्मिजाले । तारकारिरपि श्लिष्टः । इति हरप्रक्रमः ।

अथ **ब्रह्मा**—

हंसगो वेदगर्भश्च रजोगुणसमन्वितः ।
विश्वरेताः सुरज्येष्ठो लोकेशो नाभिपद्मभूः ॥४३॥

अयं बीजश्लोकः ।

व्याख्यास्य—

हंसासनसमासीनो वेदविद्यापवित्रितः ।
जगन्निर्माणतन्निष्ठः सुरज्येष्ठो जयत्यसौ ॥४४॥

परमेष्ठी ध्रुवः भवान्तकृत् सुरज्येष्ठ इति नामानि श्लिष्टानि ।

अथ **हरिः**—

राधा-लक्ष्मी-सत्यभामा-रुक्मिणी-गोपिकापतिः ।
दशावतारसुभगः समुद्रशयनप्रियः ॥४५॥

यदुनाथो गदा-शार्ङ्ग-श्रीवत्स-लक्ष्मभृत् ।
मधु-धेनुक-चाणूर-पूतना-यमलार्जुनाः ॥४६॥

कालनेमि-हयग्रीव-शकटारिष्ट-कैटभाः ।
कंस-केशि-मुराः साल्व-मैन्द-द्विविद-राहवः ॥४७॥

हिरण्यकशिपुर्बाणः कालियो नरको बलिः ।
शिशुपालश्चास्य वध्या वैनतेयस्तु वाहनम् ॥४८॥

[ **अभिधानचिन्तामणि,** २१९-२२१ ]

सूत्रम्— राधा-लक्ष्मीपतिः पायात् सत्याधिष्ठितमानसः ।
रुक्मिणी-गोपिका-स्वान्तसरोरुहदिवाकरः ॥ ४९ ॥

दशावतारसुभग इत्यादि, यथा —

श्रेयो दशावतारास्ते जीयासुरपरे जिनाः ।
चित्रं नमन्नृसिंहाय हिरण्यकशिपुच्छिदे ॥५०॥

समुद्रे शयनं यस्य यस्य माता च देवकी ।
वसुदेवः पिता यस्य स पातु गरुडध्वजः ॥५१॥

बाणासुरस्फुरत्कोपमहावह्निघनाघनः ।
चाणूरगर्वतटिनीपतिकुम्भोद्भवायितः ॥५२॥

इत्यादि स्वयमभ्यूह्यम् ।

अथ **लक्ष्मीः**—चपला कमलोत्पन्ना निधानेषु कृतस्थितिः ।
चतुर्दशमहारत्नप्रथमा कमला सुरी ॥५३॥

**वीतराग इव बौ(बु)द्धो** यथा—

भग्नं भवबलं येन जितं कन्दर्पशासनम् ।
निर्वाणपदमासीनं तं बुद्धं प्रणिदध्महे ॥५४॥

समन्तभद्रदनुसुतदेवदत्तादयो बु(बौ)द्धाः ।

रक्ताम्बरधराः शून्यवादिनस्तस्य भिक्षवः ।
तुम्बपात्राः क्षणिकत्वनिष्ठा मुण्डितमौल्यः ॥५५॥

अथ **विनायकः**—गजदन्तो जनाभीष्टप्रद आखुकृतस्थितिः ।
सिन्दूरपूररुचिरो गौरीसूतिश्चतुःकरः ॥५६॥

अविरलविगलन्मदजलकपोलपालीविलीनमधुपकुलः ।
उद्भिन्ननवस्म(श्म)श्रुश्रेणिरिव गणाधिपो जयति ॥५७॥

चिन्तामणि—कल्पद्रुम—सैन्दूरिक—पानीयसंबल—खोडिया इत्यादि नामानः ।

दोर्दण्डडमरस्वानभीमो भषणवाहनः ।
पादुकाश्लिष्टचरणः क्षेत्रपालो विभीषणः ॥५८॥

उज्जयिनीभुजङ्ग—कैलासगौरिक खोडिक— झञ्झाखर्पर—जलशम्बल इत्यादि नामभिर्वर्णनीयः ।

वैनायिकं चैत्यं रक्तम् । चामुण्डाया मठ एव । तोत्तलाया अपि । तुरुष्काणां मसिजि ।

**सखीभटः**, स्वस्तघटो वा—

सखीनामास्ति रजकी तस्याः प्रियतमो विभीः ।
शरीरपिटिकारोगध्वंसी जीयात् सखीभटः ॥५९॥

शरीरपिटिका शीली अछबडा ओरी बूरम् इत्यादि ।

गवां प्ररक्षणे युद्धं यशोराजस्य कीर्त्यते ।
लाखूनामास्ति तज्जामिः करभ्यासनमासिता ॥६०॥

स किल सकलदृप्तक्षत्रनक्षत्रलक्ष्मी—
हरणकिरणमाली कस्य न स्यान्नमस्यः ।
असमसमरसं पक्षं पटानां भटाना—
मवधिरवधि युद्धे येन हम्मीरवीरः ॥ ६१ ॥

**वलभीनाथः**—कपालपाणिवलभीपतिर्गगनगामुकः ।
सुरापानरतो नित्यं देवोऽयं वलभीपतिः ॥६२॥

इति **देवाः** ।

**श्वेताम्बराचार्यः**—

षट्त्रिंशता गुणैः कीर्णो महाव्रतधुरन्धरः ।
सिद्धान्ताम्भोधिपारीणः प्रवीणः प्राणिरक्षणे ॥६३॥

सर्वज्ञोपासनाभिज्ञो ज्ञानदर्शनपावनः ।
चारुचारित्रपूताङ्गः समितिगुप्तिसङ्गतः ॥६४॥

उत्तीर्णभवकान्तारः कान्तारागपराङ्मुखः ।
परीषहचमूजेता विनेता मोहमालिनाम् ॥६५॥

जातिवान् रूपसंपन्नो धीमान् तत्त्वार्थपारगः ।
अविकत्थनो नो मायी जितनिद्रो बहुश्रुतः ॥६६॥

मध्यस्थो देशकालज्ञः सर्वभाषासु कोविदः ।
प्रियधर्मा दृढधर्मा संविग्नस्तेजसां निधिः ॥६७ ॥

कंसे संखे जीवे गगणे वाऊय सारय(?यर)सलिले ।
पुक्खरपत्ते कुमुए विहगे खग्गे य भारंडे ॥६८॥

कुंजरवसहे सीहे नगराया चेव सागरे खोभे ।
चंदे सूरे कणगे वसुंधरा चेव अग्गिम्मि ॥६९॥

**व्याख्या**—कंसपतीव निरवलेवो । संखो इव निम्मलो । जीवे इव अप्पडिबद्धो । गयणमिव निरालंबणो । वाउव्व सव्वदेसविहारी । सायरसलिलं व सुद्धहियओ इत्यादि आलापका उत्पद्यन्ते ।

**ब्राह्मणः**— षट्कर्मनिरतो नित्यं भिक्षाशूरो बहुश्रुतः ।
पुराणवेदतत्त्वज्ञो विशुद्धाक्षरपाठकः ॥७०॥

विशुद्धाक्षराणि उदात्तानुदात्तसमाहारभेदैः ।

होमकर्म्मप्रवीणात्मा त्रिसंध्यं स्नानपावनः ।
सन्ध्यावन्दननिष्णातः शिखी तिलकमण्डितः ॥७१॥

कुशाङ्कितकरः स्वाहाप्रियस्याहुतिदायकः ।
दधानः पाणिराजीवे यष्टिका-करपत्रिके ॥७२॥

दधानो दण्डकं स्कन्धे जरद्वस्त्रः प्रदीनगीः ।
श्वदन्तक्षतिसम्बद्धपट्टको याचने पटुः ॥७३॥

क्रमुकस्य त्वचा भिक्षापुटीं बिभ्रत्करान्तरे ।
'दीयतां दीयतां देहि'वचः प्रोच्चैः समुच्चरन् ॥७४॥

करे ताम्रमयं बिभ्रत्कङ्कणं छत्रिकां तथा ।
केदारमार्गगानं च गङ्गासागरवर्णनम् ॥७५॥

**योगी—** कुलघोषान्तरन्यस्तसमस्तौषधिबन्धुरः ।
विभूतिगैरिकालिप्तपाणिविन्यस्तखर्परः ॥७६॥

पारमार्थिकगीर्वक्ता चर्यागानपरायणः ।
माहेन्द्रजालनिष्णातः कृतवायुप्रवारणः ॥७७॥

आधाराख्यं गुदे पृथ्वीचक्रं पीतं चतुर्दलम् ।
साधिष्ठानं लिङ्गमूले वायोधू(र्धू)म्रं च षट्दलम् ॥७८॥

नाभौ दशदलं श्वेतमाप्यं च मणिपूरकम् ।
हृदयेनाहतं रक्तमाग्नेयं द्वादशच्छदम् ॥७९॥

स्फटिकाभं नभः पीठे (?कण्ठे) विशुद्धं षोडशच्छदम् ।
लम्बिकायां तु द्वादशपत्रं चेत्यमृतोद्भवम् ॥८०॥

आज्ञाख्यं द्विदलं पञ्चभूतवर्णमयं भ्रुवोः ।
ब्रह्मरन्ध्रे सोमचक्रं षोडशच्छदमष्टमम् ॥८१॥

तत्राद्यत्रिकमौर्ध्वास्यं पञ्चाधो वदनान्य(?द)थ ।
यदात्मध्यानमेतेषु तन्मुक्तेः करणं विदुः ॥८२॥

आधाराच्च विनि[:]शृ(सृ)त्य नाभिपद्मं प्रवेष्ट्य च ।
ऊर्ध्वं विनिर्गता नाडी सुष्मणा(षुम्णा) पृष्ठमार्गतः ॥८३॥

तन्तुमूर्लनिभा शक्तिर्ध्याता सर्पविषापहा ।
संयमो नियमश्चैव करणं पुनरासनम् ॥८४॥

प्राणायामः प्राणयामः श्वासप्रश्वा[स]रोधनम् ।
प्रत्याहारस्त्विन्द्रियाणां विषयेभ्यः समाहृतिः ॥८५॥

धारणा [तु] क्वचिद् ध्येये चित्तस्य स्थिरबन्धनम् ।
ध्यानं च विषये तस्मिन्नेकप्रत्ययसंहतिः ॥८६॥

समाधिस्तु तदेवार्थमात्राभासनरूपकम् ।
एवं योगो यमाद्यङ्गैरष्टभिः सम्मतोऽष्टधा ॥८७॥

[**अभिधानचिन्तामणि**, ८३–८५]

**चण्डी**— त्रिशूलभिन्नमहिषासुरासृक्कृतकर्दमा ।
सहस्रोदारदोर्दण्डा चण्डी मुण्डविडम्बिता ॥८८॥

**जिनयक्षाः**— प्रसन्नपावनाकारा जिनपादकृतालयाः ।
चतुर्भुजा महाकायाः सङ्घसान्निध्यकारिणः ॥८९॥

ते च गोमुखाद्याः ।

अथ **आश्रमबीजानि**—

अथ तत्रानवरताध्ययनध्वनिमुखराणि, भस्मपुण्ड्रकपाण्डुरललाटैः कपिशशिखानालजटिलैः कृशानुभिरिव क्रतुलोभागतैर्बटुभिरध्यास्यमानानि, सेकसुकुमारसोमकेदारिकाहरितायमानप्रघणानि, कृष्णाजिनविकीर्यमाणशुष्यत्पुरोडाशीयश्यामाकतण्डुलानि, बालिकाविकीर्यमाणनीवारबलीनि, शुचिशिष्यगणानीयमानहरितकुशपूलीपलाशसमिन्धि, इन्धनगोमयपिण्डकूटसंकटानि, आमिक्षीयक्षीरक्षारिणीनामग्निहोत्रधेनूनां खुरवलयैर्विलिखिताजिरवितर्दिकानि, क(का)मण्डलव्यमृत्पिण्डमर्दनव्यग्रयतिजनानि, वैतानवेदीशङ्कव्यानामौदुम्बरीणां शाखानां राशिभिः पवित्रितपर्यन्तानि, वैश्वदेवपिण्डपङ्क्तिपाण्डुरितप्रदेशानि, हविर्धूमधूसरिताङ्गनविटपिकिसलयानि, वत्सीयवत्सपालकलालितललत्तरतर्णकानि, क्रीडत्कृष्णसारछागशावप्रकटितपशुबन्धप्रबन्धानि, शुकशारिकाग्रन्थाध्ययनदीयमानोपाध्यायविश्रान्तिसुखानि, साक्षात्त्रयीतपोवनानीव चिरदृष्टानां बान्धवानां प्रीयमाणो भ्रमन् भवनानि, आश्रमाणां सुखमतिष्ठत् ।

[ **हर्षचरिते** द्वितीयोच्छ्वासे । ]

मित्रोपकरणमात्मा, भृत्योपकरणं प्रभुत्वम्, पण्डितोपकरणं वैदग्ध्यम्, बान्धवोपकरणं लक्ष्मीः, कृपणोपकरणमैश्वर्यम्, द्विजोपकरणं सर्वस्वम्, सुकृतसंस्मरणोपकरणं हृदयम्, धर्मोपकरणमायुः, साहसोपकरणं शरीरम्, असिलतोपकरणं पृथ्वी, विनोदोपकरणं राजकम्, प्रतापोपकरणं प्रतिपक्षः, नास्याल्पपुण्यैरवाप्यते ।

अथ **कुलवधूः**—नीरङ्गी पतिभक्ता गुरुजनशुश्रूषणासु निष्णाता ।
लज्जावती गुणवती प्रेमवती स्वल्पवचना च ॥९०॥

---

१ दध्ना सह पयः सृ(शृ)तम । **आमिक्षा** सा शृतोष्णे या क्षीरे स्याद्दधियोगतः' । [**अमरकोश**, १३९८]—सं०

**वेश्या**— अर्थोपार्जनरसिका वैशिकशतसंकुला सुरतसुभगा ।
वीणादिवाद्यनिरता रम्भागौरीव्रतविधिज्ञा ॥९१॥

**द्यूतकारः**— सत्या(त्यं)करोऽतिनिरतं खण्डाम्बरवसनमात्रपरिधानः ।
सर्वद्यूतविधिज्ञो जीर्णप्रासादकृतवासः ॥९२॥

कौपीनं वसनं कदन्नमशनं शय्या धरा पांसुरा(?ला)
जल्पोऽश्लीलगिरः कुटुम्बक(?कु)जनो वेश्यासहाया विटाः ।
व्यापारः परवञ्चनानि सुहृदश्चौराः महान्तो द्विषः
प्रायः सैष दुरोदरव्यसनिनः संसारवासक्रमः ॥९३॥

**कुलटा**— निजकुलमालिन्यकरी चौर्यरता सततदत्तसंकेता ।
नर्मोक्तिषु प्रवीणा कामुकहृदयंगमकटाक्षा ॥९४॥

**उपाध्यायः**— सर्वशास्त्रप्रवीणात्मा नानापुस्तकसंग्रही ।
उद्यमी बठरच्छात्रपाठकः शठतोज्झितः ॥९५॥

**मूर्खः**— भोजने शयने सक्तः समो मानापमानयोः ।
अपभ्रंशवचोग्राही ग्रहिलः पाठवर्जितः ॥९६॥

तद्यथा— मूर्खत्वं हि सखे ममापि रुचितं यस्मिन् यदष्टौ गुणा
निश्चिन्तो बहुभोजनो बठरता रात्रौ दिवा शायकः ।
कार्याकार्यविचारणान्धबधिरो मानापमाने समः
प्रायेणामयवर्जितो दृढवपुर्मूर्खः सुखं जीवति ॥९७॥

**बालः**— काकपक्षधरः कण्ठविन्यस्तव्याघ्रदंष्ट्रिकः ।
अव्यक्तालापसुभगो लघुघर्घरनिस्वनः ॥९८॥

**युवा**— शृङ्गारादिरसोत्कर्षी लोललोचनलोभनः ।
नानानेपथ्यराजिष्णुर्विटपेटकलम्पटः ॥९९॥

**वृद्धः**— जराजीर्णः स्खलद्वाक्यः कम्पमानकरद्वयः ।
शङ्खस्पर्धोपमशिराः पलितैः फेननिर्मलैः ॥१००॥

दन्तैरुच्चलितं व(?प)लेन गलितं पाण्यंह्रिणा कम्पितं
दृग्भ्यां कुड्मलितं धिया विगलितं रूपश्रिया प्रोषितम् ।

प्राप्तायां यमभूपतेरिव निशाधाटूयां जरायामियं
दृष्टा केवलमेककैव सुभटी हृत्पत्तने वल्गति ॥१०१॥

गतोदन्ता दन्ताः पलितकलितः कुन्तलभरः
तमःक्षेत्रे नेत्रे विषयपुटिनीनश्रुतिपुटी ।
अभूदङ्गं रङ्गद्वलिवलयवीथीविलुलितं
तथाप्येतच्चेतस्तरुणमिव धावत्यनुदिनम् ॥१०२॥

**बालक्रीडनकानि**—अरीरमद् देवकुमारमण्डली तं पौरनेत्राम्बुजराजिभास्करम् ।
सुवर्णपूर्णैः करकन्दुकादिभिर्विनोदनैर्दृष्टिहरैर्हरे[र]पि ॥१०३॥

यत्कुट्टिमे शंवरपाणिगोचर[1]श्चरन्महीन्यस्तपदद्वयप्रभुः ।
सरोवरे बालमरालवैभवं कुर्वन्निव प्रीतिकरो न किन्तु तत् ॥१०४॥

बभौ विष्णुपाणितलास्तृणां(?) व्रजन्
प्रेम्णा भृशं पाणितलं दिने दिने ।
अबुद्धमूल्यः किल वारिधेर्मणि—
र्देदीप्यमानो वणिजा प्रयात्यलम् ॥१०५॥

गजतुरगरोहणाढ्यं सुकुमारं विभुमकारयद् वज्री ।
पुरतो जयजयशब्दं बन्दीव चकार हर्षेण ॥१०६॥

**पुस्तकम्**— सद्वर्णं पा(?प)त्रसंकीर्णं पुस्तकं गुणभासुरम् ।
स्वर्गवद् बहुलेखं च पृथुश्लोकं नरेन्द्रवत् ॥१०७॥

**जिनचैत्यम्**—मण्डपश्रेणिसंकीर्णं चारुपञ्चालिकावृतम् ।
तुङ्गतोरणराजिष्णु साक्षात् सिद्धालयोपमम् ॥१०८॥

**शिवचैत्यम्**—नन्द्यादिमूर्तिरुचिरं द्वारस्थवृषभासुरम् ।
पञ्चवर्णपताकाढ्यं बहिः कुण्डेन मण्डितम् ॥१०९॥

**विष्णोः**— दशावतारमूर्तीनां रूपकैः परिपूरितम् ।
कलशाग्रपतत्रीशमूर्तिव्यक्तं प्रकीर्तितम् ॥११०॥

**कामदेवस्य**—चतुर्द्वारं चतुर्मूर्ति कामदेवोपशोभितम् ।
आरक्तध्वजराजिष्णु रतिप्रीतिमनोरमम् ॥१११॥

---

१ प्रतौ तु °चरो चर°' इति पाठः ।

पालीप्रोद्गतवृक्षालीपद्मिनीसंक्रमावृतम् ।
तीरस्थक्रौञ्चहंसादिस्वरपूरितदिग्मुखम् ॥११२॥

**प्राकारः**— भैरवादिमहायन्त्रस्फुरद्विद्याधरीवृतम् ।
नानामारयुतं वप्रं कपिशीर्षाग्रदारुवत् ॥११३॥

**प्रतोली**— वज्रद्वारकपाटाढ्या नाराचशतसंकुला ।
चण्डिकाक्षेत्रपालादिमूर्तियुग्द्वारपालवत् ॥११४॥

**ग्रामः**— नृत्यादिमण्डितः स्फुर्जद्गोधनः पामरावृतः ।
निविष्टफलग्नी(?दो) लोकन्यस्तस्तोकापणः खलु ॥११५॥

**वृक्षः**— पत्रपुष्पफलाकीर्ण आवापपरिमण्डितः ।
दोहदेन कृतोल्लासो निवासः सर्वपक्षिणाम् ॥११६॥

**गौः**— कुण्डोध्नी सुव्रता कण्ठपीठीबद्धसुघण्टिका ।
वत्सानुगा शुभाकारा साक्षात् कामगवीसमा ॥११७॥

**शण्ढः**— शूलाङ्कितः स्वैरचारी पीवरः स्कन्धबन्धुरः ।
पादनूपुरझङ्कारी भाङ्कारैः पूरिताम्बरः ॥११८॥

**प्रवहणम्**— प्रतिष्ठानमनोहारि जलद्रोणीविभूषितम् ।
कूपस्तम्भजिनोदग्रं स्फुरद्ध्वजपटाकुलम् ॥११९॥

सुवर्णदृष्टिरुचिरमरित्रैः परिपूरितम् ।
चटसैर्ग्राह्यमाणाम्बु ध्वजछत्रसमाकुलम् ॥१२०॥

शुक्रवारे तदापूर्यं निवाजक्रिययान्वितम् ।
उपहारमनोहारि वार्देवीपूजयाञ्चितम् ॥१२१॥

**धीवराः**— स्वनामवद् ये जानन्ति गिरीन् दन्तांश्च दुर्गमान् ।
अञ्जनान् वेत्रवल्यानावर्तांश्च झषांस्तथा ॥१२२॥

**प्रवहणभङ्गः**—स्मरन्ति देवताः कुल्याः रहमाणं विशेषतः ।
सुक्कानं[1] धार्यते स्थाम्ना कूपस्तम्भस्तु पात्यते ॥१२३॥

---

१ प्रतौ तु 'शुंकाणं' इति पाठः । 'सुक्कान' इति अरबीभाषायाम् ।—सं०

जलधौ क्षिप्यते वस्तूडुपानां च स(?निम)ज्जनम् ।
हाहेति निनदोच्चारः सर्वतः स्फुरति स्फुटम् ॥१२४॥

**देशोत्पातः**—अट्टहासं विकुर्वन्ति देवता अश्मनिर्मिताः ।
कम्पन्ते च रुदन्त्युच्चैः प्रस्वेदं दधति स्फुटम् ॥१२५॥

तोरणानि पतन्त्याशु विशन्ति श्वापदाः पुरे ।
जलस्थानेषु नीरणां विकारो दृश्यते बहुः ॥१२६॥

नारीणां विकृतिर्गर्भे कौशिकाः पुरमध्यमाः(गाः) ।
आकर्षन्ते मुहुः काकाः सुरधामध्वजाञ्चलान् ॥१२७॥

भूमिकम्पोऽथ निर्घातो भूतव्यन्तरदर्शनम् ।
ग्रहा धूमं विमुञ्चन्ति सच्छिद्रं रविमण्डलम् ॥१२८॥

शीतपादे गतरुचौ सूर्ये मन्दत्वमीयुषि ।
दिवा ददृशिरे तारा जनस्येवाश्रुबिन्दवः ॥१२९॥

अपर्वण्यपि सूर्येन्द्वोर्ग्रहणं दृश्यतेतराम् ।
वेतालभूतनगरदर्शनं चर्मचक्षुषाम् ॥१३०॥

**कटकोत्पाताः**—हारस्त्रुटति कण्ठाग्रात् मौलिः स्खलति शीर्षतः ।
भनक्ति पवनश्छत्रं खड्गः पतति कोशतः ॥१३१॥

सेनाधिपा निरुत्साहा गुडां गृह्णन्ति न द्विपाः ।
रजस्वला दिशः सर्वा रथक्षो(रथाक्षा)भङ्गमिय्रति ॥१३२॥

**धाटी**— इतो गृह्णीत गृह्णीत हत हतेतिभाषिणः ।
लुण्टाकाः पदवीबन्धं कुर्वते क्रूरनिस्वनाः ॥१३३॥

भ्रियन्ते वणिजो हस्ते ज्वाल्यन्ते वृतयस्तथा ।
उद्दाल्यन्ते बलाद् बालाः स्फोटयन्ते हट्टराशयः ॥१३४॥

लोहकुन्तान् भुवि क्षिप्त्वा ज्ञायन्ते निधयोऽखिलाः ।
भूमिगृहाणि शोध्यन्ते तथान्तरगृहाणि च ॥१३५॥

असारं त्यज्यते वस्तु सारं चैव निरीक्ष्यते ।
बन्दिभिः प्रोह्यते भाण्डं गवां हरणपूर्वकम् ॥१३६॥

**युद्धभङ्गः**— भृगुपातं पतन्त्येके तृणान् गृह्णन्ति च द्विजैः ।
मृता इव पतन्त्येके श्वासोच्छ्वासनिरुम्भतः ॥१३७॥

त्वदीयाः पिप्पला नाथ त्वदीया यामिनायकाः ।
त्वदीया अङ्गजाश्चेति भाषन्ते कातरा रणे ॥१३८॥

शून्यासना भ्रमन्त्यश्वा विमुच्य वारणान् नृपाः ।
कृत्वा वेषपरावर्त्तं प्रणश्यन्ति यथा तथा ॥१३९॥

**नगरभङ्गः**— प्राकारः पात्यते वेगाद् ज्वाल्यन्ते सौधराशयः ।
छिद्यन्ते शतशो वृक्षा भिद्यन्ते च जलाशयाः ॥१४०॥

शृङ्गारहाररुचिराः परग्रहणभीरवः ।
झम्पां ददति कूपेषु भीरवो धृतबालकाः ॥१४१॥

अथ **वणिजः**—गणितज्ञो महालोभी तुन्दिलो मृदुवाक्यभृत् ।
गूढदत्तापहारी च स्पष्टदत्तस्ववञ्चकः ॥१४२॥

तद्यथा— अपहरति गूढदत्तं प्रकटितदत्तेऽपि वदति सन्देहम् ।
क्रयविक्रयेऽपि लुम्पति तथापि लोके वणिक् साधुः ॥१४३॥

अथ **कायस्थः**—सदाक्षरोपजीवी स्यान्महाबुद्धिर्विचक्षणः ।
वीरस्तव्य-गौडभेदैश्च[1] बहुधा परिकीर्तितः ॥१४४॥

अथ **क्षत्रियः**—शश्वदस्त्रकृताभ्यासो रणविद् गुरुमत्सरः ।
स्वामिकार्यकृते दक्षो दानी मानी जिताहवः ॥१४५॥

शूरः संग्रामरसिको नानाविरुदभासुरः ।
प्रहारव्रणराजिष्णू रणे पतितपक्वरः (?प्रक्षरः) ॥१४६॥

अथ **क्षपणकः**—मायूरलिङ्गी निर्ग्रन्थो नित्यं केशविलुम्प(ञ्च)कः ।
अन्तरायविधिप्राज्ञो मलापूरितविग्रहः ॥१४७॥

अथ **तपस्वी**[2]—शिवपूजारतो नित्यं भस्मभासितविग्रहः ।
जटाजूटरतो घोरमन्त्रोच्चारमनोहरः ॥१४८॥

---

१ प्रायोऽत्र'वालभ्य-गौडभेदैश्च' इति पठितव्यम्, वालभ्यकायस्थ-गौडकायस्थ इति रूढभेदात् । [-सं०]
२ प्रतौ तु 'तपस्विनः' इति पाठः ।

शिवागमविचारज्ञः षट्पदार्थोपवर्णकः ।
एकबासाः करक्रोडकमण्डलुविराजितः ॥१४९॥

अथ **सांख्यः**—पञ्चविंशतितत्त्वज्ञस्त्रिदण्डी रक्तकर्पटः ।
स्नानभोजी कराम्भोजस्वर्णमुद्रापवित्रितः ॥१५०॥

कपिलाख्यातसिद्धान्तपारगो ब्रह्मचर्यभृत् ।
श्रीखण्डतिलकी तीर्थवासी नाशितकिल्बिषः ॥१५१॥

अथ **चार्वाकः**—पञ्चभूतार्थवेदी च तत्त्वोपप्लवकारकः ।
अध्यक्षः(?क्ष)प्रमितेर्वक्ता पुरुषार्थविदूषकः ॥१५२॥

अथ **कविः**— शब्दार्थवादी तत्त्वज्ञो माधुर्यौजःप्रसाधकः ।
दक्षो वाग्मी नवार्थानामुत्पत्तिप्रियकारकः ॥१५३॥

शब्दार्थवाक्यदोषज्ञश्चित्रकृत् कविमार्गवित् ।
ज्ञातालङ्कारसर्वस्वो रसविद् बन्धसौष्ठवी ॥१५४॥

षड्भाषाविधिनिष्णातः षड्दर्शनविचारवित् ।
नित्याभ्यासी च लोकज्ञश्छन्दःशास्त्रपटिष्ठधीः ॥१५५॥

**सज्जनः**— स्वगुणाच्छादकः कृत्यवेदी परगुणप्रियः ।
पीयूषकल्पवचनः परसूक्तियशस्करः ॥१५६॥

**दुर्जनः**— परापवादनिष्णातः परकाव्यविदूषकः ।
सदाभिमानी दुर्ध्यानी नीचसेवापरायणः ॥१५७॥

**चौरः**— उद्बद्धपिण्डिका(?को) लोललोचन[:] क्षत्रपापकृत् ।
असत्यवादी मायावी सधैर्यो बहुवेषभृत् ॥१५८॥

वालुकाक्षेपको रात्रौ शकुनज्ञो दयोज्झितः ।
तालोद्घाटनविद्याज्ञश्चुम्बकभ्रामकाश्मभृत् ॥१५९॥

अथ **अर्थोत्पत्तिबीजानि**—

पद्मं सरः पयोराशी रोहणाद्रिर्दिनेश्वरः ।
चन्द्रो नभस्तलं गङ्गा पृथ्वी भण्डारमन्दिरम् ॥१६०॥

निधिः खट्वरिका मूलधनं कुण्डं हिमाचलः ।
समस्या जलदारामौ कार्मणं कुलमन्दिरम् ॥१६१॥

मानसं नगरं कल्पः प्रतिष्ठानं सरोरुहम् ।
मधुर्ग्रीष्मश्च वर्षाश्च शरद्धेमन्तशीतकः ॥१६२॥

परशुर्दववह्निश्च भारतीहस्तपुस्तकः ।
पद्मिनी चन्द्रिका चूतो नेत्राञ्जनं सुभाजनम् ॥१६३॥

आदर्शः कङ्कणं प्राची विन्ध्यशैलः प्रभोदयः ।
क्षेत्रं कन्दः खनिर्मूलमटवी शत्रमालयः ॥१६४॥

दीपो जलनिधौ द्वीपो मरौ शाखी हिमे शिखी ।
वृषभः स्यन्दनः पुष्पं चार्गला द्वारकुञ्चिका ॥१६५॥

हस्तावलम्बनं मार्गो दिवामुखं प्रभोदयः ।
क्रीडाभूः क्रीडोपवनं रयो नद्यास्तमस्विनी ॥१६६॥

**व्याख्या**— एभिः पदैरर्थबीजमुत्पद्यते, तद्यथा-

**पद्मम्**—सरलाङ्गुलिदलपटलं नखमणिकरकेसरं नरसुरालिम् ।
त्रिभुवनकमलानिलयं जिनपतिपदपङ्कजं नमत ॥१६७॥

अथवा —गुणभृङ्गावलीपद्मम् ।

**सरो** यथा—अतिशयकमलमनोज्ञं कीर्तिजलं सकललोकमहनीयम् ।
भव्यजनकुमुदनिकरं नमामि नाभेयचरणसरः ॥१६८॥

**पयोधिः**—गाम्भीर्यरत्नपाथोधिः । अथवा मर्यादातटिनीश्वरः ।
**रोहणाद्रिः**—गुणमाणिक्यरोहणः ।
**सूर्यः**—तमस्तोमदिवानाथः ।
**चन्द्रः**—नेत्रकैरविणीचन्द्रः ।
**नभस्तलम्**—यशस्तारामरुत्पथः ।
**गङ्गा**—पापपङ्कापनोदाय साक्षाद् गङ्गेव वीक्ष्यते ।
**पृथ्वी**—अतिशयगिरिपृथ्वी राजते भारतीयम् ।
**भण्डारमन्दिरम्**—औचित्यद्रव्यभण्डारः ।

---

१ पुनरुक्तिरियं प्रागुक्तत्वात् । व्याख्यायामत्र प्रभोल्लास इति व्याख्यातः । [- सं० ]

**निधिः**—कीर्तिविस्फूर्तिसेवधिः । कीर्तिसद्रत्नसेवधिः ।

**खल्लूरी**—इयं विराजते रामा काममल्लखल्लूरिका ।

**मूलधनम्**—वाल्मीकिशास्त्रं सकलकविजनानां मूलधनम् ।

**कुण्डम्**—विशदयशःपयसां कुण्डम् ।

**हिमाचलः**—कीर्तिगङ्गाहिमाचलः ।

**समस्या**—पुण्यानां समस्या, ऋचां वा । आशीर्वचसां वा ।

**जलदः**—भवसंतापतप्तानां चन्द्रमौलिर्धनाघनः ।

**आरामः**—आरामः कीर्त्तिवल्लीनाम् ।

**कार्मणम्**—अमूलमन्त्रतन्त्रं च कार्मणं निर्वृतिश्रियः ।

**कुलमन्दिरम्**—सत्कीर्त्तेः कुलमन्दिरम् ।

**मानसम्**—मानसं गुणहंसानाम् ।

**नगरम्**—नगरं गुणपौराणाम् ।

**कल्पः**—परलोकगतौ कल्पः ।

**प्रतिष्ठानम्**—धर्मपोतप्रतिष्ठानम् ।

**सरोरुहम्**—पुण्यभृङ्गसरोरुहम् ।

**मधुः**—पुण्यभूतोदये मधुः ।

**ग्रीष्मः**—पापपङ्कहतौ ग्रीष्मः । कल्याणवल्लरीकन्दसमुद्भेदतपात्ययः ।

**वर्षाः**—भक्तिकन्दलिनीमेघः ।[1]

**शरत्**—पापपङ्कं तनूकुर्वन् जिनेशः शरदायते ।

**हेमन्तः**—मोहपङ्कजिनीहिमम् ।

**शिशिरः**—कर्मभदन्तनिर्भेदी ।

**परशुः**—योगः सर्वविपद्वल्लीविताने परशुः शितः ।

**वनवह्निः**—संसारद्रुदवानलः ।

**भारतीहस्तपुस्तकः**—गुरुर्विजयतां वन्द्यो भारतीहस्तपुस्तकः ।

**पद्मिनी**—भक्तिश्रीपद्मिनीसूरः ।

**चन्द्रिका**—भवतां (? भविनां) भवतापौघहरी यस्यास्ति देशना ।

**चूतः**—सुकृतारामचूतस्त्वम् ।

**अञ्जनम्**—सुदृशाममृताञ्जनम् ।

**[सु]भाजनम्**—पुण्यमुक्तासुभाजनम् ।

---

१. प्रतौ त्वियं व्याख्या हेमन्तव्याख्यानन्तरं लिखिता ।

**आदर्शः**—नम्रेन्दुवदनादर्शाः पदपद्मद्वयीनखाः ।

**कङ्कणम्**—विद्वानेष चिरं जीयात् भारतीकरकङ्कणम् ।

**प्राची**—पुण्यसूर्योदयप्राची ।

**विन्ध्यशैलः**—वाणीनर्मदाविन्ध्यशैलः ।

सुगुणकरटिसूतौ विन्ध्यशैलो नरेन्द्रः ।

**प्रभोदयः**—पापध्वान्तप्रभोदयः ।

**क्षेत्रम्**—क्षेत्रं सत्कीर्तिबीजानाम् ।

**कन्दः**—कन्दः कल्याणशाखिनः ।

**खनिः**—गुणरत्नमहाखनिः ।

**मूलम्**—मूलं कल्याणवल्लर्याः ।

**अटवी**—भयानकमहाटवी ।

**शत्रम्**—श्रोतृद्विजमहाशत्रम् ।

**आलयः**—कलापौरीमहालयः ।

**दीपः**—तमस्तोमभिदा दीपः ।

**द्वीपः**—भवाम्भोधौ जिनो द्वीपः । मरौ शाखी हिमे शिखी ।

**वृषभः**—वृषः कुलधुरोद्वाहे ।

**स्यन्दनः**—मोक्षपूःस्यन्दनोपमः ।

**पुष्पम्**—पुष्पं पुण्यमहीरुहः ।

**अर्गला**—अर्गला कुगतिद्वारि ।

**द्वारकुञ्चिका**—महानन्दपुरोदारद्वारोद्घाटनकुञ्चिका ।

**हस्तावलम्बनम्**—भवकूपे निपततां देवो हस्तावलम्बनम् ।

**मार्गः**—महानन्दपुरीमार्गः ।

**दिवामुखम्**—मोहध्वान्तदिवामुखम् ।

**प्रभोल्लासः**—शुभपद्मप्रभोल्लासः ।

**क्रीडाभूः**—कलाकलापकमलाक्रीडाभूः ।

**क्रीडोपवनम्**—अतिशयलक्ष्मीक्रीडोपवनम् ।

**तमस्विनी**—पापध्वान्ततमस्विनी ।

**नदीरयः**—मोहद्रुमनदीरयः ।

---

१. बीजश्लोकेषु पूर्वं 'नदीरयः' पश्चात् 'तमस्विनी' इति क्रमः ।

इत्यादिभिः पदैः विशेषणानि कोटिश उत्पद्यन्ते । पद्मं पद्मिनी पद्मोदय इत्यादिपदानां न पौनरुक्त्यं भङ्गान्तरेण भणितत्वात् । तथा श्वेतादिभिः पञ्चभिर्वर्णैरिवादियुक्तैः श्लोका भवन्ति । तद्यथा–

श्रीखण्डद्रवचर्चिता इव डिण्डीरपिण्डमण्डिता इव यस्य यशोभिर्दिशो बभुः, इत्यादि ।

इदानीं दोषबीजमाह–

चन्द्रे लक्ष्माम्बुधौ जाड्यं खरत्वं दिवसेश्वरे ।
कण्टकत्वं च पद्मिन्यां कूटत्वं कनकाचले ॥१६९॥

नग्नत्वं चन्द्रमौलौ च शून्यत्वं व्योममण्डले ।
खड्गे कुशीलता श्लेषे गुणघातश्च कार्मुके ॥१७०॥

स्वपुत्र्यामनुरागश्च प्रोक्तश्च परमेष्ठिनि ।
रुक्मिणीहरणं विष्णौ भरते भ्रातृविग्रहः ॥१७१॥

गजेन्द्रे दानविच्छेदो लक्षणे सर्वलोपता ।
कङ्कणे मध्यशून्यं च (? न्यत्वं) रामे क्रौञ्चविदारणम् ॥१७२॥

परदाराभिगमत्वं वज्रपाणौ प्रकीर्तितम् ।
अचेतनत्वं कल्पद्रौ मात्स्यो न्यायस्तिमौ तथा ॥१७३॥

शून्यवृद्धिर्भवेदङ्के लोलत्वं मृगचक्षुषि ।
स्वर्गे विमानसंसर्गः शून्यताधारणं श्रियः ॥१७४॥

वक्रत्वं छन्दसि गुरौ तुलारोहश्च भास्करे ।
हतोऽश्वत्थामेति गिरोऽसत्यवाचो युधिष्ठिरे ।
वृषव्यापादनं विष्णौ इति दोषाः प्रकीर्तिताः ॥१७५॥

सर्वेऽपि सदोषाः प्रायः पदार्थास्ततः केन समं भवानुपमीयते ? ।

स्पष्टम् ।

असत्संभावनगिरा भवेदर्थो मनीषिणाम् ।

**व्याख्या**—यथाकाशमङ्गुल्यामनुमीयते, यदि पाथोनाथः प्रस्थद्रोणादिभिश्च, यदि शेषस्येव मम सहस्रवक्त्रत्वम्, यदि इन्द्रस्येव नयनसहस्र[त्व]म्, यदि ब्रह्मण इव मम चतुर्वक्त्रत्वं भवेत्, तदा तव गुणा वर्णयितुं मया शक्याः ।

विरुद्धार्थप्रकाशत्वे कोटिशोऽर्थः प्रजायते ॥१७६॥

**व्याख्या**—यद्येवमविनयवती प्रवृत्तिर्भवतोऽपि स्यात्, तदा सुधारुचेर्बिम्बात् कृशानुकणवर्षणम्, मेरोश्चलनम्, पवनस्य ग्रन्थौ बन्धः, शिलायां कमलिनीवपनम्, मृतस्य चर्चा (?) बधिरे गीतम्, अन्धस्य दीपदर्शनम्, पङ्गुपुरुषे पवनगतिः, मूके वावदूकत्वम्, वह्नौ शीतत्वम्, ऊषरे धान्योत्पत्तिः, सुधायां विषोद्गमः इत्यादि।

**सर्वोपमार्थबी**जमारभ्यते, तद्यथा—

क्षमायां तीर्थनाथोऽस्तु दयादाने च बोधिदः ।
गुरुत्वे गगनं स्थैर्ये मेरू रूपे च मन्मथः ॥१७७॥

दाने च बलि-कल्पद्रु-कर्णाद्याः परिकीर्तिताः ।
परप्राणस्य रक्षायै चक्री चक्रायुधः सुधीः ॥१७८॥

जीमूतवाहनस्तद्वत् सत्ये राजा युधिष्ठिरः ।
हरिश्चन्द्रनृपः सत्त्वे सुस्वरत्वे च कोकिलः ॥१७९॥

शुद्धद्वितयपक्षत्वे मरालः कीर्तितो बुधैः ।
प्रतापे सविता सौम्ये चन्द्रो मतौ बृहस्पतिः ॥१८०॥

त्रिमाली खलु प्रासादे कुसुमे मालती तथा ।
तीर्थे शत्रुञ्जयगिरिः पूतत्वे स्वर्धुनीजलम् ॥१८१॥

दुर्वासा महर्षिः कोपे द्यूते नैषधभूपतिः ।
रौहिणेयस्तथा चौर्ये गाम्भीर्ये च महोदधिः ॥१८२॥

पराक्रमे च पारीन्द्रो धैर्ये च धवलो वृषः ।
कार्पण्ये मुर्म(?मम्म)णः श्रेष्ठी लोभे नन्दो महीपतिः ॥१८३॥

कालशौकरिकः प्राणिविघाते कीर्तितो बुधैः ।
पुर्यामयोध्या नगरी मानसं च सरोवरे ॥१८४॥

रामा रूपे रतिर्गौरी शस्त्रे श्रेष्ठा धनुर्लता ।
इन्द्रिये लोचनं प्राहुः सर्वधर्मे तथा दया ॥१८५॥

वञ्चनायां किराटश्च वाद्ये वीणा गुणे क्षमा ।
काञ्चनं धातुषु प्रोक्तं नेपथ्ये मुकुटः स्फुटम् ॥१८६॥

मन्त्रे सारस्वतं सारमुपमा स्यादलंकृतौ।
भोज्ये दध्योदनं सारं सर्वर्तुषु च माधवः ॥१८७॥

सद्ग्रन्थनिर्मितौ व्यास-वाल्मीकि-श्रीत्रिविक्रमाः।
धनञ्जयः कालिदासो माघो भारविरित्यपि ॥१८८॥

बाणो गुणाढ्योऽभिनन्दिः श्रीहर्षो भोजभूपतिः।
सुबन्धुर्धनपालश्च बी(बि)ल्हणो राजशेखरः ॥१८९॥

अथ **जैनाः**—

भगवान् गौतमस्वामी श्रीशय्यम्भवसूरिराट्।
भद्रबाहुर्हरिभद्रः शीलाङ्कः शाकटायनः ॥१९०॥

उमास्वातिप्र .... .... .... .... .... .... ....
[अतः परं पुस्तकस्य पत्रं नष्टम्।]

* *

[कैलासः] किल रावणेन तु जितो बाहुद्वयेनाचलः
श्रीगोवर्द्धनभूधरो मरुजिता तूर्णं च तीर्णोऽर्णवः।
चक्री बाहुबलेन बाहुबलिना भग्नो रणे भूरिशः
तत् सर्वं सुरधामजं विजयते धामोच्चकैर्भूतले ॥१९१॥

तज्जेतुं स्पर्द्धया हस्ते धर्तुं तस्य जिगीषया।
जातं तस्य स्वरूपं च ग्रहीतुं तस्य च श्रियम् ॥१९२॥

**व्याख्या—** प्रासादो विमानानि जेतुमभ्रंलिहशिरा बभूव। अन्येऽपि पदार्था ये तुङ्गत्वे दृश्यन्ते तेषामित्थमर्थोत्पत्तिः। अथवा स्पर्द्धया ममापि किमयमुच्चैस्तर इति तुङ्गत्वे स्पर्द्धया। हस्ते धर्तुमिव(ति) सुगमम्। तस्य जिगीषया इति सुगमम्।

तस्य स्वरूपत्वम् आम्नायत्व-कौलीन्यं वा व्यवस्थां वा न्यासस्थितिं ज्ञातुमुद्यत इव । शेषं सुगमम् ।

इष्टप्राप्त्यै रिपुच्छित्यै कौतुकात् पूर्वजक्रमात् ।
दम्भकैतवशब्देन भवेदर्थस्य संगतिः ॥१९३॥

**व्याख्या–** ये केचन महीतले पदार्थास्ते स्वर्गेऽपि ज्ञेयाः । तद्यथा—प्रासादानामिष्टं विमानं तत्किङ्किणीक्वाणेन आकारयतीव आवर्जयतीव । तथा तुरगाः प्रजविनः व्योममण्डलं गच्छन्तो दिनकररथतुरगमिलनायेव धावन्ति । गजा उच्चैस्तरा ऐरावणेन सह सङ्गतिकरणायेव करान् व्योमगान् कुर्वन्ति । उत्फाला हरिणा हरिणाङ्कहरिणमिलनायेव व्योममण्डलमुत्पतन्ति । य एव **इष्टास्त** एव **रिपवः** कल्पनावशात् । जेतुमित्यादिभिः क्रियाभिः पूर्वे पदार्था योज्यन्ते । **कौतुकात्** प्रासादा उच्चाः कौतुकादिव स्वर्गमनुवर्तन्ते । **दम्भकैतव**शब्देन, तद्यथा—

सिंहवृत्तिस्थितामन्तर्मूर्तामिव बिभर्ति यः ।
सिंहलक्ष्मच्छलाल्लक्ष्म्यै सोऽस्तु वीरजिनेश्वरः ॥१९४॥

यथा वा—

भुजप्रभादण्ड इवोर्ध्वगामी स पातु वः कंसरिपोः कृपाणः ।
यः पाञ्चयज्ञप्रतिबिम्बभङ्ग्या धाराम्भसः फेनमिव व्यनक्ति ॥१९५॥

नेमिं नमामि यं वीक्ष्य चिन्ताधिकफलप्रदम् ।
अपि शङ्खनिधिः शङ्खलक्ष्मव्याजेन सेवते ॥१९६॥

दम्भकैतवशब्दाः पर्यायेण प्रयोज्याः । एवं स्यादर्थ**सङ्गति** । **पूर्वजक्रमादि**— अस्माकं कुले कल्पद्रुमाश्चिन्तितार्थसार्थप्रदायिका अवतेरुरिति हेतोः सहकारकारस्कराः पथिकेभ्यः फलानि प्रयच्छन्ति । जीमूतवाहनकुलोत्पन्ना अतो हेतोः परत्राणपरित्राणे क्षत्रियाः वैपरीत्येन । एवं व्याख्यातम् ।

चरमानुपूर्वीन्यायप्रज्ञापनार्थम् ।

तन्त्रजाले विशाले हि शिशूनां विशतां सताम् ।
क्षोभमभ्येति धीर्मध्येपयोधि पततामिव ॥१८७॥

पद्मोपमप्रभं वक्त्रं रामायाः शोभतेतराम् ।
प्रहृष्यन् सर्वदा यस्मिन् रते भर्ता स्थितिं सृतः ॥१८८॥

द्वितीयं यथा—

भङ्गीमङ्गीकरोत्यस्याः पङ्कजश्रीसखं मुखम् ।
कदाचिदत्र निद्राति नोद्रेकः संवरद्रुहः ॥१८९॥

पदस्य सञ्चारिणी[1]—

राकाकैरविणीकान्तकान्तकान्तिमलिम्लुचा ।
उदितं काममित्रेण देवेन मृगलक्ष्मणा ॥१९०॥

सब्रह्मचारि चारित्रं शरत्कैरविणीपतेः ।
सगोत्रं रात्रिराजस्य सनाभि तुहिनद्युतेः ॥१९१॥

साधर्म्यपदयोजना—

बन्धूकबन्धुतां धत्ते मुग्धे ते मधुरोऽधरः ।
रोमराजेश्च सेवालवल्लीभृङ्गच्छदादिकम् ॥१९२॥

नाभेरावर्त्तचक्रादि तरङ्गादि वलिस्रजः ।
नितम्बस्य तथा चक्रकलधौतशिलादिकम् ॥१९३॥

.............................................. ।
करभेभकरौ(?)रम्भाकाण्डमूर(रु)युगस्य च ॥१९४॥

कृष्णाहि-बर्हिबर्हाभ्यां परै(? दै)रौचित्यशालिभिः ।
कृष्णैस्तु वस्तुभिः साम्यं केशपाशस्य योजयेत् ॥१९५॥

बालपल्लवपद्माद्यैर्ज्ञेयं तत्पादयोस्तथा ।
मत्तेभकलहंसाभ्यां गतौ साधर्म्यमिष्यते ॥१९६॥

पद्मोत्पलानि न परं समानि प्रमदादृशः ।
यावच्चकोरसारङ्गप्रभृतेरपि दृष्टयः ॥१९७॥

---

१. प्रतौ अयं श्लोको पूर्वं लिखितः पश्चात् लोपितः—

इन्दुसौन्दर्यलुण्टाकं शशिकोमलतस्करः ।
चन्द्रबिम्बद्युतिद्रोहि रोहिणीशाभिमानहृत् ॥

दृष्टध्येयानुसारेण मदिरदृष्टिरित्यपि ।
उच्यमाना कवीन्द्राणां समये दृश्यतेऽङ्गना ॥१९८॥

दन्तानां मौक्तिकैः क्वापि वज्ररत्नाङ्कुरैः क्वचित् ।
अन्यैरन्यैश्च साधर्म्यं ज्ञेयं प्रकरणे क्रमात् ॥१९९॥
कुररीकोकिलादीनां गिरा स्त्रीणां समा गिरः ।
पुंसां च सिंहजीमूतमुरजध्वनिमा(?ता)दिभिः ॥२००॥
कुन्दसेफालिकाजातिवासन्तीनवमालिका ।
तगरं मुचुकुन्दं च कुटजं कैरवं तथा ॥२०१॥

सप्तच्छदं कासरोध्रमधूकं च विपाकवत् ।
सिन्दुवारं विचकिलं पिण्डीतगरमित्यपि ॥२०२॥

कीर्त्यादिषु नृपादीनां वर्ण्यमानेषु योजयेत् ।
पुष्पजातेरेवमादि साधर्म्यं विनियोजयेत् ॥२०३॥

साक्षात्क्षीरोद-जाह्नव्यौ सुधाक्षीरादिकं तथा ।
पुण्डरीकं कैरवं च तदुत्थं कुसुमं तथा ॥२०४॥

मृणालकम्बुचन्द्रादि तथा द्रव्यं तदुद्भवम् ।
वलाका राजहंसश्च तथा शङ्करकर्करा ॥२०५॥

एतावन्तं च जानीयाः प्राणिभ्यो धवलत्विषा ।
कैलासं हिमवन्तं च गिरिभ्यो बल-शङ्करौ ॥२०६॥
देवेभ्यस्तद्गिरिभवं स्फटिकं तुहिनं तथा ।
शेषं फणि(?)निर्मोकं सर्वेषामपि भोगिनाम् ॥२०७॥
लवलीव सुगन्धिभ्यः कर्पूरं चन्दनं तथा ।
एवमादिषु शुभ्रार्थवादिशब्देषु दीर्घता ॥२०८॥

समासेन—क्षीरोदलहरीपुरम् । अथवा—

उत्फुल्लवल्लीकुसुमावदातो विद्योततेऽयं रजनीभुजङ्गः ।
सेफालिकागुच्छसनाभिरिन्दुः................ ॥२०९॥
................................................ ।
..................मल्लीपरिचितः शशी ॥२१०॥

प्रतापादि नरेन्द्रादेः शोणं यदि च वर्ण्यते ।
अयमेव क्रमः शोणः द्रव्ये साम्ये तदिष्यते ॥२११॥

रक्ता......................................
........................................ ॥२१२॥

[ अतः परं ग्रन्थस्य पत्रं नष्टम् । ]

+ + +

[ काव्या ]दिषु प्रतापादेर्लोकशास्त्रश्रुतेष्वपि ।
कवीनामेव समयः प्रामाण्यमवगाहते ॥२१३॥

धातु(त)क्यशोकबन्धूकपाटलीकिंशुकादिभिः ।
पिष्टैर्द्रव्यैस्तथान्यैरपिष्टहिङ्गुलकादिभिः ॥२१४॥

प्रवालपद्मरागाद्यैर्मणिभेदैस्तथा परैः ।
बालातपतडिद्वह्निशिखाप्रायैश्च तैजसैः ॥२१५॥

पदार्थसाम्ययोगेन बन्धे रक्तस्य वस्तुनः ।
समान(?स)व्याससमयः कार्यः प्राच्येन वर्णना ॥२१६॥

इन्दीवरातकी(सी)प्रायैः पुष्पैरलिपिकादिभिः ।
प्राणिभिर्मृगनाभ्याद्यैर्द्रव्यैः किं व्यञ्जनादिभिः ॥२१७॥

प्राण्यङ्गजन्मिभिः केशपाशाद्यैरसितं तथा ।
खड्गादि वर्ण्यमानं तु साम्ये प्राग् वर्त(र्ण)नां क्षिपेत् ॥२१८॥

श्वेतवस्तुषु हासादे रोषादे रक्तवस्तुषु ।
साम्येन योज्यमानस्य विज्ञेयं कविकोविदैः ॥२१९॥

**राजद्वारवर्णनबीजानि—**

अतिष्ठच्च नातिदूरे राजभवनस्य निर्वर्तितस्नानाशनव्यतिकरः, विश्रान्तश्च मेखलकेन सह । याममात्रा[व]शेषदिवसे भुक्तवति भूभुजि प्रख्यातानां क्षितिभुजां शिबिरसन्निवेशान् वीक्षमाणः शनैः शनैः पट्टबन्धार्थमुपस्थापितैश्च डिण्डिमाधिरोहणायाहृतैश्चाभिनवबद्धैश्च विक्षेपोपार्जितैश्च को(कौ)शलिकागतैश्च प्रथमदर्शनकुतूहलोपनीतैश्च नागवीथीपालप्रेषितैश्च दूतसंप्रेषणप्रवेशितैश्च पल्लीपरिवृढढौकितैश्च स्वेच्छायुद्धक्रीडाकौतुककारितैश्च दीयमानैश्चाच्छिद्यमानैश्च मुच्यमानैश्च यामावस्थापितैश्च सर्वद्वीप-

जिगीषया गिरिभिरिव सागरसेतुबन्धार्थमेकीकृतैर्ध्वजपटपटुपटहशङ्खचामराङ्गरागरमणीयैः पुष्पाभिषेकदिवसैरिव कल्पितैर्वारणेन्द्रैः श्यामायमानम्, अनवरतचलितखुरपुटप्रहतमृदङ्गैश्च नर्त्तयद्भिरिव राजलक्ष्मीमुपहसद्भिरिव सृक्कपुटप्रसृतप्रकरफेनाट्टहासेन जन(व)जडजङ्घां हरिणजातिमाकारयद्भिरिव संघट्टहेतोर्हर्षहेषितेनोच्चैरुच्चैःश्रवसमुत्पतद्भिरिव दिवसकररथतुरगरुषा पक्षायमाणमण्डनचामरमालैर्गगनतलं तुरङ्गैस्तरङ्गायमानम्, अन्यत्र प्रेषितैश्च प्रेष्यमाणैश्च प्रेषितप्रतिनिवृत्तैश्च बहुयोजनगमनगणनसंख्याक्षरावलीभिरिव वराट(टि)कावलीभिर्घटितमुखमण्डनकैस्तारकितैरिव संध्यातपच्छेदैररुणचामरिकारचितकर्णपूरैः सरक्तोत्पलैरिव रक्तशालिशालेयैरनवरतझणझणायमानचारुचामीकरपु(घु)रुपु( घु )रुकमालिकैर्जरत्करञ्जवनैरिव रणितशुष्कबीजकोशीशतैः श्रवणोपान्तप्रेङ्खत्पञ्चरागवर्णोर्णाचित्रसूत्रजूटजटालैः कपिकपोलकपिलैः क्रमेलककुलैः कपिलायमानम्, अन्यत्र शरज्जलधरैरिव सद्यः-स्रुतपयःपटलधवलतनुभिः कल्पपादपैरिव मुक्ताफलजालकजायमानालोकलुप्तच्छायामण्डलैर्नारायणनाभिपुण्डरीकैरिवाश्लिष्टगरुडपक्षैः क्षीरोदोद्देशैरिव द्योतमानविकटविद्रुमदण्डैः शेषफणाफलकैरिवोपरिस्फुरत्स्फीतमाणिक्यखण्डैः श्वेतगङ्गापुलिनैरिव राजहंसोपसेवितैरभिभवद्भिरिव निदाघसमयं परिहरद्भिरिव विवस्वतः प्रतापमापिबद्भिरिवातपं चन्द्रलोकमयमिव जीवलोकं जनयद्भिः कुमुदमयमिव कालं कुर्वद्भिर्ज्योत्स्नामयमिव वासरं विरचयद्भिः[1] फेनमयीमिव दिवं दर्शयद्भिरकालकौमुदीसहस्राणीव सृजद्भिर(रु)पहसद्भिरिव शातक्रतवीं श्रियं श्वेतायमानैरातपत्रखण्डैः श्वेतद्वीपायमानम्, क्षणनष्टदृष्टाष्टदिङ्मुखं च मुष्णद्भिरिव भुवनमाक्षेपोत्क्षेपदोलायितं दिनं [गता]श(ग)तानीव कारयद्भिरुत्सारयद्भिरिव कुनृपतिसंपर्ककलङ्ककालीं कालेयीं स्थितिं विकचविशदकाशवनपाण्डुरदशदिशं शरत्समयमिवोपपादयद्भिर्बिसतन्तुमयमिवान्तरिक्षमाविर्भावयद्भिः शशिकरशुचीनां चलतां चामराणां सहस्रैर्दोलायमानम्, अपि च हंसयूथायमानं करिकर्णशङ्खैः, कल्पलतावनायमानं कदलि—काभिः, माणिक्यवृक्षरोचनायमानं मायूरातपत्रैः, मन्दाकिनीप्रवाहायमानमंशुकैः, क्षीरोदायमानं मरकतमयूखैः, जन्यमानान्यदिवसमिव पद्मरागबालातपैः, उत्पद्यमानापराम्बरमिवेन्द्रनीलप्रभापटलैः, आरभ्यमाणापूर्वनिशमिव महानीलमयूखान्धकारैः, स्यन्दमानानेककालिन्दीसहस्रमिव गरुडमणिप्रभाप्रतानैः, अङ्गाराङ्कितमिव पुष्परागरश्मिभिः, कैश्चिदधोमुखैश्चरणनखपतितवदनप्रतिबिम्बनिभेन प्रवेशमलभमानैर्लज्जया स्वाङ्गानीव विशद्भिः कैश्चिदङ्गुलीविलिखितायाः क्षितेर्विकीर्यमाणकरनखकिरणकदम्बव्याजेन सेवाचामराणीवार्पयद्भिः कैश्चिदुर[ः]स्थलदोलायमानेन्द्रनीलतरलप्रभापट्टैः स्वामिप्रकोपप्रशमनाय कण्ठबद्धकृपाणपट्टैः-

१. अतः परं प्रतौ 'फेनमयमिव वासरं विरचयद्भिः' इति लिखितम्, परं पुनरुक्तमेवेति परिहृतम्।

रिव कश्चिदुच्छ्वाससौरभभ्राम्यद्भ्रमरपटलान्धकारितमुखैरपहृतलक्ष्मीशोकधृतलम्बश्मश्रुभिरिवान्यैः शेखरोड्डीयमानमधुपमण्डलैः प्रणामविडम्बमानाभयपलायमानमौलिभिरिव निर्जितैरपि[1] सुसंमानितैरिवानन्यशरणैरन्तरान्तरा निष्पततां प्रविशतां चान्तरप्रतीहाराणामनुमार्गप्रधावितानेकार्थिजनसहस्राणामनुयायिनः पुरुषानश्रान्तैः पुनः पुनः पृच्छद्भिः ‘भद्र, अद्य भविष्यति भुक्त्वास्थाने दास्यति दर्शनं परं परमेश्वरः, निष्पतिष्यति वा बाह्यां कक्ष्याम्, इति दर्शनाशया दिवसं नयद्भिर्भुजनिर्जितैः शत्रुमहासामन्तैः समन्तादासेव्यमानम्, अन्यैश्च प्रतापानुरागागतैर्नानादेशजैर्महीपालैः प्रतिपालयद्भिर्नरपतिदर्शनकालमध्यास्यमानम्, एकान्तोपविष्टैश्च जैनैरार्हतैः पाशुपतैश्च पाराशरिभिश्च सर्वदेशजन्मभिश्च जनपदैः सर्वाम्भोधिवेलावनवलयवासिभिश्चम्लेच्छजातिभिः सर्वद्वीपान्तरगतैश्च दूतमण्डलैरुपास्यमानम्, सर्वप्रजानिर्माणभूमिमिव प्रजापतीनां लोकत्रयसारोच्चयरचितं चतुर्थमिव लोकम्, महाभारतशतैरप्यकथनीयसमृद्धिसंभारम्, कृतयुगसहस्रैरिव कल्पितसन्निवेशम्, स्वर्गार्बुदैरिव विहितरामणीयकम्, राजलक्ष्मीकोटिभिरिव कृतपरिग्रहं राजद्वारमगमत् ।

[ **हर्षचरिते** द्वितीयोच्छ्वासे ]

योगैर्लग्नैश्च नक्षत्रैर्ग्रहैर्वारैश्च सप्तभिः ।
लक्षणैर्जायते काव्यं **बप्पभट्टि**प्रसादतः ॥२२०॥

**व्याख्या**—विष्कम्भाद्या योगाः । योग इव सप्रीतिरायुष्मान् भवान् । सौभाग्यहृदयः शोभनः कर्मणि सर्वत्र सुकर्मा सधृतिः । शूलं दुष्कर्मकर्तृणाम् । इत्यादिभिः पदैरुत्पद्यन्ते श्लेषाः ।

तिथिरिव प्रतिपदाधिष्ठायी । सदा द्वितीयालंकृतः ।

साक्षाल्लग्नमय इव सवृषः सिंहभासुरः सधनुः समकरः—इत्यादि । सल्लग्नोऽपि न मेषारूढ इति ।

नक्षत्रश्लेषाः— अश्विनीसेनाबन्धुरः । सन्मार्गैः साद्रः नक्षत्रमयोऽपि न रौद्रयावशयाश्रितः सकरः सचित्रः सज्येष्ठो मूलाधिष्ठितः सुश्रवणः—इत्यादि ।

[ग्रहश्लेषाः—] सूर्य इव सुदिनकरः । स वा सोमः स मङ्गलो बुधाधिष्ठितः स गुरुः स कविः शनैश्चरोऽपि न मन्दः—इत्यादि ।

लक्षणमय इव सुस्वरः समानवचनः सुवर्णसवर्णः ।
पूर्वो ह्रस्वः परो दीर्घो जिनेन्द्र तव दर्शनात् ।

---

१. प्रतौ ‘निस्तर्जितैरपि’ इति पाठः ।

पूर्वोऽभ्यासस्तवारीणां संग्रामे यत् पलायनम् ।
इदानीं द्वयमभ्यस्तं वने वासो दरिद्रता ॥२२१॥
पूर्वोऽभ्यासः समस्तोऽपि रूपसिद्धौ गतो मम ।
इदानीं द्वयमभ्यस्तं भोजनं शयनं तथा ॥२२२॥
पण्याच्छिल्पान्नियोगाच्च क्रीतादेरायुधादपि ।
वित्तमादाय लोकोऽयं सर्वः स्त्रीषु निमज्जति ॥२२३॥
इरग्निः स्यान्ममाप्येवं शर्ववर्ममतं मतम् ।
दन्दहीति मनोऽरण्यं कामिनां कथमन्यथा ॥२२४॥
स्यातां यदि पदे द्वे तु यदि वा स्युर्बहून्यपि ।
तथापि बद्धमुष्टित्वं न त्यजन्ति नियोगिनः ॥२२५॥
स्त्री नदीवदिदं सत्यं रसेनार्गलिता सती ।
यतो ध्वंसं विधत्तेऽसौ कूलवत् कुलयोर्द्वयोः ॥२२६॥
गुणबाधिका न वृद्धिः प्रकृतिप्रत्ययविभक्तिलोपो वा ।
न भवति तथापवादो न व्याकरणस्थितिरिदानीम् ॥२२७॥
दुषिधातोरिवास्माकं दोषनिष्पत्तये गुणः ।
पश्य गोघट किं कुर्मः कर्मणामिदृशी गतिः ॥२२८॥

तथा चौडललाटसन्ध्यक्षराणि वाचय । सव्यञ्जनाः सुलोचनाः, परापवादेष्वघोषाः, घोषवन्तः कृत्येन, अन्तःस्था धर्मकृत्येषु, सोष्माणः परविग्रहेषु, सर्वदा लिङ्गप्रकाशितविभक्तयः सदागमाः सश्रद्धाः प्रकाशितवंश्यसर्वनामानः सत्कारका ईप्सितार्थरक्षकाः संप्रदानप्रगुणा योधा वैयाकरणा इवाधिकरणप्रियाः । मुनयः पूर्ववत् विदलितकरणाः शुभकर्माणः सहेतवः । द्विगुना तत्पुरुषेणाधिष्ठिता दृश्यमानबहुव्रीहयः केदाराः । द्वन्द्वस्थाः क्षत्रियाः सतद्धिताः कृतापत्यप्रत्ययाः सवृद्धयः ।

ये ददति परस्मैपदं नात्मनेपदम् । क्रियाभावा वर्तमानेन वर्तन्ते न परोक्षाचारेण सप्रयोगाः सानुमतयः । आचाराल्लब्धोपमाना न द्विरुक्तिप्रियाः कृतसंप्रसारणाः परेषाम् । गुणिनः ससिद्धयः– इत्यादि लक्षणपदैः प्रज्ञानुमानतः काव्यम् ।

इति काव्यतत्त्वबीजं हृदयस्थलमुप्तमतुलरससिक्तम् ।
उत्पादयति मनोज्ञं यशःफलं विनयमहनीयम् ॥२२९॥

इत्याचार्यश्री**विनयचन्द्र**लिखितायां **काव्यशिक्षायां**
**विनयाङ्कायां बीजव्यावर्णनो** नाम चतुर्थः परिच्छेदः ॥

१ सकरः–सहस्तः [–सं०] ।

# ५. अनेकार्थशब्दसंग्रहपरिच्छेदः ।

## (१) एकाक्षरकाण्डः ।

[ अत्र ग्रन्थस्य पत्रे विनष्टे, अयं काण्डो लुप्तः । ]

## (२) द्व्यक्षरकाण्डः

[ नष्टे पत्रे, अस्य काण्डस्य कश्चिदारम्भिकोंऽशो लुप्तः । ततः परम्—]

[ **नागो** ] मतङ्गजे सर्पे पुन्नागे नागकेसरे ।
क्रूराचारे नागदन्ते मुस्तके वारिदेऽपि च ॥१॥

**फल्गुः** काकोदुम्बरिकावृक्षे निरर्थकेऽपि च ।
**भगोऽ**र्क-ज्ञान-माहात्म्य-यशो-वैराग्य-मुक्तिषु ॥२॥

रूप-वीर्य-प्रयत्नेच्छा-श्री-धनैश्वर्य-योनिषु ।
राज्ये वेश्याभृतौ **भोगः** सुखे च सर्पविग्रहे ॥३॥

पालना-ऽभ्यवहारे च फणेऽष्टासु निगद्यते ।
**मार्गो** मृगमदे मासे सौम्यर्क्षेऽन्वेषणे पथि ॥४॥

**मृगः** कुरङ्गे याच्ञायां मृगयायां गजान्तरे ।
पशौ नक्षत्रभेदे च **मृगी** तु वनितान्तरे ॥५॥

अलब्धलाभे सङ्गत्यां कार्मण-ध्यान-युक्तिषु ।
वपुः-स्थैर्य-प्रयोगेषु सन्नाहे भेषजे धने ॥६॥

विष्कम्भादावुपाये च **योगो** विस्रम्भघातिने(नि) ।
नृत्य-युद्धक्षितौ **रङ्गो** **रागः** स्याल्लोहितादिषु ॥७॥

गान्धारादौ च क्लेशाद्येऽनुरागे मत्सरे नृपे ।
**वङ्गः** कर्पासे वृन्ताके **वङ्गा** जनपदान्तरे ॥८॥

रय-प्रवाहयो**र्वेगः** **शृङ्गं** चिह्न-विषाणयोः ।
क्रीडाम्बुयन्त्रे शिखरे प्रभुत्वोत्कर्ष-सानुषु ॥९॥

उत्साहे निश्चयेऽध्याये मोहा-ऽनुमति-सृष्टिषु ।
त्याग-स्वभावयोः **सर्गः** स्या**दर्घो** मूल्य-पूजयोः ॥१०॥

दुःखैनो-व्यसनेऽघः स्याद् मेघस्तु मुस्तकाब्दयोः ।
दीन-निष्फलयोर्मोघो मोघा स्यात् पाटलातरौ ॥११॥

श्लाघोपास्तीच्छयोः स्तोत्रेऽर्चा पूजा-प्रतिमास्वपि ।
कचः शुष्कव्रणे केशे बन्धे पुत्रे च गीष्पतेः ॥१२॥

काञ्ची गुञ्जा-मेखलयोः पुर्यां क्रौञ्चो द्वीपे खगे ।
चर्चा स्याच्चर्ममुण्डायां चिन्ता-स्थासकयोरपि ॥१३॥

मोचा शाल्मलि-कदल्योर्नीचः पामर-खर्वयोः ।
अजश्छागे हरे विष्णौ रघुजे वेधसि स्मरे ॥१४॥

अब्जो धन्वन्तरौ चन्द्रे शङ्खेऽब्जं पद्म-संख्ययोः ।
द्विजो विप्र-क्षत्रिययोर्वैश्ये दन्ते विहङ्गमे ॥१५॥

गुञ्जा तु कृष्णलायां स्यात् पटहे मधुरध्वनौ ।
शिश्ने चिह्ने पताकायां ध्वजः पूर्वदिशो गृहे ॥१६॥

शौण्डिकेऽपि च खट्वाङ्गे निजो नित्य-स्वकीययोः ।
सन्ततौ च प्रजा लोके बले बीजं तु रेतसि ॥१७॥

स्यादाधाने च तत्त्वे च हेतावङ्कुरकारणे ।
भुजो बाहौ करे मर्जूः शुद्धौ च रजकेऽपि च ॥१८॥

राजी रेखायां पङ्क्तौ च रुजा त्वामय-भङ्गयोः ।
लाजास्तु भृष्टधान्ये स्युर्लाजः स्यादार्द्रतण्डुले ॥१९॥

उशीरके पुनर्लाजं गोष्ठ-संघा-ऽध्वसु व्रजः ।
वाणिज्ये करणभेदे वणिग् वाणिज्यजीविनि ॥२०॥

व्याजः शाठ्येऽपदेशे च वाजं सर्पिषि वारिणि ।
यज्ञान्ने वाजस्तु पक्षे मुनौ निस्वन-वेगयोः ॥२१॥

लञ्जः पट्टे च कच्छे च सज्जो सन्नद्धसम्भृतौ ।
यज्ञः स्यादात्मनि मखे नारायण-हुताशयोः ॥२२॥

संज्ञा नामनि गायत्र्यां हस्ताद्यैरर्थसूचने ।
चेतना-ऽर्कस्त्रियोर्नूनं संज्ञा धियां प्रकीर्तिताः ॥२३॥

**अट्टो** हट्टा-ऽट्टालकयोर्भृशे चतुष्क-भक्तयोः ।
**काण्डो** नालेऽधमे वर्गे द्रुस्कन्धेऽवसरे शरे ॥२४॥

सह-श्लाघा-ऽम्बुषु स्तम्बे **क्रीडा** केल्यामनादरे ।
**गुडः** कुञ्जरसन्नाहे गोलकेक्षुविकारयोः ॥२५॥

**भाण्डं** मूलवणिग्वित्ते तुरङ्गाणां च मण्डने ।
नदीकूलद्वयीमध्ये भूषणे भाजनेऽपि च ॥२६॥

**ऊर्णा** भ्रूमध्यगावर्ते मेषादीनां च लोमनि ।
**ऋणं** देये जले दुर्गे **कणो** धान्यांश-लेशयोः ॥२७॥

**कणा** जीरक-पिप्पल्योः **कर्णश्**चम्पापतौ श्रुतौ ।
**क्षणः** कालविशेषे स्यात् पर्वण्यवसरे महे ॥२८॥

**कृष्णा** तु नील्यां द्रौपद्यां पिप्पली-द्राक्षयोरपि ।
जिनेन्द्र-पूज्ययो**रर्हत् कान्ता** प्रियङ्गु-योषितोः ॥२९॥

**कीर्तिर्**यशसि विस्तारे प्रासादे कर्दमेऽपि च ।
**कृतं** पर्याप्त-युगयोः **केतुर्**द्युति-पताकयोः ॥३०॥

पितृ-सगोत्रयो**र्ज्ञातिस्तिक्त**श्च सुरभौ रसे ।
**धृतिर्**योगविशेषे स्याद्धारणा-धैर्ययोः सुखे ॥३१॥

संतोषा-ऽध्वरयोश्चापि **पङ्क्तिर्**गौरव-पाकयोः ।
**पूर्त्तं** पूरितखाताद्यो**र्वृतिर्**वरण-वाटयोः ॥३२॥

**सूतः** पारद-सारथ्यो**र्गाथा** वाग्भेद-वृत्तयोः ।
**तीर्थं** शास्त्रे गुरौ यज्ञे पुण्यक्षेत्रा-ऽवतारयोः ॥३३॥

ऋषिजुष्टे जले सत्रिण्युपाये स्त्रीरजस्यपि ।
योनौ पात्रे दर्शनेषु [**पीथो**ऽर्के **पीथमम्बुनि**] ॥३४॥

**रथस्तु** स्यन्दने पादे शरीरे वेतसद्रुमे ।
**छन्दो** वशेऽभिप्राये च **भसद्**भास्वर-मांसयोः ॥३५॥

**मन्दो** मूढे शनौ रोगिण्यलसे भाग्यवर्जिते ।
गजजातिप्रभेदेऽल्पे स्वैर मन्दरते खले[1] ॥३६॥

—०— ❀ —०—

.... .... .... [**हंसो**ऽर्के मत्सरेऽच्युते ॥३७॥
खगा]श्वयोनि-मन्त्रादिभेदेषु परमात्मनि ।
निर्लोभनृपतौ प्राणवाते श्रेष्ठेऽग्रतः स्थितः ॥३८॥

## इति [द्व्यक्षरो] द्वितीयः काण्डः ।

## (३) त्र्यक्षरकाण्डः ।

**कनकं** चम्पके स्वर्णे धत्तूरे नागकेशरे ।
कालीये काञ्चनारे च दाडिमे च कमण्डलौ ॥३९॥

**नरको** निरये दैत्ये सीधुपाने च सीधुनि ।
**जनकः** पितृ-राजर्षौ **युतकं** संशये युगे ॥४०॥

**कृषि(ष)कः** कर्षके फाले **रजको** धावके शुके ।
**मधुको** बन्दिभेदे स्या**दणुको** निपुणा-ऽल्पयोः ॥४१॥

**प्रियकः** पीतशाले स्यान्नीपे चित्रमृगेऽलिनि ।
**यमकं** यमजे शब्दालङ्कारे संयमेऽपि च ॥४२॥

**तिलकं** चित्रके प्राहुः **कुलिको** नागभेदके ।
**कुशिकः** स्यान्मुनौ तैलशेषे सर्जा-ऽक्षवृक्षयोः ॥४३॥

**कटकं** वलये सानौ राजधानी-नितम्बयोः ।
**रुचकं** मण्डलद्रव्ये ग्रीवाभरण-दन्तयोः ॥४४॥

**आढकं** मानभेदे स्यात् तुवर्या**माढकी** मता ।
**तारकः** कर्णधारे च दैत्ये दृशि च **तारकम्** ॥४५॥

कनीनिकायां नक्षत्रे **तारकं तारका**पि च ।
**नायको** नेतरि श्रेष्ठे हारमध्यमणावपि ॥४६॥

---

१ अतः परं ग्रन्थस्य पत्रं नष्टम् ।

**बालको**ऽश्वे शिशौ केशे वाजि-वारणवालधौ ।
अङ्गुलीयकः-ह्रीबेर-पारिहार्येषु **बालकम्** ॥४७॥

**पिनाको** हरकोदण्डे पांशुवर्ष-त्रिशूलयोः ।
**मोदको** हर्षके ज्ञेयः खाद्यभेदे च **मोदकम्** ॥४८॥

**रूपकं** नाटके धूर्ते काव्यालङ्करणेऽपि च ।
**कौशिको** नकुले व्यालग्राहे गुग्गुल-शुक्रयोः ॥४९॥

**नालीकं** पद्मखण्डेऽब्जे **नालीकः** शर-शल्ययोः ।
**नन्दको** हरिखड्गे च हर्षके कुलपालके ॥५०॥

**तूलिका** कथिता लेख्यकूर्चिका-तूलशय्ययोः ।
**ऊर्मिका** त्वङ्गुलीये स्याद् वस्त्रभङ्ग-तरङ्गयोः ॥५१॥

**अलर्को** धवलार्के स्याद् योगोन्मादितशुन्यपि ।
**आन्तको** रुजि शङ्कायां सन्तापे मुरजध्वनौ ॥५२॥

**कुलकः** कुलप्रधाने वल्मीके काकतिन्दुके ।
**चित्रकस्तु** चित्रकाये द्रुमौषधिविशेषयोः ॥५३॥

**पताका**ऽङ्के ध्वजे केतौ सौभाग्ये नाटकांशके ।
**भूमिका** तु रचनायां रूपान्तरपरिग्रहे ॥५४॥

**स्वस्तिको** मङ्गलद्रव्ये गृहभेद-चतुष्कयोः ।
**दुर्मुखो** मुखरे नागराजे वाजिनि वानरे ॥५५॥
जातीफले नरश्रेष्ठे **पुन्नागः** पादपान्तरे ।
**कवचस्तु** तनुत्राणे पटहे नन्दिपादपे ॥५६॥

**कुक्कुटः** कुक्कुभे ताम्रचूडे **वह्निकणे**ऽपि च ।
प्रतापिनि **प्रचण्डः** स्यात् **प्रकाण्डः** स्तम्ब-शस्तयोः ॥५७॥

**आषाढो** मलयगिरौ व्रतिदण्डे च मासि च ।
शच्यां निर्गुण्ड्या**मिन्द्राणी** ललनाकरणेऽपि च ॥५८॥

**करुणा** तु कृपायां स्यात् **करणं** क्षेत्र-गात्रयोः ।
गीताङ्गहारसंवेशभित्सु कायस्थसंहतौ ॥ ५९ ॥

वर्णानां स्पष्टतादौ च योगिनामासनादिषु ।
हृषीके साधकतमे ववादौ च कृतावपि ॥६०॥

**कङ्कणं** करभूषासु **कल्याणं** हेम्नि मङ्गले ।
**काकिणी** मानदण्डे स्यात् तुरीयांशे पणस्य च ॥६१॥

**तरुणः** कुब्जवृक्षे स्यादेरण्डे यूनि नूतने ।
**निर्वाणं** मोक्ष-निर्वृत्योर्विध्याते करिमज्जने ॥६२॥

**पक्षिणी** पूर्णिमा-खग्योः शाकिनी-रात्रिभेदयोः ।
**श्रवणो** नक्षत्रभेदे **श्रवणं** श्रवसि श्रुतौ ॥६३॥

**सुषेणो** विष्णु-सुग्रीववैद्ययोः करमर्दके ।
**हरिणौ** पाण्डु-सारङ्गौ **सुपर्णः** कृतमालके ॥६४॥

**अजित**स्तीर्थकृद्भेदे बुद्धे विष्णावनिर्जिते ।
**अनन्तं** खे निरवधाव**नन्त**स्तीर्थकृद्भिदि ॥६५॥

**अथायतिः** स्यात् प्रभावोत्तरकालसमागमे ।
**आसत्तिः** संगमे लाभेऽप्**यापत्तिः** प्राप्ति-दोषयोः ॥६६॥

**किरातः** स्यादल्पतनौ भूनिम्ब-म्लेच्छयोरपि ।
**गोपतिः** शङ्करे षण्ढे नृपतौ त्रिदशाधिपे ॥६७॥

सहस्रकिरणे चापि **जगती** छन्दसि क्षितौ ।
**निशान्तं** सदने शान्ते प्रभातेऽपि निगद्यते ॥६८॥

**पर्वतो** गिरि-देवर्ष्योः **पक्षतिः** प्रतिपत्तिथौ ।
**वसतिः** स्यादवस्थाने निशायां सदनेऽपि च ॥६९॥

**विनतः** प्रणते भुग्ने **विनता** पिटिकाभिदि ।
**सिद्धार्थः** सर्षपे शाक्यसिंहेऽन्त्यजिनवप्तरि ॥७०॥

**सम्बाधः** सङ्कटे योनौ **अर्जुनः** पार्थ-हैहये ।
**कुण्डली** वरुणे सर्पे मयूरे कुण्डलान्विते ॥७१॥

**दर्शनं** दर्पणे धर्मोपलब्ध्योर्बुद्धि-शास्त्रयोः ।
स्वप्न-लोचनयोश्चापि **दशनं** वर्म-दंशयोः ॥७२॥

**धावनं** तु गतौ शौचे **पद्मिनी** योषिदन्तरे ।
**विटपः** पल्लवे स्तम्बे विस्तारे षिङ्ग-शाखयोः ॥७३॥

**वृषभः** स्यादादिजिने वृष-पुङ्गवयोरपि ।
**गौतमो** गणभृद्भेदे शाक्यसिंहर्षिभेदयोः ॥७४॥

**सुषीमः** शिशिरे रम्ये **सत्तमः** श्रेष्ठ-पूज्ययोः ।
**विदुरो** नागरे धीरे धृतराष्ट्रानुजेऽपि च ।
**अङ्गुलिः** करशाखायां कर्णिकायां गजस्य च ॥७५॥

## इति त्र्यक्षरः काण्डस्तृतीयः ।

## (४) चतुरक्षरकाण्डः ।

**अलमकः** पिके भृङ्गे मधुके पद्मकेसरे ।
**बलाहको** गिरौ मेघे दैत्य-नागविशेषयोः ॥७६॥

**वृन्दारकः** सुरे श्रेष्ठे मनोज्ञे च [प्र]कीर्तितः ।
**नियामकः** कर्णधारे पोतवाहे नियन्तरि ॥७७॥

**विनायक**स्तु हेरम्बे तार्क्ष्ये विघ्ने जिने गुरौ ।
**भट्टारकः** सुरे राज्ञि कथितश्च तपोधने ॥७८॥

**दासेरकः** स्यात् करभे दासीपुत्रे च धीवरे ।
**कृकवाकु**स्ताम्रचूडे मयूर-कृकलासयोः ॥७९॥

**गोमेदकं** पीतरत्ने काकोले पत्रकेऽपि च ।
सहकारे गणधरे **पुण्डरीको**ऽग्निदिग्गजे ॥८०॥

**पुण्डरीकं** सिताम्भोजे राजिलाहौ गजज्वरे ।
कोशकारान्तरे व्याघ्रे **बलाहको**ऽम्बुदे गिरौ ॥८१॥

दैत्ये नागे च निर्दिष्टो **भयान**कस्तु भीषणे ।
**महाशङ्खो** निधिभेदे संख्याभेदे नरास्थनि ॥८२॥

**शिलीमुखो**ऽलौ बाणे **चापवर्ग**स्त्याग-मोक्षयोः ।
**संप्रयोगो** निधुवने सम्बन्धे कार्मणेऽपि च ॥८३॥

**द्विजराज**स्तु शेषे स्यात् तार्क्ष्येऽपि च निशाकरे ।
**धर्मराज**स्तु सुगते श्राद्धदेवे युधिष्ठिरे ॥८४॥

**भारद्वाजः** पक्षिभेदे बृहस्पतिसुतेऽपि च ।
**तुलाकोटि**र्मानभेदेऽर्बुदे स्यान्नूपुरेऽपि च ॥८५॥

**कलकण्ठः** पिके पारावते हंसे कलध्वनौ ।
**वैतरणी** प्रेतनद्यां जनन्यामपि रक्षसाम् ॥८६॥

**शिखरिणी** वृत्तभेदे रोमाली-पेयभेदयोः ।
**दिवाभीतः** काकरिपौ कुम्भिले कुमुदाकरे ॥८७॥

**नागदन्तो** हस्तिदन्ते गेहान्निःसृतदारुणि ।
**प्रजापति**र्ब्रह्म-राज्ञोर्जामातरि दिवाकरे ॥८८॥

वह्नौ त्वष्टरि दक्षादौ **प्रतिकृति**स्तु पूजने ।
**पुष्पदन्त**स्तु दिङ्नागे जिनभेदे गणान्तरे ॥८९॥

**आशाबन्धः** समाश्वासे मर्कटस्य च वासके ।
**महानादो** महाकाष्ठे महाध्वाने शयानके ॥९०॥

**आस्कन्दनं** तिरस्कारे संशोषण-समीकयोः ।
**वर्द्धमानो** वीरजिने स्वस्तिकैरण्ड-विष्णुषु ॥९१॥

प्रश्नभेदे शरावे च **विष्वक्सेनो** जनार्दने ।
**अनुशयः** पश्चात्तापे दीर्घद्वेषा-ऽनुबन्धयोः ॥९२॥

**अवतार**स्तु नद्यादितीर्थेष्ववतरेऽपि च ।
**उपचार**स्तु लञ्चायां **कुम्भकारः** प्रजापतौ ॥९३॥

**घनसार**स्तु कर्पूरे दक्षिणावर्तपारदे ।
**चक्रधरो** विष्णु-सर्प-चक्रिषु ग्रामजालिनि ॥९४॥

**दण्डधारो** यमे राज्ञि **दिगम्बर**स्तु शङ्करे ।
**देहयात्रा** यमपुरीगमने भोजनेऽपि च ॥९५॥

**द्वैमातरो** जरासन्धे हेरम्बे परिकीर्तितः ।
**प्रतिसर**श्चमूपृष्ठे नियोज्य-करसूत्रयोः ॥९६॥

बलभद्रस्त्वनन्ते स्यान्महावीरो जिने भटे ।
रागसूत्रं पट्टसूत्रे तुलासूत्रेऽपि च क्वचित् ॥९७॥

समाहारस्तु संक्षेप एकत्रकरणेऽपि च ।
मणिमाला स्त्रियां हारे दशनक्षतभिद्यपि ॥९८॥

मुक्ताफलं घनसारे मौक्तिके लवलीफले ।
जीवितेशः प्रिये मृत्यौ पलंकषा च किंशुके ॥९९॥

कलहंसो राजहंसे कादम्बे नृपसत्तमे ।
गन्धवहो मृगे वाते तमोपहो जिने रवौ ॥१००॥

इति चतुरक्षरः चतुर्थः काण्डः ।

## (५) पञ्चाक्षरकाण्डः ।

स्यादाच्छुरितकं हास-नखघातविशेषयोः ।
जलकरङ्कः स्यान्मेघे नालिकेरतरोः फले ॥१०१॥

कथाप्रसङ्गो वातूले विषस्य च चिकित्सके ।
वृषभध्वजः प्रथमजिनेन्द्रे शशिशेखरे ॥१०२॥

तमालपत्रं तिलके तापिच्छे पत्रकेऽपि च ।
अर्धपारावतंश्चित्रकण्ठे स्यात् तित्तिरावपि ॥१०३॥

इति पञ्चाक्षरः पञ्चमः काण्डः ।

## (६) अव्ययार्थकाण्डः[२] ।

[एकस्वराः—अ स्वल्पार्थेऽप्यभावेऽपि । यथा—]

अ—अल्पमपि प्रत्याख्यानमावृण्वन्ति अप्रत्याख्यानावरणाः क्रोधादयः । अभावे यथा—असंशयं क्षत्रपरिग्रहक्षमा० [अभिज्ञान० १,२२] ।

अथ आकारौ—स्यादा स्मरण-वाक्ययोः । स्मरणे यथा—आ ज्ञातं मधुलम्पटैर्मधुकरैः॰ इति । वाक्ये यथा—आ एवं नु मन्यसे ।

---

१. अयं तु षडक्षरः शब्दः ।

२. अयं काण्डो बहुशोऽनेकार्थसंग्रहस्य परिशिष्टकाण्डादुद्धृतो दृश्यते ।

**इ** स्यात् खेदे प्रकोपोक्तौ । यथा–अस्य कण्ठे इ ईक्षिता ।
**ई** क्रोधे दुःखभावने । यथा–ई दृशि रतिः कथम् ।
**उ** रोषोक्त्यामन्त्रणार्थयोः । यथा–उ मा इति [कुमार ०१,२६]

**उं** प्रश्नेऽङ्गीकृतौ रोषे ।

**ऋ** कुत्सावाक्ययोः **ए-ऐ** है-हेशब्दाविव स्मृतौ ।
**ओ-औ**शब्दौ तु होहौवद् हूतौ सम्बोधनेऽपि च ॥ १०४ ॥

**कं** सुखे वारि-शिरसोः **किं** प्रश्ने कुत्सनेऽपि च ।

**अथ चादिः—**

चान्योऽन्यार्थसमाहारान्वाचयेषु समुच्चये ॥१०५॥

हेतौ पक्षान्तरे तुल्ययोगिता-विनियोगयोः ।
पादपूरणेऽवधृतौ **तु** विशेषेऽवधारणे ॥१०६।

समुच्चये पादपूर्तौ **धिग्** निर्भर्त्सननिन्दयोः ।
**नि** स्यात् क्षेपे भृशार्थे च नित्यार्थे दान[कर्मणि] ॥१०७॥

**[द्विस्वराः—]**

**यद्वत्** प्रश्नवितर्कयोः ।
**सकृत्** सहैकवारयोः ।
**स्वस्त्या**शीः-क्षेम-पुण्यादौ **साक्षात्** प्रत्यक्ष-तुल्ययोः ।
**हन्त** दानेऽनुकम्पायां वाक्यारम्भ-विषादयोः ॥१०८॥

**अथो अथ** समुच्चये ।
अन्वादेशे प्रतिज्ञायां प्रश्न-साकल्ययोरपि ।
**तथा** स्यान्निश्चये पृष्टप्रतिवाक्ये समुच्चये ॥१०९॥

**यथा** निदर्शने द्वौ तूद्देशे निर्देश-साम्ययोः ।

द्वौ तु **यथा-तथा**शब्दौ ।

**वृथा** त्वविधौ स्यादनर्थके ।
**अनु** लक्षण-वीप्सेत्थम्भूतभागेषु सन्निधौ ।
सादृश्या-ऽऽयाम-हीनेषु पश्चादर्थ-सहार्थयोः ॥११०॥

**नन्वा**क्षेपे परिप्रश्ने प्रत्युक्तावववधारणे ।
वाक्यारम्भेऽप्यनुनयामन्त्रणा-ऽनुज्ञयोरपि ॥१११॥

**नाना** विनोभयानेकार्थेषु **स्थाने** तु कारणे ।
युक्ते साम्येऽप्य**प** स्तेयेऽपकृष्टे वर्जने मुदि ॥११२॥

विपर्यये च योगे च निर्देशे विकृतावपि ।
**अपि** सम्भावना-शङ्का-गर्हणासु समुच्चये ॥११३॥

प्रश्ने युक्तपदार्थेषु कामचारक्रियासु च ।
**उपा**सन्नेऽधिके हीने सादृश्य-प्रतियत्नयोः ॥११४॥

**अभि** वीप्सा-लक्षणयोरित्थंभूता-ऽऽभिमुख्ययोः ।
स्याद**मा** सन्निधानार्थे [सहार्थे]ऽलं निवारणे ॥११५॥

अलंकरण-सामर्थ्य-पर्याप्तिष्ववधारणे ।
**एवं** प्रकारेऽङ्गीकारेऽवधारण-समुच्चयोः ॥११६॥

**कथं** प्रश्ने प्रकारार्थे संभ्रमे संभवेऽपि च ।
**किमु** संभावनायां विमर्शे **जोषं** सुखे स्तुतौ ॥११७॥

मौन-लङ्घनयोश्चापि **नाम** प्राकाश्य-कुत्सयोः ।
संभाव्या-भ्युपगमयोरलीके विस्मये क्रुधि ॥११८॥

**नूनं** तर्के निश्चिते च **माध्वं** नर्मा-ऽनुकूलयोः ।
**भृशं** प्रकर्षेऽत्यर्थे च **सामि** त्वर्द्धे जुगुप्सिते ॥११९॥

**अयि** प्रश्नेऽनुनये स्याद् **अये** क्रोध-विषादयोः ।
संभ्रमे स्मरणे **चान्तर**न्ते स्वीकार-मध्ययोः ॥१२०॥

**ऊररी**र्**उरी चोररी** च विस्तारेऽङ्गीकृतावपि ।
**परा**भिमुख्ये प्राधान्ये विमोक्ष-प्रातिलोम्ययोः ॥१२१॥

**किल** संभाव्य-वार्तयोः **खलु** वीप्सा-निषेधयोः ।
**नीचैः** स्वैरा-ऽल्प-नीचेषु **प्रादुर्**नाम-प्रकाश्ययोः ॥१२२॥

[ **पुरो**ऽग्रे प्रथमे च स्यात् ] **मिथो**ऽन्योन्यं रहस्यपि ।
**अह** क्षेपे नियोगे च **आहो** प्रश्न-विचारयोः ॥१२३॥

**सह** संबन्ध-सादृश्य-यौगपद्य-समृद्धिषु ।
**ननु** च प्रश्ने दुष्टोक्तौ [ **सम्यग्**वादे स्तुतावपि ] ॥१२४॥

अथ **त्रिस्वराः**—

**अपष्ठु** चारौ निर्दोषे **किमुत** प्रश्न-वादयोः ।
विकल्पेऽतिशये चापि **पुरस्तात्** प्रथमेऽग्रतः ॥१२५॥
[ पूर्वस्यां च पुरार्थे ] **चाभीक्ष्णं** शीघ्र-प्रकर्षयोः ।
पौनःपुन्ये सन्तते च **साम्प्रतं** तूचितेऽधुना ॥१२६॥
**समया निकषे(षा)** चान्तर्निकटे **चान्तरा** [ पुनः ] ।
विनार्थे सन्निधौ मध्ये**ऽभितो**ऽभिमुख-कार्त्स्न्ययोः ॥१२७॥
अहहेत्यद्‌भुते खेदे[**ऽन्तरेणा**न्तर्विनार्थयोः ] ।

[ **चतुःस्वराः**—]

**अहोबता**नुकम्पायां खेदा-ऽऽमन्त्रणयोरपि ॥१२८॥

## इत्यव्ययार्थः[1] [षष्ठः] काण्डः ।

## (७) मूलाक्षरार्थकाण्डः ।

**कः**.......................**कं**[2].................. ।
**ख**मिन्द्रिये नै[3][गरे].........................॥१२९॥

## (८) [ अन्त्याक्षरवर्गकाण्डः । ]

\+ + +

**[चच०]**

[**मलिम्लु**]**चो**ऽनिले चौरे **जलशूचि**र्जलौकसे ।
[ **चप०** ] **रतनारीच** इत्येष कथितो रतिवल्लभे ॥१३०॥
**छद्वि०**— **अच्छः** स्फटिक-भल्लूक-निर्मलेष्व**च्छ**मव्ययम् ।
आभिमुख्येऽथ **कच्छः** स्यात् **म्लेच्छः** पापरते मतः ॥१३१॥
[**जैकम्**]— **जू**राकाशे सरस्वत्यां पिशाच्यां जवनेऽपि च ।
[जद्वि०]— **अजो** हरौ हरे कामे विधौ छागे रघोः सुते ॥१३२॥

---

१. प्रतौ तु 'इत्यनेकार्थः' इति पाठः ।

२. कोशे 'कः' 'कम्' इति शब्दयोरनेकार्था दत्ताः । अत्र तु कथमप्यध्याहृताः ।

३. अतः परं ग्रन्थस्य पत्रं नष्टम् ।

**व्रजो** गोष्ठा-ऽध्व-वृन्देषु **निज**मात्मीय-नित्ययोः ।
**ध्वजं** चिह्ने पताकायां **ध्वजः** सौण्डिक-सेफयोः ॥१३३॥

**द्विजो** विप्रेऽण्डजे दन्ते **वाजो** निस्वन-पक्षयोः ।
**वाजं** जले मुनौ **वाजो** **व्याजः** शाठ्या-ऽपदेशयोः ॥१३४॥

**अब्जो** धन्वन्तरौ चन्द्रे निचुले शङ्ख-पद्मयोः ।
**आजिः** समावनौ युद्धे **राजिः** स्यात् पङ्क्ति-रेखयोः ॥१३५॥

**गञ्जा** खनौ सुरागेहे **सञ्जः** प्रजापतौ हरे ।
[जत्रि०]— **करजस्तु** करञ्जे स्या**ज्जलजं** शङ्ख-पद्मयोः ॥१३६॥

**वनजो** मुस्तके पद्मे **काम्बोजो** वारणे मतः ।
[जच०]— **जघन्यजो**ऽनुजे शूद्रे **भारद्वाजो** मुनौ स्मृतः ॥१३७॥

**द्विजराजः** शशधरे सौपर्ण्येऽनन्तभोगिनि ।
**धर्मराजो** यमे प्रोक्तो **धर्मराजो** युधिष्ठिरे ॥१३८॥

**नरराजः** कुबेरेऽपि सार्वभू(भौ)मे सुधाकरे ।
**भृङ्गराजस्तु** मधुपे **ग्रहराजो** रवौ विधौ ॥१३९॥

[झद्वि०]— **झञ्झा** ध्वनिविशेषेऽपि **झञ्झा** स्याज्जलवर्षणे ।
[ज्ञैकम्]— **ज्ञो** विरिञ्चे तथा बुद्धे(धे)
ज्ञद्वि०— **प्रज्ञा** बुद्धौ तु पण्डिते ॥१४०॥

**संज्ञा** नामनि गायत्र्यां चेतनायां रविस्त्रियाम् ।
[ज्ञत्रि०]— **सर्वज्ञस्तीर्थपे** बुद्धे शङ्करे परिकीर्तितः ॥१४१॥

**दैवज्ञो** गणकेऽपि स्यात् **कृतज्ञः** कुक्कुरेऽपि च ।
टद्वि०— **कटः** श्रोणौ क्रियाकारे किल(लि)ञ्जेऽतिशये शवे ॥१४२॥

समये गजगण्डे च **पटः** पियालपादपे ।
**लटः** प्रमाद-वचनदोषयोरप्युदाहृतः ॥१४३॥

**स्फुटो** व्यक्ते प्रफुल्ले च **कूटं** यन्त्रेऽनृते गिरौ ।
**वाटो** वृतौ च मार्गे च **वाटी** तु गृहनिष्कुटे ॥१४४॥

**पट्टः** पटोलपत्रेऽपि **पट्टी** ललाटभूषणे ।
**रिष्टं** क्षेम-शुभाभाव-कृपाणेषु निगद्यते ॥१४५॥

**व्युष्टं** दिने प्रभाते च फले पर्युषितेऽपि च ।
**[टत्रि०]**— **अवटः** स्यात् खिले गर्ते कूपे कुहकजीविनि ॥१४६॥

**करटो** गजगण्डे स्यात् **पिच्चटो** नेत्ररोगके ।
**कुक्कुट**स्ताम्रचूडे स्यात् कुकुभेऽग्निकणेऽपि च ॥१४७॥

**कर्कटः** करणे स्त्रीणां राशिभेद-कुलीरयोः ।
**परीष्टिः** परिचर्यायां प्राकाम्येऽपि गवेषणे ॥१४८॥

**मर्कट**स्तूर्णनाभेऽपि कपौ स्त्रीकरणेऽपि च ।
[**टच०**]— **श्रुतिकटः** प्राञ्चलोहे प्रायश्चित्त-भुजङ्गयोः ॥१४९॥

स्याद् **गाढमुष्टिः** कृपाणे कृपणादिषु चेष्यते ।
**ठद्वि०**— **कठः** स्वरे ऋचां भेदे **कुण्ठो**ऽकर्मण्य-मूर्खयोः ॥१५०॥

**कुष्ठं** रोगे सुगन्धे च **गोष्ठं** गोस्थानके मतम् ।
**ज्येष्ठं** श्रेष्ठेऽतिवृद्धे च **ज्येष्ठो** मासान्तरेऽपि च ॥१५१॥

[ **ठत्रि०** ]— **कमठः** कच्छपे भाण्डभेदे च **कमठं** मतम् ।
**कनिष्ठो**ऽल्पेऽनुजे यूनि **कनिष्ठा** दुर्बलाङ्गुलौ ॥१५२॥

**ठच०**— **दन्तशठः** स्याज्जम्बीरे कपित्थे कर्मरङ्गके ।
**हारकण्ठः** परभृते हारान्वितगलेऽपि च ॥१५३॥

**कालकण्ठ**स्तु दात्यूहे कलविङ्के च खञ्जने ।

## [इति] ठान्तवर्गः ।

**डद्वि:**— **गुडः** स्याद् गोलके हस्तिसन्नाहेक्षुविकारयोः ॥१५४॥

**जडो** मूर्खे हिमग्रस्ते **ताड**स्ताडन-घोषयोः ।
**गण्डः** कपोले पिटके योगभेदे च गण्डके ॥१५५॥

**दण्डो** यमे मानभेदे लगुडे दम-सैन्ययोः ।
**भाण्डं** भूषणमात्रेऽपि **भाण्डं** मूलवणिग्धने ॥१५६॥

डत्रि०— **गारुडं** स्यान्मरकते विषशास्त्रेऽपि **गारुडम्** ।
**वारुण्डः** सेकपात्रे स्यान्मले दृक्कर्णयोरपि ॥१५७॥

डच०— **जलरुण्डो** जलावर्त्ते पयोरेणौ भुजङ्गमे ।
ढद्वि०— **दृढः** स्थूले भृशे शक्ते प्रगाढेऽपि **दृढो** मतः ॥१५८॥

ढत्रि०— **आषाढो** व्रतिनां दण्डे मासे मलयपर्वते ।
बद्धमूले **विरूढः** स्यात् **वारूढः** शम्बलेऽपि च ॥१५९॥

णद्वि०— **कणो**ऽतिसूक्ष्मे धान्यांशे कृष्णा-जीरकयोः **कणा** ।
**द्रोणी** काष्ठाम्बुवाहिन्यां गवां घासभुजि स्थितौ ॥१६०॥

**जीर्णं** पक्के पुराणे च **दीर्णं** दारित-भीतयोः ।
**कृष्णा** च द्रौपदी नीली हारहूरा च कथ्यते ॥१६१॥

णत्रि०— **अरुणो**ऽव्यक्तरागे स्यात् संध्यारागेऽर्कसारथौ ।
**वरुण**स्तरुणभेदेऽप्सु प्रतीचीपति-सूर्ययोः ॥१६२॥

**प्रघण**स्ताम्रपर्णे(?पात्रे)[1] स्यादलिन्दे लोहमुद्गरे ।
**लक्षणं** नाम्नि चिह्ने च सौमित्रौ चापि **लक्षणः** ॥१६३॥

**लक्ष्मणं** लाञ्छने प्रोक्तं रामभ्रातरि **लक्ष्मणः** ।
**करेणु**र्गज-हस्तिन्योः कर्णिकारेऽपि च क्वचित् ॥१६४॥

णच०— **आतर्पणं** च सौहित्ये गले **निगरणो** मतः ।
**पारायण**मभीष्टे स्यात् तत्पराश्रययोरपि ॥१६५॥

**पुष्करिणी** सरोजिन्यां हस्तिन्यां च जलाशये ।
णप०— **अवतारणं** भूतादिग्रहे वस्त्राञ्चलेऽर्चने ॥१६६॥

निन्दोपालम्भवचने **परिभाषण**मिष्यते ।
णषट्— **दोहदलक्षणं** गर्भे वयःसन्धौ च दृश्यते ॥१६७॥

तद्वि०— **इतं** गते स्याद् विज्ञाते **रतं** सुरत-गुह्ययोः ।
**वित्तं** ख्याते धने लब्धे **वित्तं** ज्ञाते विचारिते ॥१६८॥

**चितिः** समूहे चित्यायां **दितिः** स्यात् खण्डने दनौ ।
तत्रि०— **अमृतं** यज्ञशेषे स्यात् पीयूषे सलिले घृते ॥१६९॥

---

१. 'ताम्रकुम्भे' इति मेदिनीकोशः ।

**रोहितं** कुङ्कुमे रक्ते गोशीर्षे च कुचन्दने ।
**उदात्तः** स्वरभेदे स्यात् कन्यालङ्कार-हृद्ययोः ॥१७०॥

**वासिता** करिणी-नार्यो**र्वासितं** सुरभीकृते ।
तच०— **अवदातं** सिते पिते विशुद्धे प्रवरेऽपि च ॥१७१॥

**नागदन्तो** द्विपरदे गृहान्निर्गतदारुणि ।
तप०— **गणाधिपति**रित्याख्या शङ्करेऽपि गजानने ॥१७२॥

तषट्— **अर्धपारावत**श्चित्रकण्ठे तित्तिरपक्षिणि ।
थद्वि०— **रथः** स्यात् स्यन्दने काये **पीथोऽर्के पीथ**मम्भसि ॥१७३॥

**अर्थः** प्रकारे विषये ब्यस्त(? द्रव्य)-कारण-वस्तुषु ।
अभिधेये च शब्दानां तृप्तौ चापि प्रयोजने ॥१७४॥

थत्रि०— **मन्मथः** कामचिन्तायां कपित्थे कुसुमायुधे ।
**क्षयथुः** कथितः कासे **निर्ग्रन्थो** जिनदर्शने ॥१७५॥

थच०— **चित्ररथः** स्याद् गन्धर्वे रवौ विद्याधरान्तरे ।
**चतुष्पथः** चतुर्मार्गे सङ्गमेऽपि द्विजेऽपि च ॥१७६॥

दद्वि०— **गदो** भ्रातरि विष्णोः स्यादामये चायुधे **गदा** ।
**अब्दः** संवत्सरे मेघे गिरिभेदे च मुस्तके ॥१७७॥

दत्रि०— **धनदो** दातरि श्रीदे **जलदो** मुस्तकेऽम्बुदे ।
**अङ्गदः** कपिभेदे स्यात् केयूरे**ऽङ्गद**मिष्यते ॥१७८॥

**कुमुदः** पुण्डरीकाक्षे रत्नभेदेऽपि पारदे ।
दच०— **अपवाद**स्तु निन्दायामाज्ञा-विश्रम्भयोरपि ॥१७९॥

**मेघनाद**स्तु वरुणे रावणस्य सुतेऽपि च ।
दप०— **सहस्रपादः** कारण्डे मार्तण्डे यज्ञपुरुषे ॥१८०॥

धद्वि०— **राधो** वैशाखमासे स्याद् **राधो** गोष्ठ्यां च विद्यते ।
**बुधः** कवौ रौह(हि)णेये **नद्ध**मुद्वृत्त-बद्धयोः ॥१८१॥

**बुद्धो** जिने च कीरे च सौम्ये च परिकीर्तितः ।
धतृ०— **विबुधः** पण्डिते देवे **निषधः** कठिने नृपे ॥१८२॥

धच०— अवरोधस्तिरोधाने शुद्धान्ते राजवेश्मनि ।
अनुबन्धः प्रकृत्यादेर्दोषोत्पादेऽविनश्वरे ॥१८३॥

नद्वि०— इनः सूर्ये नृपे पत्यौ **धनं** गोधन-वित्तयोः ।
**धनः** सान्द्रे दृढे दाढर्ये विस्तारे लोहमुद्गरे ॥१८४॥

**जिनः** स्यादतिवृद्धे तु बुद्धे चार्हति जित्वरे ।
**दानं** गजमदे त्यागे पालन-च्छेद-शुद्धिषु ॥१८५॥

**मानं** प्रमाणे प्रस्थादौ **मान**श्चित्तोन्नतौ गृहे ।
**स्वप्नः** सुप्तस्य विज्ञाने **स्वप्नः** स्वापे च दर्शने ॥१८६॥

**हनुः** प्रहरणे मृत्यौ कपोलावयवे गदे ।
नत्रि०— **अवनं** रक्षणे प्रीतौ **भवनं** भाव-वेश्मयोः ॥१८७॥

**दशनं** कवचे दन्ते **दशनं(नः)** शिखरेऽपि च ।
**शासनं** राजदत्तोर्व्यां शास्त्राज्ञा-लेख-शास्तिषु ॥१८८॥

**मिथुनं** राज( ? युग्म )भेदे स्याद् राशिभेदेऽपि पुं मतम् ।
**सन्तानः** सन्ततौ गोत्रे स्यादपत्ये सुरद्रुमे ॥१८९॥

**योजनं** तु चतुःक्रोश्यां योगे च परमात्मनि ।
उदुम्बरे च पुन्नागे हरिद्रायां तु **काञ्चनी** ॥१९०॥

**काञ्चनं** हेम्नि किञ्जल्के **कुहनं** काचभाजने ।
उपाये मृतसंस्कारे दापनेऽपगमे धने[१] ॥१९१॥

**प्रधानं** स्यान्महामात्रे प्रकृतौ परमात्मनि ।
नच०— **महाधनं** महामूल्ये सुवर्णे सिल्हकेऽपि च ॥१९२॥

**उपधानं** विशेषे च गण्डके प्रणयेऽपि च ।
**कुम्भयोनि**रगस्त्ये स्यादर्जुनस्य गुरावपि ॥१९३॥

**आत्मयोनि**र्विधौ कामे **चित्रभानुः** खगेऽनले ।
नप०— **मधुसूदन**सञ्ज्ञा च भ्रमरे वनमालिनि ॥१९४॥

पद्वि०— **रूपं** स्वभावे सौन्दर्ये नाण(ण)के पशु-भेदयोः ।
पत्रि०— **कुतपः** स्यात् कुशे वाद्ये तपने छागकम्बले ॥१९५॥

---

१. एतेऽर्थाः **साधन** इति शब्दस्य, तस्मात् '**साधनं** मृतसंस्कारे' इति पठ्यम् ।

**कुतपो** भागिनेये स्यादष्टमांशे दिनस्य च ।
पच०— **प्राप्तरूपो** बुधे रम्ये व्यतिरूपे सुरूपवत् ॥१९६॥

फद्वि०— **रेफो** रवर्णे कथितः कुत्सितेऽवाच्यवत् पुनः ।
बद्वि०— **कम्बुः** शम्बूक-गजयोर्नीचो(चे)ऽनलक-शङ्खयोः ॥१९७॥

बत्रि०— **कदम्ब**माहुः सिद्धार्थे नीपे च निकुरम्बके ।
**प्रलम्बो** दैत्यभेदे स्याद् **गन्धर्वो** मृग-देवयोः ॥१९८॥

बच०— **शतपर्वा** च दूर्वायां भार्गवस्य स्त्रियामपि ।
भद्वि०— **रम्भा** कदल्यप्सरसो **रम्भो** वैणवदण्डके ॥१९९॥

**सभा** सामाजिके द्यूते गोष्ठी-मन्दिरयोरपि ।
भत्रि०— **सुरभि**श्चम्पके स्वर्णे जातीफल-वसन्तयोः ॥२००॥

मद्वि०— **दमस्तु** दमथे दण्डे कर्दमे दमनेऽपि च ।
**रमा** लक्ष्म्यां[1] **रमः** कान्ते रक्ताशोकद्रुमे स्मरे ॥२०१॥

**लक्ष्मीः** श्रीरिव सम्पत्ति-पद्म-शोभा-प्रियङ्गुषु ।
मत्रि०— **मध्यमः** स्यात् स्वरे मध्ये मध्यदेशे तु मध्यजे ॥२०२॥

मच०— **पराक्रमो** विक्रमे[2] स्यात् सामर्थ्योद्योगयोरपि ।
यद्वि०— **जयो** जयन्ते विजये **जया** दुर्गा-ऽग्निमन्थयोः ॥२०३॥

**पद्यं** श्लोके सृतौ **पद्या पद्यः** शूद्रे निगद्यते ।
यत्रि०— **विजयस्तु** जये पार्थे गौर्यां तु **विजया** तिथौ ॥२०४॥

यच०— भवेद**नुशयो** द्वेषे पश्चात्तापानुबन्धयोः ।
**रौह(हि)णेयो** भवेद् वत्से रेवतीरमणे बुधे ॥२०५॥

यप०— **कालानुसार्यं** कालेये शैलेये शिंशपाद्रुमे ।
रद्वि०— **अरं** शीघ्रे च चक्राङ्गे [ऽ**ग्रं** पुरः प्रथमेऽधिके] ॥२०६॥

**करो** वर्षोपले पाणौ शुण्डा-प्रत्यय-रश्मिषु ।
**पुरं** पुरि शरीरे च गुग्गुलौ कथितः **पुरः** ॥२०७॥

---

१. प्रतौ तु 'रमः कान्ते रमा लक्ष्म्यां' इति पाठः ।
२. प्रतौ तु 'विक्रमेऽपि स्यात्' इति पाठः ।

**पा(प)त्र** स्याद् वाहने पर्णे पक्षे च शरपक्षिणाम् ।
**चक्रो** गणे चक्रवाके **चक्रं** सैन्य-रथाङ्गयोः ॥२०८॥

**गिरिर्गिरियके** गीर्णौ[1] क्रीडागु(गे)ण्ड(ण्डु)क-शैलयोः ।
रत्रि०— **अमर**स्त्रिदशेऽप्यस्थिसंहारे कुलिशद्रुमे ॥२०९॥

**शम्बरं** सलिले चित्रे बौद्ध-व्रतविशेषयोः ।
**विदुरो** नागरे धीरे कौरवाणां च मन्त्रिणि ॥२१०॥

**मधु(धु)रा** शतपुष्पायां **बन्धुरा** पु(प)ण्ययोषिति ।
**कुञ्जरो**ऽनेकपे केशे धातु(त)क्यामपि **कुञ्जरा** ॥२११॥

**पुष्करं** पङ्कजे व्योम्नि पयः-करिकराग्रयोः ।
**विहारो** भ्रमणे स्कन्धे लीलायां सुगतालये ॥२१२॥

**करीरः** कलशे वृक्षभेदे वंशाङ्कुरेऽपि च ।
रच०— भवेत् **परिकरो** व्राते पर्यङ्क-परिवारयोः ॥२१३॥

**दिगम्बरः** स्यात् क्षपणे नग्ने तमसि शङ्करे ।
**बलभद्रो** रो(रौ)हिणेयो **बलभद्रा** कुमारिका ॥२१४॥

रप०— **पांशुचामर** इत्येष दूर्वाञ्चिततटीभुवि ।
**पीतकावेरमि**च्छन्ति कुङ्कुमे पित्तलेऽपि च ॥२१५॥

लद्वि०— **बलं** गन्धरसे रूपे स्थामनि[2] स्थौल्य-सैन्ययोः ।
**बलो** हलायुधे दैत्यभेदे बलिनि वायसे[3] ॥२१६॥

**मलं** किट्टे पुरीषे च पापे च कृपणे मतः ।
**स्थालं** भाजनभेदेऽपि **स्थाली** स्यात् पाटलोखयोः ॥२१७॥

**बालः** कचे शिशौ मूर्खे ह्रीबेरेऽश्वेभपुच्छयोः ।
**शूलं** प्रहरणे मृत्यौ केतने रोग-योगयोः ॥२१८॥

---

१. प्रतौ तु 'गिरिः गीर्णौ गिरियके' इति पाठः ।
२. प्रतौ तु 'स्थाम्नि' इति पाठः ।
३. प्रतौ तु 'बलिनि वासयोः' इति पाठः ।

**लोला** जिह्वा-कमलयोः **कलिः** कलह-शूरयोः ।

लत्रि०— **तरलं** चञ्चले षिङ्गे हारमध्यमणावपि ॥२१९॥

**बहुलः** कृष्णपक्षेऽग्नौ शितौ च **बहुला** गवि ।

**फेनिलः** स्यादरिष्टेऽपि **फेनिलं** बदरीफले ॥२२०॥

लच०— **मदकलः** स्यान्मत्तेभे मदेनाव्यक्तवाचि च ।

**कुतूहलं** कौतुके स्यात् प्रशस्तेऽपि **कुतूहलम्** ॥२२१॥

लप०— **कूपीटपालमि**च्छन्ति केनिपात समुद्रयोः ।

वद्वि०— **भवः** संसार-सत्ता-ऽऽप्ति-श्रेयः-शङ्कर-जन्मसु ॥२२२॥

**ध्रुवः** कीले शिवे शङ्कौ वसौ योगे बटे मुनौ ।

वत्रि०— **प्रभवो** जन्ममूले स्याज्जन्मभूमौ पराक्रमे ॥२२३॥

वच०— **जीवञ्जीवश्च**कोरे स्याद् द्रुम-पक्ष(क्षि)विशेषयोः ।

वप०— **अ(आ)शितम्भवम**न्नाद्ये तृप्तौ चा**प्याशितम्भवः** ॥२२४॥

शद्वि०— **वशमा**यत्ततायां स्याद् **वश**मिच्छा-प्रभुत्वयोः ।

**कुशो** रामसुते दर्भे **निशा** रात्रि-हरिद्रयोः ॥२२५॥

शत्रि०— **बाल(लि)शः** शावके मूर्खे **लोमशो** लोमसंयुते ।

**उड्डीशो** ग्रन्थभेदे स्या**दुड्डीशश्च**न्द्रिकापतौ ॥२२६॥

शच०— **अपदेशः** स्मृतौ लक्षे(क्ष्ये) निमित्त-व्याजयोरपि ।

**जीवितेशो** यमे कान्ते जीवातौ जीविताधिपे ॥२२७॥

षद्वि०— **वृषः** स्याद् वासके धर्मे सौरभेये च शुक्रले ।

**दोषः** स्याद् दूषणे पापे **दोषा** रात्रौ भुजेऽपि च ॥२२८॥

**ऋषि**र्वेदे वशिष्ठादौ दीधितावपि पठ्यते ।

**उषा** बाणसुता-रात्र्यो**रुषः** कामिनि गुग्गले ॥२२९॥

[illegible]

षच०— **अनिमिषः** सुरे मत्स्येऽप्य**नुकर्षो**ऽनुकर्षणे ।

**परिघोषो** निनादे स्यादवाच्ये जलदध्वनौ ॥२३१॥

सद्वि०— **रसो** गन्धरसे स्वादे तिक्तादौ विष-रागयोः ।
शृङ्गारादौ द्रवे वीर्ये देहधात्वम्बुपारदे ॥२३२॥

सत्रि०— **अलसः** पादरोगे स्यात् क्रियामन्दे द्रुमान्तरे ।
**तमो**ऽन्धकारे स्वर्भानौ **तमः** शोके गुणान्तरे ॥२३३॥

सच०— भवेद् **घनरसः** सान्द्रे निर्यासे मोरटेऽप्सु च ।
कर्पूरे पीलुपर्ण्यां च सम्यक् सिद्धरसेऽपि च ॥२३४॥

सप०— **हिङ्गुनिर्यास** इत्येष निम्बे हिङ्गुरसेऽपि च ।
हद्वि०— **सहो** बले **सहा** मुद्गपर्ण्यां तु नखभेषजे ॥२३५॥

सहदेवाकुमार्यां तु **सहः** क्षान्ते **सहा** भुवि ।
**ग्रहो** ग्रहेऽवहारे च **नाहो** बन्धन-कूटयोः ॥२३६॥

**मोहमि**च्छन्ति मूर्च्छायामविद्यायां च सूरयः ।
**मही** भूमौ **मही** नद्यां **मह** उत्सव-तेजसोः ॥२३७॥

**कुहूः** स्यात् कोकिलालापे नष्टेन्दुकल-दर्शयोः ।
हत्रि०— **पटह**स्तु समारम्भे आनके **पटहं** मतम् ॥२३८॥

**कलहः** खड्गकोशे स्याद् भण्डने युद्ध-राढयोः ।
**वैदेही** रोचना-सीता-वणिक्स्त्री-पिप्पलीष्वपि ॥२३९॥

हच०— **अवग्रह** इति ख्यातो वृष्टिरोधे गजालिके ।
**परिग्रहः** परिजने पत्न्यां स्वीकार-मूलयोः ॥२४०॥

**उपनाहो** व्रणे लेपपिण्डे वीणानिबन्धने ।
हप०— **प्रपितामह** इत्येष विधौ पितृपितामहे ॥२४१॥

क्षद्वि०— **अक्षः** कर्षे तुषे चक्रे शकट-व्यवहारयोः ।
**दक्षः** पटौ हरवृषे ताम्रचूडे प्रजापतौ ॥२४२॥

क्षत्रि०— **अध्यक्षो**ऽधिकृते प्रोक्तः प्रत्यक्षे**ऽध्यक्षमि**ष्यते ।
**आरक्षं** रक्षणीये स्यात् शीर्षे मर्मणि दन्तिनाम् ॥२४३॥

**रक्ताक्षः** कासरे क्रूरे पारावत-चकोरयोः ।
क्षच० — **राजवृक्षः** पियाले स्यात् **विशालाक्षी** वरस्त्रियाम् ॥२४४॥

अनेकार्थाम्बुधौ प्रौढः गुरौ विनयमन्दरात् ।
उन्मथ्य शब्दरत्नौघ उद्दध्रे कविभूषणम् ॥२४५॥

इत्याचार्य**श्रीविनयचन्द्र**विरचितायां **कविशिक्षायां**
**विनयाङ्कायामनेकार्थ**[ शब्दसंग्रहो ] नाम पञ्चमः परिच्छेदः ॥

# ६. रसभावनिरूपणपरिच्छेदः ।

**[1]विभावानुभावव्यभिचारिभिरभिव्यक्तः स्थायी भावो रसः** [ सू० १]

स्थायिव्यभिचारिलक्षणाश्चित्तवृत्तयो विभाव्यन्ते विशिष्टतया ज्ञायन्ते— यैस्तैर्विभावैः काव्य-नाटचशास्त्रप्रसिद्धैरालम्बनोद्दीपनस्वभावैर्ललनोद्यानादिभिः, स्थायिव्यभिचारिलक्षणं चित्तवृत्तिविशेषं सामाजिकजनोऽनुभवन्ननुभाव्यते—साक्षात्कार्य[ते यै]स्तैरनुभावैः कटाक्षभुजाक्षेपादिभिः, विविधमाभिमुख्येन चरणशीलैर्व्यभिचारिभिर्धृति-स्मृतिप्रभृतिभिः, स्थायिभावानुमापकत्वेन लोके कारण-कार्यसहचारिशब्दव्यपदेश्यैः, ममैवैते परस्यैवैते न ममैते न परस्यैते—इति संबन्धिविशेषस्वीकारपरिहारनियमानवसायात् साधारण्येन प्रतीतैरभिव्यक्तः सामाजिकानां वासनारूपेण स्थितः स्थायी इत्यादिको भावो नियतप्रमातृगतत्वेन स्थितोऽपि साधारणोपायबलात् सहृदयहृदयसंवादभाजा साधारण्येन गोचरीक्रियमाणश्चर्व्यमाणतैकप्राणो विभावादिभावनावधिरलौकिकचमत्कारकारितया परब्रह्मास्वादसोदरोऽभिमीलितनयनैः कविसहृदयै रस्यमानः स्वसंवेदनसिद्धो रसः ।

स च न विभावादेः कार्यस्तद्विनाशेऽपि रससंभवप्रसङ्गात् । नापि ज्ञाप्यः सिद्धस्य तस्याभावात् । कारक-ज्ञापकाभ्यामन्यत् क्व दृष्टमिति चेन्न, क्वचिददृष्टमित्यलौकिकत्वसिद्धेर्भूषणमेतन्न दूषणम् । विभावादीनां च समस्तानामभिव्यञ्जकत्वं न व्यस्तानाम्, व्यभिचारात् । व्याघ्रादयो हि विभावा भयानकस्येव वीराद्भुत-रौद्राणाम् । अश्रुपातादयोऽनुभावाः करुणस्येव शृङ्गार-भयानकयोः, चिन्तादयो व्यभिचारिणः करुणस्येव शृङ्गार-वीर-भयानकानाम् ।

यत्राप्येकैकस्योपादानम्, यथा—

केलीकन्दलितस्य विभ्रममधोर्धुर्यं वपुस्ते दृशौ  
भङ्गीभङ्गुरकामकार्मुकमिदं भ्रूनर्मकर्मक्रमः ।  
आपातेऽपि विकारकारणमहो वक्त्राम्बुजन्मासवः  
सत्यं सुन्दरि ! वेधसस्त्रिजगतीसारं तवैवाकृतिः ॥१॥

**[अभिनवगुप्तलोचने अभिनवभारत्यां च । ]**

---

१. **काव्यानुशासनस्य** द्वितीयाध्यायादुद्धृतोऽयं परिच्छेदः ।

२. 'दृशोर्भङ्गी' इति पठ्यम् ।

अत्र विभावानाम्—

यद्विश्रम्य विलोकितेषु बहुशो निःस्थेमनी लोचने
यद्गात्राणि दरिद्रति प्रतिदिनं दूनाब्जिनीनालवत् ।
दूर्वाकाण्डविडम्बकश्च निबिडो यत्पाण्डिमा गण्डयोः
कृष्णे यूनि सयौवनासु वनितास्वेषैव वेषस्थितिः ॥२॥

**[ भट्टेन्दुराजलोचने अभिनवभारत्यां च । ]**

अत्रानुभावानाम्—

दूरादुत्सुकमागते विचलितं संभाषिणि स्फारितं
संश्लिष्यत्यरुणं गृहीतवसने किं चाञ्चितभ्रूलतम् ।
मानिन्याश्चरणानतिव्यतिकरे बाष्पाम्बुपूर्णेक्षणं
चक्षुर्जातमहो प्रपञ्चचतुरं जातागसि प्रेयसि ॥३॥

[ **अमरुशतक** श्लो० ४९ ]

अत्रौत्सुक्य-व्रीडा-हर्ष-कोपासूया-प्रसादादीनां व्यभिचारिणाम् । तथाप्येतेषामौचित्यादन्यतमद्वयाक्षेपकत्वमिति न व्यभिचारः ।

रसभेदानाह—

**शृङ्गार-हास्य-करुण-रौद्र-वीर-भयानक-बीभत्साद्भुत-शान्ता नव रसाः ।** [सू० २]

तत्र कामस्य सकलजातिसुलभतया अत्यन्तपरिचितत्वेन [ सर्वान् प्रति हृद्यतेति ] पूर्वं शृङ्गारः । तदनुगामी च हास्यः । तद्विपरीतः करुणः । ततस्तन्निमित्तमर्थप्रधानो रौद्रः । ततः कामार्थयोर्धर्ममूलत्वाद् धर्मप्रधानो वीरः । तस्य भीताभयप्रदानसारत्वादनन्तरं भयानकः । तद्विभावसाधारण्यसंभावनात् ततो बीभत्सः । इतीयद्वीरेणाक्षिप्तम् । वीरस्य पर्यन्तेऽद्भुतः फलमित्यनन्तरं तदुपादानम् । ततस्त्रिवर्गात्मकप्रवृत्तिधर्मविपरीतनिवृत्तिधर्मात्मको मोक्षफलः शान्तः । एते नवैव रसाः । तेनार्द्रतास्थायिकः स्नेहो रस इत्यसत्, तस्यैतेष्वन्तर्भावात् । तथाहि—यूनो मित्रे स्नेहो रतौ, लक्ष्मणादेर्भ्रातरि स्नेहो धर्मवीरे, बालस्य मातापित्रादौ स्नेहो भये विश्रान्तः । एवं वृद्धस्य पुत्रादावपि द्रष्टव्यम् ।

शृङ्गारमाह—

**स्त्रीपुंसमाल्यादिविभावा जुगुप्सालस्यौग्र्यवर्जव्यभिचारिका रतिः संभोग-विप्रलम्भात्मा शृङ्गारः ।** [ सू० ३ ]

स च कोटिधा परस्पराविं(व)लोकनादिभिः, तद्यथा—

> वक्त्रं चन्द्रविला(? का)सि पङ्कजपरीहासक्षमे लोचने
> वर्णः स्वर्णमलंकरिष्णुरलिनीजिष्णुः कचानां चयः ।
> वक्षोजाविभकुम्भविभ्रमहरौ गुर्वी नितम्बस्थली
> वाचं(चां) मार्दवमुज्ज्वलं युवतिषु स्वाभाविकं मण्डनम् ॥४॥

**[ सुभाषितरत्नभाण्डागारे । ]**

देव-मुनि-गुरु-नृपविषया तु भाव एव ।

देवविषया यथा—

> त्वं माता त्वं पिता बन्धुस्त्वं स्वामी त्वं च मे गुरुः ।
> त्वमेव जगदानन्द जीवितं जीवितेश्वरः ॥ ५ ॥

तथा रावण-सीतयोरत्याभासः, अनौचित्यात् ।

[ तत्र संभोगमाह—

**सुखमयधृत्यादिव्यभिचारी रोमाञ्चाद्यनुभावः संभोगः ।** [ सू० ४ ]

यथा—दृष्ट्वैकासनसंगते प्रियतमे पश्चादुपेत्यादरा-
> देकस्या नयने निमील्य विहितक्रीडानुबन्धच्छलः ।
> ईषद्वक्रितकन्धरः सपुलकः प्रेमोल्लसन्मानसा-
> मन्तर्हासलसत्कपोलफलकां धूर्तोऽपरां चुम्बति ॥ ६ ॥

**[ अमरुशतक-श्लो० १९ ]**

विप्रलम्भमाह—

**शङ्कादिव्यभिचारी संतापाद्यनुभावोऽभिलाषमानप्रवासशापेर्ष्यारूपो विप्रलम्भः ।** [ सू० ५ ]

अभिलाषविप्रलम्भो यथा—

शैलात्मजापि पितुरुच्छिरसोऽभिलाषं
व्यर्थं समर्थ्य ललितं वपुरात्मनश्च ।
सख्योः समक्षमिति चाधिकजातलज्जा
शून्या जगाम भवनाभिमुखी कथंचित् ॥७॥

[कुमारसंभव, स० ३, श्लो० ७५]

मानविप्रलम्भो यथा—

प्रणयकुपितां दृष्ट्वा देवीं ससंभ्रमविस्मृत-
त्रिभुवनगुरुर्भीत्या[1] सद्यः प्रणामपरोऽभवत् ।
नमितशिरसो गङ्गालोके तया चरणाहता-
ववतु भवतस्त्र्यक्षस्यैतद्विलक्षमवस्थितम् ॥८॥

[ —वाक्पतिराजस्य ]

प्रवासविप्रलम्भमाह—

याते द्वारवतीं तदा मधुरिपौ तद्दत्तझम्पानतां
कालिन्दीतटरूढमञ्जुललतामालिङ्ग्य सोत्कण्ठया ।
तद्गीतं गुरुबाष्पगद्गदगलत्तारस्वरं राधया
येनान्तर्जलचारिभिर्जलचरैरप्युत्कमुत्कूजितम् ॥९॥

[ काव्यानुशासन, श्लो० १०७ ]

शापविप्रलम्भमाह—मेघदूते समग्रेऽपि ।

ईर्ष्याविप्रलम्भमाह—

संध्यां यत्प्रणिपत्य लोकपुरतो बद्धाञ्जलिर्याचसे
धत्से यच्च नदीं विलज्जशिरसा तच्चापि सोढं मया ।
श्रीर्जातामृतमन्थने यदि हरेः कस्माद् विषं भक्षितं
मा स्त्रीलम्पट मां स्पृशेत्यभिहितो गौर्या हरः पातु वः ॥१०॥

[ काव्यानुशासन, श्लो० १०६ ]

---

१. प्रतौ तु °गुरुप्रीत्यां° इति पाठः ।

हास्यमाह—

**विकृतवेषादिविभावो नासास्पन्दनाद्यनुभावो निद्रादिव्यभिचारी हासो हास्यः ।** [सू० ६]

स च त्रिधा । यद् **भरतः**—

ईषद्विकसितैर्गण्डैः कटाक्षैः सौष्ठवान्वितैः ।
अलक्षितद्विजं धीरमुत्तमानां **स्मितं** भवेत् ॥१०॥

आकुञ्चिताक्षिगण्डं यत् सस्वनं मधुरं तथा ।
कालागतं सास्यरागं तद् वै **विहसितं** भवेत् ॥११॥

अस्थानहसितं यत्तु साश्रुनेत्रं तथैव च ।
उत्कम्पितांसकशिरस्तथा**पहसितं** भवेत् ॥१२॥

[**नाटयशास्त्र** अ० ६, श्लो० ५४, ५६, ५८]

अतिहासस्त्वनुस्यूतेऽपहासः कारणात् कृते ।

[ **अभिधानचिन्तामणि** २९८] इत्यादि ।

हास्योदाहरणं यथा—

कनककलशस्वच्छे राधापयोधरमण्डले
नवजलधरश्यामामात्मद्युतिं प्रतिबिम्बिताम् ।
असितसिचयप्रान्तभ्रान्त्या मुहुर्मुहुरुत्क्षिपन्
जयति जनितव्रीडाहासः प्रियाहसितो हरिः ॥१३॥

[—**वैद्योकस्य**[1]]

**करुण**माह—

**इष्टनाशादिविभावो दैवोपालम्भाद्यनुभावो दुःखमयव्यभिचारी शोकः करुणः ।** [सू० ७]

यथा—अयि जीवितनाथ जीवसि० ॥१४॥

[**कुमारसंभव** स० ४, श्लो० ३]

---

१. क० व०, स० ४९

इत्यादि रतिप्रलापेषु ।

**रौद्र**माह—

**दारापहारादिविभावो नयनरागाद्यनुभाव औग्र्यादिव्यभिचारी क्रोधो रौद्रः** । [सू० ८]

यथा—चञ्चद्भुजभ्रमितचण्डगदाभिघात-
संचूर्णितोरुयुगलस्य सुयोधनस्य ।
स्त्यानावनद्धघनशोणितशोणपाणि-
रुत्तंसयिष्यति कचांस्तव देवि! भीमः ॥१५॥

[**वेणीसंहार** अं० १, श्लो० २१]

**वीर**माह—

**नयादिविभावः स्थैर्याद्यनुभावो धृत्यादिव्यभिचार्युत्साहो धर्मदानयुद्धभेदो वीरः** । [सू० १२]

यथा—अजित्वा सार्णवामुर्वीमनिष्ट्वा विवि[1]धैर्मखैः ।
अदत्वा चार्थमर्थिभ्यो भवेयं पार्थिवः कथम् ॥१६॥

[**काव्यादर्श** परि०२, श्लो०२८४]

तत्र धर्मवीरो **नागानन्दे** जीमूतवाहनस्य । दानवीरः परशुरामबलिप्रभृतीनाम् । युद्धवीरो **वीरचरिते** रामस्य ।

**भयानक**माह—

**विकृतस्वरश्रवणादिविभावं करकम्पाद्यनुभावं शङ्कादिव्यभिचारि भयं भयानकः** । [सू० १०]

यथा—ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने दत्तदृष्टिः
पश्चार्धेन प्रविष्टः शरपतनभयाद् भूयसा पूर्वकायम् ।
शष्पैरर्द्धावलीढैः श्रमविततमुखभ्रंशिभिः कीर्णवर्त्मा
पश्योदग्रप्लुतत्वाद् वियति बहुतरं स्तोकमुर्व्यां प्रयाति ॥१७॥

[**अभिज्ञानशाकुन्तल** अं०१, श्लो०७]

---

१. अतः परं ग्रन्थस्य पत्रे नष्टे, **काव्यानुशासनादु**द्धृतः सन्दर्भः ।

बीभत्समाह—

**अहृद्यदर्शनादिविभावा अङ्गसंकोचाद्यनुभावा अपस्मारादिव्यभिचारिणी जुगुप्सा बीभत्सः ।** [ सू० ११ ]

यथा—उत्कृत्योत्कृत्य कृत्तिं प्रथममथ पृथूच्छोफभूयांसि मांसा-
न्यंसस्फिक्पृष्ठपिण्डाद्यवयवसुलभान्युग्रपूतीनि जग्ध्वा ।
आर्तस्नाय्वन्त्रनेत्रात् प्रकटितदशनः प्रेतरङ्कः करङ्का-
दङ्कस्थादस्थिसंस्थं स्थपुटगतमपि क्रव्यमव्यग्रमत्ति ॥ १८ ॥

[ **मालतीमाधव** अं०५, श्लो०१६ ]

अद्भुतमाह—

**दिव्यदर्शनादिविभावो नयनविस्ताराद्यनुभावो हर्षादिव्यभिचारी विस्मयोऽद्भुतः ।** [ सू० १२ ]

यथा—कृष्णेनाम्ब गतेन रन्तुमधुना मृद्भक्षिता स्वेच्छया
सत्यं कृष्ण क एवमाह मुशली मिथ्याम्ब पश्याननम् ।
व्यादेहीति विकासितेऽथ वदने माता समस्तं जगद्
दृष्ट्वा यस्य जगाम विस्मयपदं पायात् स वः केशवः ॥१९॥

[ **औचित्यविचारचर्चायाम्**[1] ]

शान्तमाह—

**वैराग्यादिविभावो यमाद्यनुभावो धृत्यादिव्यभिचारी शमः शान्तः ।** [ सू० १३ ]

यथा—गङ्गातीरे हिमगिरिशिलाबद्धपद्मासनस्य
ब्रह्मध्यानाभ्यसनविधिना योगनिद्रां गतस्य ।
किं तैर्भाव्यं मम सुदिवसैर्येषु ते निर्विशङ्काः
कण्डूयन्ते जरठहरिणाः शृङ्गकण्डुं विनेतुम् ॥२०॥

[ **वैराग्यशतक** श्लो० १८ ]

तदेवं परस्परविविक्ता नवापि रसाः । ]

---

१. **सुभाषितावली,** श्लो. ४०

एषां क्रमेण स्थायिभावान् संगृह्णाति—

**रति-हास-शोक-क्रोधोत्साह-भय-जुगुप्स-विस्मय-शमाः स्थायिनो भावाः ।** [सू० १४]

भावयन्ति चित्तवृत्तय एवालौकिकवाचिकाद्यभिनयप्रक्रियारूढतया स्वात्मानं लौकिकदशायामनास्वाद्यमप्यास्वाद्यं कुर्वन्ति ।

व्यभिचारिणो ब्रूते—

**धृति-स्मृति-मति-व्रीडा-जाड्य-विषाद-मद-व्याधि-निद्रा-सुप्तौत्सुक्याऽवहित्थ-चापला-ऽऽलस्य-हर्ष-गर्वौग्र्य-प्रबोध-ग्लानि-दैन्य-श्रमोन्माद-मोह-चिन्ता-ऽमर्ष-त्रासा-ऽपस्मार-ऽनिर्वेदा-ऽऽवेग-वितर्का-ऽसूया-मृतयः स्थित्युदय-प्रशम-सन्धि-शबलत्वधर्माणस्त्रयस्त्रिंशद्व्यभिचारिणः ।** [ सू० १५ ]

क्रमेणाह—

**ज्ञानादेर्धृतिरव्यग्रभोगकृत् ।** [ सू० १६ ]

यथा—वयमिह परितुष्टा वल्कलैस्त्वं च लक्ष्म्या
सम इह परितोषे निर्विशेषा विशेषाः ।
स तु भवति दरिद्रो यस्य तृष्णा विशाला
मनसि च परितुष्टे कोऽर्थवान् को दरिद्रः ? ॥२१॥

[ **वैराग्यशतक** श्लो० ५४ ]

**सदृशदर्शनादेः स्मृतिर्भ्रूक्षेपादिकृत्** । [ सू० १७ ]

यथा—मैनाकः किमयं रुणद्धि गगने मन्मार्गमव्याहतं
शक्तिस्तस्य कुतः स वज्रपतनाद् ज्ञा(भी)तो महेन्द्रादपि ।
तार्क्ष्यः सोऽपि समं निजेन विभुना जानाति मां रावण-
मा ज्ञातं स जटायुरेष जरसा क्लिष्टो वधं वाञ्छति ॥२२॥

[ **हनुमन्नाटक** अं० ४, श्लो० ९ ]

**शास्त्रचिन्तादि(दे)र्मतिः शिष्योपदेशादिकृत् ।** [ सू० १८ ]

यथा—असंशयं क्षत्रपरिग्रहक्षमा यदार्यमस्यामभिलाषि मे मनः ।
सतां हि संदेहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः ॥२३॥

[ **अभिज्ञानशाकुन्तल** अं० १, श्लो० १९ ]

**अकार्यकरणज्ञानादेर्व्रीडा वैवर्ण्यादिकृत् ।** [सू० १९]

यथा—दर्पणे च परिभोगदर्शिनी पृष्ठतः प्रणयिनो निषेदुषः ।
वीक्ष्य बिम्बमनुबिम्बमात्मनः कानि कानि न चकार लज्जया ॥२४॥

[**कुमारसंभव** स० ८, श्लो० ११]

**इष्टानिष्टदर्शनादेर्जाड्यं तूष्णी**[1]**भावादिकृत् ।** [सू० २०]

यथा—एवमालि निगृहीतसाध्वसं शङ्करो रहसि सेव्यतामिति ।
सा सखीभिरुपदिष्टमाकुला नास्मरत् प्रमुखवर्तिनि प्रिये ॥२५॥

[**कुमारसंभव** स० ८, श्लो० ५]

**कार्यभङ्गाद् विषादः सहायान्वेषणमुखशोषादिकृत् ।** [सू० २१]

यथा—व्यर्थं यत्र कपीन्द्रसख्यमपि मे क्लेशः कपीनां वृथा
प्रज्ञा जाम्बवतो न यत्र न गतिः पुत्रस्य वायोरपि ।
मार्गं यत्र न विश्वकर्मतनयः कर्तुं नलोऽपि क्षमः
सौमित्रेरपि पत्रिणामविषयस्तत्र प्रिया क्वापि मे ॥२६॥

[**उत्तररामचरित** अं० ३, श्लो० ४६]

**मद्योपयोगान्मदः स्वापहास्यास्मरणादिकृत् ।** [सू० २२]

उत्तमा-ऽधम-मध्येषु वर्ण्यते प्रथमो मदः ।
द्वितीयो मध्यनीचेषु नीचेष्वेव तृतीयकः ॥२७॥

यथा—सावशेषपदमुक्तमुपेक्षा स्रस्तमाल्यवसनाभरणेषु ।
गन्तुमुद्यतमकारणतः स्म द्योतयन्ति मदविभ्रममासाम् ॥२८॥

[**शिशुपालवध** स० १०, श्लो० १६]

**विरहादेर्मनस्तापो व्याधिर्मुखशोषादिकृत् ।** [सू० २३]

यथा—मनोरोगस्तीव्रं विषमिव विसर्पत्यविरतं
प्रमाथी निर्धूमं ज्वलति विधुतः पावक इव ।

१. अतः परं ग्रन्थस्य पत्रे नष्टे, **काव्यानुशासनादु**द्धृतोऽयं सन्दर्भः ।
२. **सुभाषितावली,** श्लो० ३२८०

हिनस्ति प्रत्यङ्गं ज्वर इव गरीयानित इतो
न मां तातस्त्रातुं प्रभवति न चाम्बा न भवती ॥२९॥

[**मालतीमाधव** अं० २, श्लो० १]

**क्लमादेर्निद्रा जृम्भादिकृत्** । [सू० २४]

यथा—निद्रानिमीलितदृशो मदमन्थराणि
नाप्यर्थवन्ति न च यानि निरर्थकानि ।
अद्यापि मे मृगदृशो मधुराणि तस्या-
स्तान्यक्षराणि हृदये किमपि ध्वनन्ति ॥३०॥

[—**कलशकस्य**[1]]

**निद्रोद्भवं सुप्तमुत्स्वप्नायितादिकृत्** । [सू० २५]

यथा—एते लक्ष्मण जानकीविरहितं मां खेदयन्त्यम्बुदा
मर्माणीव] विघट्टयन्त्यलममी क्रूराः कदम्बानिलाः ।
इत्थं व्याहृतपूर्वजन्मचरितो यो राधया वीक्षितः
सेर्ष्यं शङ्कितया स वः सुखयतु स्वप्नायमानो हरिः ॥३१॥

[**—शुभाङ्कस्य**[2]]

**इष्टानुस्मरणादेरौत्सुक्यं त्वरादिकृत्** । [सू० २६]

यथा—आलोकमार्गं सहसा व्रजन्त्या कयाचिदुद्वेष्टनवान्तमाल्यः ।
बद्धुं न सम्भावित एव तावत् करेण रुद्धोऽपि हि केशपाशः ॥३२॥

[**रघुवंश** स० ७, श्लो ०६, **कुमारसंभव** सू० ७, श्लो० ५७]

**लज्जादेरवहित्थमन्यथाकथनादिकृत्** । [सू० २७]

यथा—एवंवादिनि देवर्षौ पार्श्वे पितुरधोमुखी ।
लीलाकमलपत्राणि गणयामास पार्वती ॥३३॥

[**कुमारसंभव** स० ६, श्लो० ८४]

---

१. **सदुक्तिकर्णामृते** १. ५३. ३ । २. **दशरूपकावलोक** प्र० ४, सू० २७

**चौर्यादेः स्व-परयोः शङ्का पार्श्वविलोकनादिकृत्** । [सू० २८]

यथा—दूराद् दवीयो धरणीधराभं यस्ताडकेयं तृणवद् व्यधूनोत् ।
हन्ता सुबाहोरपि ताडकारिः स राजपुत्रो हृदि बाधते माम् ॥३४॥

[**महावीरचरित** अं० २, श्लो० १]

**रागादेश्चापलं वाक्पारुष्यादिकृत्** । [सू० २९]

यथा—कश्चित्कराभ्यामुपगूढनालमालोलपत्राभिहतद्विरेफम् ।
रजोभिरन्तःपरिवेशबन्धि लीलारविन्दं भ्रमयांचकार ॥३५॥

[**रघुवंश** स० ६, श्लो० १३]

**श्रमादेरालस्यं निद्रादिकृत्** । [सू० ३०]

यथा—चलति कदाचित्पृष्टा यच्छति वाचं कदाचिदालीनाम् ।
आसितुमेव हि मनुते गुरुगर्भभरालसा सुतनुः ॥३६॥

[**—धनिकस्य**]

**प्रियागम[ना]देर्हर्षो रोमाञ्चादिकृत्** । [सू० ३१]

यथा—आयाते दयिते मरुस्थलभुवामुत्प्रेक्ष्य दुर्लङ्घ्यतां
गेहिन्या परितोषबाष्पसलिलामासाद्य दृष्टिं मुखे ।
दत्त्वा पीलुशमीकरीरकवलान् स्वेनाञ्चलेनादरा-
दुन्मृष्टं करभस्य केसरसटाभाराग्रलग्नं रजः ॥३७॥

[**—अद्भुतपुण्यस्य केशटस्य वा**]

**विद्यादेर्गर्वोऽसूयादिकृत्** । [सू० ३२]

यथा—ब्राह्मणातिक्रमत्यागो भवतामेव भूतये ।
जामदग्न्यस्तथा मित्रमन्यथा दुर्मनायते ॥३८॥

[**महावीरचरित** अं० २, श्लो० १०]

**चौर्यादेरौग्र्यं वधादिकृत्** । [सू० ३३]

[यथा—]उत्कृत्योत्कृत्य गर्भानपि शकलयतः क्षत्रसंतानरोषा-
दुद्दामस्यैकविंशत्यवधि विशसतः सर्वतो राजवंशान् ।

---

१. **शुभाषितावली** २०७५ । २. **शुभाषितरत्नकोष** ५१२ ।

पित्र्यं तद्रक्तपूर्णह्रदसवनमहानन्दमन्दायमान-
　　क्रोधाग्नेः कुर्वतो मे न खलु न विदितः सर्वभूतैः स्वभावः ॥३९॥

[**महावीरचरित** अं० २, श्लो० ४८]

**शब्दादेः प्रबोधो जृम्भादिकृत्** । [सू० ३४]

यथा—प्रत्यग्रोन्मेषजिह्मा क्षणमनभिमुखी रत्नदीपप्रभाणा-
　　मात्मव्यापारगुर्वी जनितजललवा जृम्भणैः साङ्गभङ्गैः ।
नागाङ्कं मोक्तुमिच्छोः शयनमुरु फणाचक्रवालोपधानं
　　निद्राच्छेदाभिताम्रा चिरमवतु हरेर्दृष्टिराकेकरा वः ॥४०॥

[**मुद्राराक्षस** अं० ३, श्लो० २१]

**व्याध्यादेर्ग्लानि[वै]वर्ण्यादिकृत्** । [सू० ३५]

यथा—किसलयमिव मुग्धं बन्धनाद् विप्रलूनं
　　हृदयकुसुमशोषी दारुणो दीर्घशोकः ।
ग्लपयति परिपाण्डु क्षाममस्याः शरीरं
　　शरदिज इव धर्मः केतकीगर्भपत्रम् ॥४१॥

[**उत्तररामचरित** अं० ३, श्लो० ५]

**दौर्गत्यादेर्दैन्यमस्रजादिकृत्** ।[सू० ३६]

यथा—अस्मान् साधु विचिन्त्य संयमधनानुच्चैः कुलं चात्मन-
　　स्त्वय्यस्याः कथमप्यबान्धवकृतां प्रेमप्रवृत्तिं च ताम् ।
सामान्यप्रतिपत्तिपूर्वकमियं दारेषु दृश्या त्वया
　　भाग्याधीनमतः परं न खलु तत् स्त्रीबन्धुभिर्याच्यते ॥४२॥

[**अभिज्ञानशाकुन्तल** अं० ४, श्लो० १६]

**व्यायामादेः श्रमोऽङ्गमङ्गादिकृत्** । [सू०३७]

यथा—अलसलुलितमुग्धान्यध्वसंतापखेदा-
　　दशिथिलपरिरम्भैर्दत्तसंवाहनानि ।

मृदुमृदितमृणालीदुर्बलान्यङ्गकानि
त्वमुरसि मम कृत्वा यत्र निद्रामवाप्ता ॥४३॥

[**उत्तररामचरित** अं० १, श्लो० २४]

**इष्टवियोगादेरुन्मादोऽनिमित्तस्मितादिकृत्** । [सू० ३८]

यथा—हंस प्रयच्छ मे कान्तां गतिस्तस्यास्त्वया हृता ।
संभावितैकदेशेन देयं यदभियुज्यते ॥४४॥

[**विक्रमोर्वशीय** अं० ४, श्लो० १७]

**प्रहारादेर्मोहो भ्रमणादिकृत्** । [सू० ३९]

यथा—तीव्राभिषङ्गप्रभवेण वृत्तिं मोहेन संस्तम्भयतेन्द्रियाणाम् ।
अज्ञातभर्तृव्यसना मुहूर्तं कृतोपकारेव रतिर्बभूव ॥४५॥

[**कुमारसंभव** स० ४, श्लो० ७३]

सुखजन्मापि मोहो भवति । यथा—

कान्ते तल्पमुपागते विगलिता नीवी स्वयं बन्धना-
त्तद्वासः श्लथमेखलागुणधृतं किञ्चिन्नितम्बे स्थितम् ।
एतावत् सखि वेद्मि सांप्रतमहं तस्याङ्गसङ्गे पुनः
कोऽसौ कास्मि रतं [नु] किं कथमिति स्वल्पापि मे न स्मृतिः ॥४६॥

[**अमरुशतक** श्लो० १०१]

**दारिद्र्यादेश्चिन्ता संतापादिकृत्** । [सू० ४०]

[*यथा*—]पश्यामि तामित इतश्च पुरश्च पश्चा-
दन्तर्बहिः परित एव विवर्तमानाम् ।
उद्बुद्धमुग्धकनकाब्जनिभं वहन्ती-
मासज्य तिर्यगपवर्तितदृष्टिवक्त्रम् ॥४७॥

[**मालतीमाधव** अं० १, श्लो० ४३]

**आक्षेपादेरमर्षः स्वेदादिकृत्** । [सू० ४१]

यथा—लाक्षागृहानलविषान्नसभाप्रवेशैः
प्राणेषु चित्तनिचयेषु च नः प्रहृत्य ।

आकृष्टपाण्डववधूपरिधानकेशाः
स्वस्था भवन्ति मयि जीवति धार्तराष्ट्राः ॥४८॥

[ **वेणीसंहार** अं० १, श्लो० ८ ]

**निर्घातादेस्त्रासोऽङ्गसंक्षेपादिकृत्** । [ सू० ४२ ]

**यथा**—परिस्फुरन्मीनविघट्टितोरवः सुराङ्गनास्त्रासविलोलदृष्टयः ।
उपाययुः कम्पितपाणिपल्लवाः सखीजनस्यापि विलोकनीयताम् ॥४९॥

[ **किरातार्जुनीय** स० ८, श्लो० ४५ ]

**ग्रहादेरपस्मारः कम्पादिकृत्** । [ सू० ४३ ]

**यथा**—आश्लिष्टभूमिं रसितारमुच्चैर्लोलद्भुजाकारबृहत्तरङ्गम् ।
फेनायमानं पतिमापगानामसावपस्मारिणमाशशङ्के ॥५०॥

[ **शिशुपालवध** स० ३, श्लो० ७२ ]

**रोगादेर्निर्वेदो रुदितादिकृत्** । [ सू० ४४ ]

**यथा**—किं करोमि क्व गच्छामि कमुपैमि दुरात्मना ।
दुर्भरेणोदरेणाहं प्राणैरपि विडम्बितः ॥५१॥

[ **काव्यानुशासन** श्लो० १५१ ]

**उत्पातादिभ्य आवेगो विस्मयादिकृत्** । [ सू० ४८ ]

**यथा**—किं किं सिंहस्ततः किं नरसदृशवपुर्देव चित्रं गृहीतो
नैवेदृक्कोऽपि जीवोऽद्भुतमुपनिपतन् पश्य संप्राप्त एव ।
शस्त्रं शस्त्रं न शस्त्री त्वरितमहह हा कर्कशत्वं नखाना-
मित्थं दैत्याधिनाथो निजनखकुलिशैर्येन भिन्नः स पायात् ॥५२॥

[ **काव्यानुशासन** श्लो० १५२ ]

**संदेहादेर्वितर्कः शिरःकम्पादिकृत्** । [ सू० ४६ ]

**यथा**—अनङ्गः पञ्चभिः पौष्पैर्विश्वं व्यजयतेषुभिः ।
इत्यसंभाव्यमथ वा विचित्रा वस्तुशक्तयः ॥५३॥

[ **काव्यादर्श** परि० २, श्लो० १२१ ]

---

१. सुभाषितरत्नकोष, १२८ ( श्री**व्यास**पादानामित्येकतमायां प्रतौ )। कवीन्द्रवचनसमुच्चय, ४०।

**परोत्कर्षादेरसूयावज्ञादिकृत् ।** [ सू० ४७ ]

यथा—वृद्धास्ते न विचारणीयचरितास्तिष्ठन्तु हुं वर्तते
सुन्दस्त्रीदमनेऽप्यखण्डयशसो लोके महान्तो हि ते ।
यानि त्रीणि(ण्य)[कुतो]मुखान्यपि पदान्यासन् खरायोधने
यद्वा कौशलमिन्द्रसूनुनिधने तत्राप्यभिज्ञो जनः ॥५४॥

[ **उत्तररामचरित** अं० ५, श्लो० ३५ ]

**व्याध्यभिघाताभ्यां मृतिर्हिक्काकार्श्यादिकृत् ।** [ सू० ५१ ]

यथा—तीर्थे तोयव्यतिकरभवे जह्नुकन्यासरय्वो-
र्देहत्यागादमरगणनालेख्यमासाद्य सद्यः ।
पूर्वाकाराधिकत[र]रुचा संगतः कान्तयासौ
लीलागारेष्वरमत पुनर्नन्दनाभ्यन्तरेषु ॥५५॥

[ **रघुवंश** स० ८, श्लो ९५ ]

**स्तं[१म्भस्वेदरोमाञ्चस्वरभेदकम्पवैवर्ण्याश्रुप्रलया अष्टौ सात्त्विकाः ।** [सू० ४९]

